॥ वेद ॥

# शुक्ल यजुर्वेद माध्यन्दिनीय संहिता

श्रीमहागणपतये नमः　　　　ॐ　　　　श्रीवेदपुरुषायनमः

शुक्लयजुर्वेदीय

# माध्यन्दिनीयसंहिता।

अथानुवाकसूत्रम् ।। इषेत्त्वैका, वसोःपवित्त्रंतिस्रोऽग्नेव्व्रतपते सप्त, पवित्त्रेस्थो द्वे, शर्म्मासितिस्त्रो, धृष्टिरसिशर्म्मासिद्विकौ, देवस्यत्त्वा तिस्रो, देवस्यत्त्वा पञ्च, प्रत्युष्टꣳरक्षस्ति- स्त्रो, दशैकत्रिꣳशत् ।। हरिःॐ ।। इषेत्त्वा ।। इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोवः सविताप्प्रार्प्पयतु श्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेन ऽईशतमाघशꣳसोद्ध्रुवाऽअस्मिन्न्गोपतौस्यातबह्व्वीर्य्यजमानस्यपशून्पाहि ।।१ ।।

(१-१) व्वसोःपवित्त्रम् ।। व्वसोःपवित्त्रमसिद्यौरसिपृथिव्व्यसिमातरिश्श्वनो घर्म्मोसिव्वि

श्श्वधाऽअसि ।। परमेणधाम्म्नादृꣳहस्वमाह्व्वाम्र्मातेयज्ञपतिर्ह्वार्षीत् ।।२।। व्वसोः पवित्रम् ।।
व्वसोः पवित्त्रमसिशतधारंव्वसोः पवित्त्रमसिसहस्रधारम् ।। देवस्त्वासवितापुनातुव्वसोः पवित्रेण
शतधारेण सुप्प्वाकामधुक्षः ।।३।। साव्विश्श्वायुः ।। साव्विश्श्वायुःसाविश्श्वकर्माश्श्वधायाः ।।
इन्द्रस्यत्त्वाभागꣳसोमेनातनच्चिम्व्विष्णणोहव्व्यꣳरक्ष ।।४।। (३-२) अग्ग्नेव्व्रतपते। व्व्रतञ्चरिष्ष्यामितच्छकेयन्तन्नमेराद्ध्यताम् ।। इदमहनृतात्त्सत्त्यमुपैमि ।।५।। कस्त्त्वा ।। युनक्क्ति
सत्त्वायुनक्क्तिकस्म्मैत्त्वायुनक्क्तितस्म्मैत्त्वायुनक्क्ति ।। कर्म्मणेवांव्वेषायवाम् ।।६।।
प्रत्त्युष्टꣳरक्षः ।। प्रत्त्युष्टꣳरक्षःप्प्रत्त्युष्टाऽअरातयोनिष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः ।। उर्व्वन्तरिक्ष
मणन्न्वेमि ।।७।। धूरसि ।। धूरसिधूर्व्वधूर्व्वन्तन्धूर्व्वतँय्योस्म्मान्धूर्व्वतितन्धूर्व्वयं वयन्धूर्व्वामः ।।
देवानामसिव्वह्निन्तमꣳसस्निन्तमम्पप्प्रितमञ्जुष्टतमन्देवहूतमम् ।।८।। अह्रुतमसि ।
हविर्द्धानन्दृꣳहस्वमाह्व्वाम्र्मातेयज्ञपतिर्ह्वार्षीत् ।। व्विष्णुस्त्वाक्क्रमतामुरुव्वातौयापहतꣳ
रक्षोयच्छन्ताम्पञ्च ।।९।। देवस्यत्त्वा। सवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णणोहस्ताब्भ्याम् ।।
अग्ग्नयेजुष्टङ्गृह्णणाम्म्यग्ग्नीषोमाब्भ्याञ्जुष्टङ्गृह्णणामि ।।१०।। भूतायत्त्वा ।। भूतायत्त्वानारातये

स्वरभिविख्येषन्दृꣳहन्तान्दुर्य्याःपृथिव्यामुर्व्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौसादयाम्म्य
दित्त्याऽउपस्त्थेग्ग्नेहव्व्यꣳरक्ष ।।११।। (७–३) पवित्त्रेस्त्थः ।। पवित्त्रेस्त्थो
व्वैष्णव्व्यौसवितुर्व्वःप्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ।। देवीरापो
ऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्ध्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुँय्यज्ञपतिन्देवयुवम् ।।१२।।
युष्म्माइन्द्रः ।। युष्म्माऽइन्द्रोवृणीतव्वृत्रतूर्य्येयूयमिन्द्रमवृणीद्ध्वंव्वृत्रतूर्य्येप्प्रोक्षितास्त्थ ।।
अग्ग्नयेत्त्वाजुष्टम्प्रोक्षाम्म्यग्ग्नीषोमाब्भ्यान्त्वाजुष्टम्प्रोक्षामि ।। दैव्व्यायकर्म्मणेशुन्ध
द्ध्वंन्देवयज्ज्यायैयद्वोशुद्धाःपराजग्घ्नुरिदंव्वस्तच्छुन्धामि ।।१२।। (२–४) शर्म्मासि ।।
शर्म्मास्यवधूतꣳरक्षोवधूताऽअरातयोदित्त्यास्त्वगसिप्प्रतित्त्वादितिर्व्वेत्तु ।। अद्रिरसिव्वान
स्प्पत्त्योग्रावासिपृथुबुध्नःप्प्रतित्त्वादित्त्यास्त्वग्व्वेत्तु ।।१४।। अग्ग्नेस्तनूः ।। अग्ग्नेस्तनूरसिव्वा
चोव्विसर्ज्जनन्देववीतयेत्त्वागृह्णामिबृहद्ग्रावासिव्वानस्प्पत्त्यःसऽइदन्देवेब्भ्योहविःशमीष्व
सुशमिशमीष्व ।। हविष्कृदेहिहविष्कृदेहि ।।१५।। कुक्कुटोसि ।। कुक्कुटोसिमधुजिह्वऽइष
मूर्ज्जमावदत्त्वयाव्वयꣳसङ्घातꣳसङ्घातञ्जेष्म्मव्वर्षवृद्धमसिप्प्रतित्त्वाव्वर्षवृद्धंव्वेत्तुपरापूतꣳरक्षः

परापूताऽअरातयोपहतहरक्षोव्वायुर्व्वोव्विविनक्क्तुदेवोवःसविताहिरण्ण्यपाणिःप्प्रतिगृब्भ्णात्त्व
च्छिद्द्रेणपाणिना ।।१६ ।। (३–५) धृष्ट्टिरसि ।। धृष्ट्टिरस्यपाग्ग्नेऽअग्ग्निमामादञ्ज
हिनिष्क्रव्व्यादहसेधादेवयजंव्वह ।। ध्रुवमसिपृथिवीन्दृ हब्ब्रह्मवनित्त्वाक्षत्रवनिसजातवन्न्युप
दधामिब्भ्रातृव्व्यस्यव्वधाय ।।१७ ।। अग्ग्नेब्ब्रह्म । गृब्भ्णीष्ष्वधरुणमस्यन्तरिक्षन्दृ
हब्ब्रह्मवनित्त्वाक्षत्रवनिसजातवन्न्युपदधामिब्भ्रातृव्व्यस्यव्वधाय ।।
धर्त्रमसिदिवन्दृहहब्ब्रह्मवनित्त्वाक्षत्रवनिसजातवन्न्युपदधामिब्भ्रातृव्व्यस्यव्वधाय ।।
व्विश्श्वाब्भ्यस्त्वाशाब्भ्यऽउपदधामिचितस्त्थोद्ध्र्वचितोभृगूणामङ्गिरसान्तपसातप्प्यद्ध्वम् ।।१८
।। (२–६) शर्म्मासि ।। शर्म्मास्यवधूतहरक्षोवधूताऽअरातयोदित्त्यास्त्वगसिप्प्रतित्त्वादितिर्व्वेत्तु ।।
धिषणासिपर्व्वतीप्प्रतित्त्वादित्त्यास्त्वग्ग्वेत्तुदिवस्क्कम्भनीरसिधिषणासिपार्व्वतेयीप्प्रतित्त्वापर्व्वती
व्वेत्तुधान्न्यमसि ।।१९ ।। धान्न्यमसि । धिनुहिदेवान्प्प्राणायत्त्वोदानायत्त्वाव्व्यानायत्त्वा ।।
दीर्ग्घामनुप्प्रसितिमायुषेधान्देवोवःसविताहिरण्ण्यपाणिःप्प्रतिगृब्भ्णात्त्वच्छिद्द्रेणपाणिनाचक्षुषे
त्त्वामहीनाम्पयोसि ।।२० ।। (२–७) देवस्यत्त्वा ।। सवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णो

हस्ताभ्याम् ।। संव्वपामिसमापऽओषधीभिःसमोषधयोरसेन ।। सह्रेवतीर्ज्जगतीभिःपृच्च्यन्ताꣳ
सम्मधुमतीर्म्मधुमतीभिःपृच्च्यन्ताम् ।।२१ ।। जनयत्त्यैत्त्वा ।। जनयत्त्यैत्त्वासँय्यौमीदमग्ग्नेरिदमग्ग्नी
षोमयोरिषेत्त्वाघर्म्मोसिव्विश्श्वायुरुरुप्प्रथाऽउरुप्प्रथस्वोरुतेयज्ञपतिःप्प्रथतामग्ग्निष्ट्टेत्त्वचम्माहिꣳ
सीद्देवस्त्वासविताश्श्रपयतुव्वर्षिष्ठेधिनाके ।।२२ ।। माभेः ।। माभेर्म्मासंव्विक्क्थाऽअतमेरुर्य्य
ज्ञोतमेरुर्य्यजमानस्यप्प्रजाभूयात्त्रितायत्त्वाद्द्वितायत्त्वैकतायत्त्वा।।२३।। (३–८) देवस्यत्त्वा।
सवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताभ्याम्।। आददेद्ध्वरकृतन्देवेब्भ्यऽ इन्द्रस्यबाहुरसि
दक्षिणःसहस्रभृष्टिःशततेजा व्वायुरसितिग्ग्मतेजाद्द्विषतोव्वधः।।२४।। पृथिविदेवयजनि।।
पृथिविदेवयजन्न्योषद्ध्यास्तेमूलम्माहिꣳसिषंव्व्रजङ्गच्छगोष्ट्ठानंव्वर्षतुतेद्यौर्ब्बधानदेवसवितःपरम
स्याम्पृथिव्व्याꣳशतेनपाशैर्य्योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मस्तमतोमामौक्।।२५।। अपाररुम्।।
अपाररुम्पृथिव्व्यैदेवयजनाद्वद्ध्यासंव्व्रजङ्गच्छगोष्ट्ठानंवर्षतुतेद्यौर्ब्बधानदेवसवितःपरमस्याम्पृ
थिव्व्याꣳशतेनपाशैर्य्योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मस्तमतोमामौक्।। अररोदिवम्मापप्प्तो
द्द्रप्प्सस्तेद्याम्मास्क्कन्व्व्रजङ्गच्छगोष्ट्ठानंव्वर्षतुतेद्यौर्ब्बधानदेवसवितःपरमस्याम्पृथिव्व्याꣳशतेन

पाशैर्य्योस्म्मान्द्वेष्ट्टियञ्चंव्वयन्द्विष्म्मस्तमतोमामौंक्।।२६।। गायत्त्रेणत्त्वा।। गायत्त्रेणत्त्वाच्छन्द

सापरिंगृह्ण्णामित्त्रैष्ट्टुभेनत्त्वाच्छन्दसापरिंगृह्ण्णामिजागतेनत्त्वाच्छन्दसापरिंगृह्ण्णामि।। सुक्ष्मा

चासिंशिवाचासिस्योनाचासिंसुषदाचास्युर्ज्जस्वतीचासिपयस्वतीच।।२७।। पुराक्क्रूरस्य।

व्विसृपोव्विरप्प्शिन्नुदादायपृथिवीञ्जीवदानुम्।। यामैरयँश्च्चन्द्रमसिस्वधाभिस्तामुधीरासो

ऽअनुदिश्श्ययजन्ते।। प्रोक्षणीरासादयद्द्विषतोव्वधोसि।।२८।। (५-९) प्रत्तयुंष्टटह्रक्षः।।

प्रत्त्युंष्टह्रक्षल्प्प्रत्त्युंष्टाऽरातयोनिष्ट्टप्प्तह्रक्षोनिष्ट्टप्प्ताऽअरातयः।।अनिंशितोसिसपत्क्नक्षिद्द्वा

जिनन्त्वाव्वाजेद्व्यायैसम्म्मांज्जिर्म।। प्रत्त्युंष्टह्रक्षल्प्प्रत्त्युंष्टाऽअरातयोनिष्ट्टप्प्तह्रक्षोनिष्ट्टप्प्ता

ऽअरातयः।। अनिंशितासिसपत्क्नक्षिद्द्वाजिनीन्त्वाव्वाजेद्व्यायै सम्म्मांज्जिर्म।।२९।।

अदिंत्त्यैरास्न्नासिव्विष्णोव्वेंष्ष्योस्यूर्ज्जेत्त्वादब्धेनत्त्वाचक्षुषावपश्श्यामि।। अग्ग्नेर्ज्जिह्वा

सिंसुहूर्द्देवेब्भ्योधाम्म्नेधाम्म्नेमेभवयजुंषेयजुषे।।३०।। सवितुस्त्वा। प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण

पवित्त्रेणसूर्य्यस्यरश्म्मिभिः।। सवितुर्व्वःप्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्म्मिभिः

।। तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्टन्देव यजनमसि।।३१।। (३-१०)

इतिश्रीवाजसनेयसंहितायां प्रथमोध्यायः।।१।।

श्रीवेदपुरुषाय नमः। अनुवाकसूत्रम्।। कृष्णोसिषड, ग्नेवाज जित्तिस्स्रो, मयीद, मग्नीषोमयोः पंचका, वग्नेदब्धायोचतस्रः, संवर्चसापंचा, ग्नयेकव्यवाहनायषट् सप्तचतुस्त्रिᳪशत्।। हरिः ॐ।। कृष्ण्णोसि। कृष्ण्णोस्याखरेष्ट्ठोग्ग्नयेत्त्वाजुष्टंप्रोक्षामिव्वेदिरसि बर्हिषेत्त्वाजुष्ट्टाम्प्रोक्षामि बर्हिरसिस्स्रुग्ग्भ्यस्त्वाजुष्ट्टम्प्रोक्षाम्म्यदित्त्यैव्युन्दनम्।।१।। अदित्त्यैव्युनन्दनमसिव्विष्ण्णोस्तु पोस्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्त्थान्देवेब्भ्योभुवपतयेस्वाहाभुवनपतयेस्वाहाभूतानाम्पतये स्वाहा।।२।। गन्धर्व्वस्त्वा। व्विश्श्वावसुᳬपरिदधातुव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्ग्नि रिडऽईडितः।। इन्द्रस्यबाहुरसिदक्षिणोव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्ग्निरिडऽईडितः।। मित्त्रावरुणौत्त्वोत्तरतःपरिधत्ताम्ध्रुवेणधर्म्मणाव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्ग्निरिडऽई डितः।।३।। व्वीतिहोत्त्रन्त्वा। कवेद्युमन्तᳪसमिधीमहि।। अग्ग्नेबृहन्तमद्ध्वरे।।४।। समिदसि।।

समिदंसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै।। सवितुर्ब्बाहूस्त्थऽऊर्ण्णम्म्रदसन्त्वा स्तृणामिस्वासस्त्थन्देवेब्भ्यऽआत्त्वाव्वसवोरुद्द्राऽआदित्त्याःसदन्तु।।५।। घृताच्च्यसि। जुहूर्न्नाम्म्नासेदम्प्रियेणधाम्म्नाप्प्रियꣳसदऽआसीदघृताच्च्यस्युपभृन्नाम्म्नासेदम्प्रियेणधाम्म्ना प्प्रियꣳसदऽआसीदघृताच्च्यसिद्ध्रुवानाम्म्नासेदम्प्रियेणधाम्म्नाप्प्रियꣳसदऽआसीदप्प्रियेण धाम्म्नाप्प्रियꣳसदऽआसीद। ध्रुवाऽअसदन्नृतस्ययोनौताव्विष्ण्णो पाहिपाहियज्ञम्पाहियज्ञ पतिंपाहिमाँय्यज्ञन्यम्।।६।। (६-१) अग्ग्नेव्वाजजित्।। अग्ग्नेव्वाज जिद्द्वाजन्त्वासरिष्ष्यन्तं व्वाजजितꣳसम्मार्ज्जि।। नमोदेवेब्भ्यः स्वधापितृब्भ्यः सुयमेमेभूया स्तमस्क्कन्नमद्य।।७।। अस्क्कन्नमद्य। देवेब्भ्यऽआज्ज्यꣳसम्भ्रियासमङ्घ्रिणाव्विष्ण्णोमात्त्वावक्क्रमिषंव्वसुमतीमग्ने तेच्छायामुपस्त्थेषंव्विष्ण्णोस्त्थानमसीतऽइन्द्रोव्वीर्य्यमकृणोदूर्द्धोद्ध्वरऽआस्त्थात्।।८।। अग्ग्नेव्वेः।। अग्ग्नेव्वेर्होत्त्रंव्वेर्द्दूत्त्यमवतान्त्वान्द्यावापृथिवीऽअवत्त्वन्द्यावापृथिवी स्विष्टकृद्देवेब्भ्यऽइन्द्रऽआज्ज्येनहविषाभूत्स्वाहासञ्ज्योतिषाज्ज्योतिः।।९।। (३-२) मयीदम्।।

मयीदमिन्द्रऽइन्द्रियन्दधात्त्वस्म्मान्न्रायोमघवानꣳसचन्ताम्।। अस्म्माकꣳसन्त्वाशिषःसत्त्यानः

सन्त्वाशिषऽउपहूतापृथिवीमातोपमाम्पृथिवी माताह्व्वयतामग्ग्निराग्ग्नीद्ध्रात्स्वाहा।।१०।।

उपहूतोद्यौःष्पितोपमान्द्यौष्पिताह्व्वयतामग्ग्निराग्ग्नीद्ध्रात्स्वाहा।। देवस्यत्त्वासवितुःप्प्रसवे

शिवनो ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्।। प्रतिगृह्णाम्म्यग्ग्नेष्ट्वास्येनप्प्राश्नामि।।११।।

एतन्ते। देवसवितर्य्यज्ञम्प्राहुर्बृहस्प्पतयेब्ब्रह्म्मणे।। तेनयज्ञमवतेनयज्ञपतिन्तेनमामव।।१२।।

मनोजूतिः।। मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳसमिमन्दधातु।।

व्विश्वेदेवासऽइहमादयन्तामो।। ३ँम्प्रतिष्ठ।।१३।। एषाते।। एषातेऽअग्ग्नेसमित्तयाव्वर्द्धस्व

चाचप्प्यायस्व।। व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि।। अग्ग्नेव्वाजजिद्द्वाजन्त्वाससृवाꣳ

संव्वाजजितꣳसम्म्मार्ज्जिम।।१४।। (५-३) अग्ग्नीषोमयोरुज्जितिम्।। अग्ग्नीषोमयोरुज्जिति

मनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रोहामि।। अग्ग्नीषोमौतमपनुदताँय्योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मो

व्वाजस्यैनम्प्रसवेनापोहामि।। इन्द्राग्ग्न्योरुज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रोहामि।। इन्द्राग्ग्नी

तमपनुदताँय्योस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मोव्वाजस्यैनम्प्रसवेनापोहामि।।१५।। व्वसुब्भ्यस्त्वा। रुद्द्रेब्भ्यस्त्वादित्त्येब्भ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्त्रावरुणौत्त्वाव्वृष्ट्ट्यावताम्।। व्यन्तु व्वयोक्क्तꣳरिहाणामरुताम्पृषतीर्ग्गच्छव्वशापृश्न्निर्ब्भूत्त्वादिवङ्गच्छततोनोव्वृष्ट्टिमावह।। चक्षुष्प्पा ऽअग्ग्नेसिचक्षुर्म्मेपाहि।।१६।। यम्परिधिम्।। यम्परिधिम्पर्य्यधत्थाऽअग्ग्नेदेवपणिभिर्ग्गु ह्यमानꣳ।। तन्तऽएतमनुजोषम्भराम्म्येषनेत्त्वदपचेतयाताऽअग्ग्नेः प्प्रियम्पाथोपीतम्।।१७।। सꣳ स्रवभागास्त्थेषाबृहन्तꣳ प्प्रस्तरेष्ट्ठाः परिधेयाश्च्चदेवाः।। इमांव्वाचमभिविश्श्वेगृणन्तऽआसद्या स्मिन्न्बर्हिषिमादयद्ध्वꣳस्वाहाव्वाट्।।१८।। घृताचीस्त्थः।। घृताचीस्त्थोधुर्य्यौपातꣳ सुम्म्नेस्त्थः सुम्म्नेमाधत्तम्।। यज्ञनमश्च्चतऽउपचयज्ञस्यशिवेसन्तिष्ट्ठस्वस्विष्ट्टेमेसन्तिष्ट्ठस्व ।।१९।। (५-४) अग्ग्नेदब्धायो।। शीतमपाहिमादिद्यौः पाहिप्प्रसित्त्यैपाहिदुरिष्ट्ट्यैपाहिदुरद्य मन्न्याऽअविषन्नः पितुङ्कृणुसुषदायोनौस्वाहाव्वाडग्ग्नयेसंव्वेशपतयेस्वाहासरस्वत्त्यैयशोभ गिन्न्यैस्वाहा।।२०।। व्वेदोसि ।। व्वेदोसियेनत्त्वन्देवव्वेददेवेब्भ्योव्वेदोभवस्तेनमह्यंव्वेदोभूयाꣳ।।

देवागातु विदोगातुंव्वित्त्वागातुमित।। मनसस्प्पतऽइमन्देवयज्ञ॑स्वाहाव्वातेधाः।।२१।। सम्बर्हिः।। सम्बर्हिरङ्क्ताँहविषाघृतेनसमादित्त्यैर्व्वसुभिःसम्मरुद्भिः।। समिन्द्रोव्विश्श्व देवेभिरङ्क्तान्दि व्व्यन्नभोगच्छतुयत्त्स्वाहा।।२२।। कस्त्वा।। कस्त्वाव्विमुञ्चतिसत्त्वाव्विमुञ्चति कस्म्मैत्त्वाव्वि मुञ्चतितस्म्मैत्त्वाव्विमुञ्चति।। पोषायरक्षसाम्भागोसि।२३।। (४) संव्वर्च्चसा।। संव्वर्च्चसापय सासन्तनूभिरगन्म्महिमनसासःशिवेन।। त्वष्टासुदत्रोव्विदधातुरायोनुमार्ष्टुतन्न्वोय द्विलिष्टम् ।।२४।। दिविव्विष्णुः।। दिविव्विष्णुव्वर्य्यक्क्रँस्तजागतेनच्छन्दसाततोनिर्ब्भ क्क्तोयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मोन्तरिक्षेव्विष्णुर्व्व्यक्क्रँस्तत्त्रैष्टुभेनच्छन्दसाततोनिर्ब्भक्क्तो योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मःपृथिव्व्यांव्विष्णुर्व्व्यक्क्रँस्तगायत्त्रेणच्छन्दसाततोनिर्ब्भक्क्तोयो स्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मोस्म्मादन्नादस्यैप्प्रतिष्ठायाऽअगन्म्मस्वः सञ्ज्योतिषाभूम।।२५।। स्वयम्भूरसि।। स्वयम्भूरसिश्रेष्ठोरश्मिर्व्वर्च्चोदाऽअसिव्वर्च्चोमे देहि।। सूर्य्यस्यावृतमन्न्वावर्त्ते ।।२६।। अग्ग्नेगृहपते। सुगृहपतिस्त्त्वयाग्गनेहङ्गृहपतिनाभूयासःसुगृहपतिस्त्वम्मयाग्ग्नेगृह पतिना

भूयाः।। अस्त्थूरिणौगार्हंपत्त्यानिसन्तुशतꣳहिमाꣳसूर्य्यस्यावृतमन्न्वावर्त्ते।।२७।। अग्ग्नेव्व्रतपते। व्व्रतमचारिषन्तदशकन्तन्नमेराधीदमहँय्यऽएवास्मिम्सोस्म्मि।।२८।। (५) अग्ग्नयेकव्व्यवाहनाय। स्वाहासोमायपितृमतेस्वाहा।। अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ।।२९।। येरूपाणि। प्प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति।। परापुरोनिपुरोये भरन्त्यग्ग्निष्ट्टाँल्लोकात्प्रणु दात्त्यस्म्मात्।।३०।। अत्त्रपितरः। अत्त्रपितरोमादयद्ध्वँय्यथा भागमावृषायद्ध्वम्।। अमीमदन्तपितरो यथाभागमावृषायिषत।।३१।। नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायन मोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्न्यवेनमोवःपितरःपितरोनमोवोगृहान्नः पितरोदत्तसतोवःपित रोदेष्म्मैतद्द्वःपितरोव्वासऽआधत्त।।३२।। आधत्त। पितरोगर्ब्भङ् कुमारम्पुष्क्करस्स्रजम्।। यथेहपुरुषोसत्।।३३।। ऊर्ज्जव्वहन्तीः।। ऊर्ज्जव्वहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्स्रुतम्।। स्वधास्त्थतर्प्पयतमेपितॄन् ।।३४।। (६) इतिश्रीवाजसनेयसंहितायां द्वितीयोऽध्यायः।।२।।

श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्। समिधाग्निं, भूर्भुवःस्वश्चतुष्का, वग्निर्ज्योतिर्द्वे, उपप्रयन्तोऽअध्वरꣳषडिवꣳशतिः, भूर्भुवःस्वश्चतस्रो, गृहामातिस्रः, प्रघासिनोहवामहे पञ्च, पूर्णादर्विद्वे,ऽअक्षन्नमीमदन्तषडे, षते सप्त, दश।।१०।। त्रिषष्टिः।।६३।। हरिः ॐ।।

समिधाग्निम्।। समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्।। आस्मिन्हव्याजुहोतन।।१।। सुसमिद्धायशोचिषे। घृतन्तीव्रञ्जुहोतन।। अग्नयेजातवेदसे।।२।। तन्त्वा। समिद्भिरङ्गिरोघृतेन व्वर्द्धयामसि।। बृहच्छोचायविष्ठ्य।।३।। उपत्वा। ग्नेहविष्मतीर्घृताचीर्य्यन्तुहर्य्यत।। जुषस्वसमिधोमम।।४।। (४-१) भूर्भुवः।। भूर्भुवःस्वर्द्यौरिवभूम्नापृथिवीवव्वरिम्णा।। तस्यास्तेपृथिविदेवयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे ।।५।। आयम्।। आयङ्गौःपृश्निरक्रमी दसदन्मातरम्पुरः। पितरञ्चप्रयन्त्स्वः।।६।। अन्तश्चरति। रोचनास्यप्राणादपानती।। व्व्यख्यन्महिषोदिवम्।।७।। त्रिꣳशद्धामत्रिꣳशद्धामव्विराजतिव्वाक्पतङ्गायधीयते।। प्रतिवस्तोरहद्युभिः।।८।। (४-२) अग्निर्ज्योतिः।। अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्यो

ज्योतिर्ज्योतिः सूर्य्यः स्वाहा।। अग्निर्व्वर्च्चोज्योतिर्व्वर्च्चः स्वाहासूर्य्योव्वर्च्चोज्योतिर्व्वर्च्चः
स्वाहा।। ज्योतिः सूर्य्यः सूर्य्योज्योतिः स्वाहा।।९।। सजूर्द्देवेन। सवित्त्रासजूरात्र्येन्द्रवत्त्या।।
जुषाणोऽअग्निर्व्वेतुस्वाहा।। सजूर्द्देवेनसवित्त्रासजूरुष सेन्द्रवत्त्या।। जुषाणः सूर्य्योव्वेतुस्वाहा
।।१०।। (२-३) उपप्प्रयन्तोऽअद्ध्वरम्।। उपप्प्रयन्तो ऽअद्ध्वरम्मन्त्रंव्वोचेमाग्गनये।। आरेऽअस्म्मेच
शृण्ण्वते।।११।। अग्निर्म्मूर्द्धा। दिवः ककुत्त्पतिः पृथिव्व्याऽअयम्।। अपाꣳरेताꣳसिजिन्न्वति
।।१२।। उभावाम्।। उभावामिन्द्राग्ग्नीऽआहुवद्ध्या ऽउभाराधसः सहमादयद्ध्यै।। उभादातारा विषा
ꣳरयीणामुभाव्वाजस्यसातयेहुवेवाम्।।१३।। अयन्ते।। अयन्तेयोनिर्ऋत्त्वियोयतोजातो
ऽअरोचथाः।। तञ्जानन्नग्ग्नऽआरोहाथानोव्वर्द्धयारयिम्।।१४।। अयमिह।
प्प्रथमोधायिधातृभिर्होतायजिष्ट्ठोऽअद्ध्वरेष्ष्वीड्ड्यः।। यमप्प्न वानोभृगवोव्विरुरुचुर्व्वनेषुचित्रं
व्विभ्भ्वंव्विशेविशे।।१५।। अस्यप्प्रत्क्नाम्।। अस्यप्प्रत्क्नामनुद्द्युतः शुक्क्रन्दुदुह्रेऽअह्रयः।।
पयः सहस्स्रसामृषिम्।।१६।। तनूपाऽअग्ग्ने। सितन्न्वम्मेपा

हृयायुर्द्दाऽअग्ग्नेस्यायुर्म्मेदेहिव्वर्च्चोदाऽअग्ग्नेसिव्वर्च्चोमेदेहि।। अग्ग्नेयन्मेतन्न्वाऽऊनन्तन्मऽ आपृण।।१७।। इन्धानास्त्वा। शतꣳहिमाद्द्युमन्तꣳसमिधीमहि।। व्वयस्वन्तोव्वयस्कृतꣳ सहस्वन्तꣳसहस्कृतम्।। अग्ग्नेसपत्न्कदम्भनमदब्धासोऽअदाभ्यम्।। चित्रावसोस्वस्त्तितेपारम शीय।।१८।। सन्त्वम्।। सन्त्वमग्ग्नेसूर्य्यस्यव्वर्च्चसागथाꣳसमृषीणाꣳस्तुतेन।। सम्प्रियेणधाम्न्ना समहमायुषासंव्वर्च्चसासम्प्रजयासꣳरायस्प्पोषेणग्ग्मिषीय।।१९।। अन्धस्त्थ।। अन्धस्त्थान्धोवो भक्षीयमहस्त्थमहोवोभक्षीयोर्ज्जस्त्थोर्ज्जंवोभक्षीयरायस्प्पोषस्त्थरायस्पोषंवोभक्षीय।।२०।।
रेवतीरमद्ध्वम्।। रेवतीरमद्ध्वमस्मिन्न्योनावस्मिन्न्गोष्ट्ठेस्मिँल्लोकेस्मिन्न्क्षये।। इहैवस्त्तमापगात।।२१।। सꣳहितासि। व्विश्श्वरूप्प्यूर्ज्जामाविशगौपत्त्येन।। उपत्त्वाग्ग्नेदिवेदिवे दोषावस्त्तर्द्धियाव्वयम्।। नमोभरन्तऽएमसि।।२२।। राजन्तमद्ध्वराणाम्।। राजन्तमद्ध्व राणाङ्गोपामृतस्यदीदिविम्।। व्वर्द्धमानꣳस्वेदमे।।२३।। सनः।। सनःपितेवसूनवेग्ग्नेसूपायनो भव।। सचस्वानꣳस्वस्त्तये।।२४।। अग्ग्नेत्त्वम्।। अग्ग्नेत्त्वन्नोऽअन्तमऽउतत्त्रातशिवोभवाव्व

रूतथ्य÷।। व्वसुरग्ग्निर्व्वसुश्श्रवाऽअच्छानक्षिद्द्युमत्तमꣳरयिन्दाः।।२५।। तन्त्वा।। तन्त्वाशो
चिष्ठदीदिवꣳसुम्म्नायनूनमीमहेसखिब्भ्यः।। सनोबोधिश्श्रुधीहवमुरुष्ष्याणोऽअघायतः
समस्म्मात्।।२६।। इडऽएहि।। इडऽएह्यदितएहिकाम्म्याऽएत।। मयिवꣳकामधरणम्भूयात्
।।२७।। सोमानꣳस्वरणं। कृणुहिब्ब्रह्म्मणस्प्पते।। कक्षीवन्तँय्यऽऔशिजः।।२८।। योरेवान्।।
योरेवान्न्योऽअमीवहाव्वसुवित्त्पुष्ट्टिवर्द्धनः।। सनꣳसिषक्क्तुयस्त्तुरः।।२९।। मान÷।। मानꣳशꣳ
सोऽअररुषोधूर्त्तिःप्प्रणङ्ग्मर्त्त्यस्य।। रक्षाणोब्ब्रह्म्मणस्प्पते।।३०।। महित्त्रीणाम्।। महित्त्रीणा
मवोस्त्तुद्द्युक्षम्मित्त्रस्यार्य्यम्म्णः।। दुराधर्षव्वरुणस्य।।३१।। नहितेषाम्।। नहितेषाममाचननाद्द्ध्व
सुव्वारणेषु।। ईशेरिपुरघशꣳसः।।३२।। तेहि। पुत्त्रासोऽअदितेꣳप्प्रजीवसेमर्त्त्याय।।
ज्योतिर्य्यच्छन्त्यजस्स्रम्।।३३।। कदाचन। स्त्तरीरसिनेन्द्रसश्च्चसिदाशुषे।। उपोपेन्नुमघवन्भूय
ऽइन्नुतेदानन्देवस्यपृच्च्यते।।३४।। तत्त्सवितुः।। तत्त्सवितुर्व्वरेण्ण्यम्भर्गोदेवस्यधीमहि।।
धियोयोन÷प्प्रचोदयात्।।३५।। शतम्।।१००।। परिते। दूडभोरथोस्म्माँ२।। ऽअश्न्नोतुव्वि

शश्वतं॑ ॥ येन॒रक्ष॑सिदा॒शुषं॑ ॥३६॥ (२६–४) भूर्भुवं॑ ॥ भूर्भुव॒स्स्व॒ सुप्प्र॒जाः प्प्र॒जाभिं॑ स्या

सु॒वीरो॑व्वी॒रैः सु॒पोष॒पोषैं॑ ॥ नर्य्यँ प्प्र॒जाम्मे॑पाहि॒श स्यं॑प॒शून्मे॑पा॒ह्यर्थ्र्य्य॑पि॒तुम्मे॑पाहि ॥३७॥

आग॑न्म। व्वि॒श्वव॑वेदसम॒स्म्मब्भ्यं॑व्वसु॒वित्त॑मम् ॥ अग्ग्ने॑सम्म्राडभि॒द्द्युम्म्नम॒भिसह॒ऽआयं॑च्छस्व

॥३८॥ अ॒यम॒ग्ग्निः ॥ अ॒यम॒ग्ग्निर्गृ॒हप॑ति॒र्ग्गार्हँ॑पत्त्यः प्प्र॒जाया॑व्वसु॒वित्त॑मः ॥ अग्ग्ने॑गृहपते॒

भिद्द्यु॒म्म्नम॒भिसह॒ऽआयं॑च्छस्व ॥३९॥ अ॒यम॒ग्ग्निः ॥ अ॒यम॒ग्ग्निः पु॑री॒ष्ष्यो रयि॒मान्पु॑ष्टि॒वर्द्धनः ।

अग्ग्ने॑ पुरीष्ष्या॒भिद्द्युम्म्नम॒भिसह॒ऽआयं॑च्छस्व ॥४०॥ (४–५) गृ॒हा॒मा। बिं॑भीत॒माव्वे॑पद्ध्व॒मूर्ज्ज॒

म्बिबभ्र॑त॒ ऽएम॑सि ॥ ऊर्ज्ज॒म्बिबभ्र॑द्द्वः सु॒मना॑ सु॒मे॒धागृ॒हानैमि॒मन॑सा॒मोद॑मानः ॥४१॥ येषा॑म॒द्ध्येति॑ ।

प्प्र॒वस॒न्न्येषुं॑सौमन॒सोब॒हुः ॥ गृ॒हानुप॑ह्व्वयामहे॒तेनो॑जानन्तुजान॒तः ॥४२॥ उप॑हूताऽइ॒ह। गाव॒ऽउ

प॑हूताऽ अजा॒वयं॑ ॥ अथो॒ऽअन्न॑स्यकी॒ला॒ल॒ऽउप॑हूतोगृ॒हेषुं॑नः ॥ क्षेमा॑यवः शान्त्यै॒प्प्रप॑द्द्येशि॒वः

श॒ग्ग्मःशँय्योः शँय्योः ॥४३॥ (३–६) प्र॒घा॒सिनो॑हवामहे। म॒रुत॑श्च्चरि॒शाद॑सः ॥

क॒रम्भेण॑स॒जोष॑सः ॥४४॥ यद्द्ग्रामे॑ ॥ यद्दग्रामे॒यदर॑ण्ण्ये॒यत्त्स॒भायाँ॒य्यदि॑न्द्रि॒ये ॥

यदेनश्च्चकृमाव्वयमिदन्त दवंयजामहेस्वाहा।।४५।। मोषूण॑÷।।
मोषूणऽइन्द्रात्त्रपृत्त्सुदेवैरस्त्तिहिष्म्मातेशुष्मिमन्नवयाः।।
महश्चिचद्द्यस्यमीढुषोयव्व्याहविष्म्मतोमरुतोव्वन्दतेगीः।।४६।। अक्क्रन्न्कर्म्म। कर्म्मकृत÷
सहव्वाचामयोभुवा।। देवेब्भ्यःकर्म्मकृत्त्वास्तम्प्रेतसचाभुवः।।४७।। अवभृथनिचुम्पुण। निचेरुर
सिनिचुम्पुणः।। अवदेवै द्द्वैवकृतमेनोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णणोदेवरिषस्प्पाहि।।४८।।
(५–७) पूर्ण्णादर्व्वि।। पूर्ण्णादर्व्विपरापतसुपूर्ण्णापुनरापत। व्वस्न्नेवव्विक्क्रीणा वहाऽइषमूर्ज्जं
शतक्क्रतो।।४९।। देहिमे।। देहिमेददामितेनिमेधेहिनितेदधे।। निहारञ्चहरासिमेनिहारन्निहराणिते
स्वाहा।।५०।। (२–८) अक्षन्नमीमदन्त।। अक्षन्नमीमदन्तह्यवप्प्रिया ऽअधूषत।। अस्त्तोषतस्व
भानवोव्विप्प्रानविष्ठयामतीयोजान्न्विन्द्रतेहरी।।५१।। सुसन्दृशन्त्वा।। सुसन्दृशन्त्वाव्वयम्म
घवन्न्वन्दिषीमहि।। प्रनूनम्पूर्ण्णवन्धुरस्त्तुतोयासिव्वशाँ२।। ऽअनुयोजान्न्विन्द्रतेहरी।।५२।।
मनोनु।। मनोन्न्वाह्वामहेनाराशंसेनस्त्तोमेन।। पितृणाञ्चमन्न्मभिः।।५३।। आन÷।। आनऽ

एतुमनः पुनः क्क्रत्त्वेदक्षायजीवसे।। ज्योक्क्चसूर्य्यंन्दृशे ।।५४।। पुनर्न्नः। पितरोमनोददातु दैव्व्योजनः।। जीवंव्व्रातः सचेमहि।।५५।। व्वयः सोम। व्व्रतेतवमनस्त्तनूषुबिब्भ्रतः।। प्रजावन्तः सचेमहि।।५६।। (६-९) एषते। रुद्द्रेभागः सहस्वस्स्राम्बिक यातज्जुषस्वस्वाहैषतेरुद्द्रेभागऽ आखुस्त्तेपशुः।।५७।। अवरुद्द्रेम्।। अवरुद्द्रेमदीमह्यवदेवन्त्र्यम्बकम्।। यथानोव्वस्यसस्क्करद्द्य थानः श्श्रेयसस्क्करद्द्यथानोव्व्यवसाययात्।।५८।। भेषजमसि। भेषजङ्गवेश्श्वायपुरुषाय भेषजम्।। सुखम्मेषायमेष्ष्यै।।५९।। त्र्यम्बकँय्यजामहे। सुगन्धिम्पुष्ष्टिवर्द्धनम्।। उर्व्वारुक मिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात्।। त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम्।। उर्व्वारुक मिवबन्धनादितोमुक्षीयमामुतः।।६०।। एतत्ते। रुद्द्रोवसन्तेनपरोमूजवतोतीहि।। अवततधन्न्वा पिनाकावसः कृत्तिवासाऽअहिंसन्नः शिवोतीहि ।।६१।। त्र्यायुषञ्जमदग्ग्नेः कश्श्यपस्यत्र्या युषम्।। यद्देवेषुत्र्यायुषन्तन्नोऽअस्त्तुत्र्यायुषम् ।।६२।। शिवोनाम।। शिवोनामासिस्व धितिस्त्तेपितानमस्त्तेऽअस्त्तुमामाहिंसीः।। निर्वर्त्तयाम्म्यायुषेन्नाद्द्यायप्प्रजननायरायस्प्पोषाय

सुप्प्रजास्त्वायसुवीर्य्याय।।६३।। १० ।। (७-१०) इतिश्रीवाजसनेयसंहितायांतृतीयोऽध्यायः ।।३।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। एदंद्वे, महीनाम्पयश्च्चतस्र, आकूत्याऋक्सामयोर्द्विकौ, व्रतंकृणुतषडे,षाते चतस्रो, वस्व्यसितिस्र, एषतेद्वे, शुक्रंत्वाचतस्रो, ऽऽदित्यास्त्वगष्टौ, दश सप्तत्रिꣳशत्।।१०।। ३७ ।। ४ ।। हरिः ॐ।।

एदम्।। एदमगन्मदेवयजनम्पृथिव्व्यायत्रदेवासोऽअजुषन्तव्विश्श्वे।। ऋक्क्सामाब्भ्याꣳ सन्तरन्तोयजुर्ब्भीरायस्प्पोषेणसमिषामदेम।। इमाऽआपꣳशमुमेसन्तुदेवीरोषधेत्त्रायस्वस्वधिते मैनꣳहिꣳसीः।।१।। आपोऽअस्म्मान्।। आपोऽअस्म्मान्मातरꣳशुन्धयन्तुघृतेननोघृतप्प्वꣳपुनन्तु।। व्विश्श्वꣳहिरिप्प्रम्प्रवहन्तिदेवीरुदिदाब्भ्यꣳशुचिरापूतऽएमि।। दीक्षातपसोस्त्तनूरसितान्त्वाशिवाꣳ शग्ग्मामपरिदधेभद्द्रंव्वर्ण्णम्पुष्ष्यन्।।२।। (२-१) महीनाम्पयः।। महीनाम्पयोसिव्वर्च्चोदा ऽअसिव्वर्च्चोमेदेहि।। व्वृत्रस्यासिकनीनकश्च्चक्षुर्द्दाऽअसिचक्षुर्म्मेदेहि।।३।। चित्त्पतिर्म्मा।। चित्त्पतिर्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुनात्त्वच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्म्मिभिः।।

तस्यंतेपवित्त्रपतेपवित्त्रंपूतस्ययत्त्कामंपुनेतच्छंकेयम्।।४।। आवं॒।। आवोदेवासऽईमहेव्वा

मम्प्रंयत्त्यद्धूरे।। आवोदेवासऽआशिषोयज्ञियासोहवामहे।।५।। स्वाहांयज्ञम्।। स्वाहा

यज्ञम्मनंसस्वाहोरोरन्तरिंक्षात्त्स्वाहाद्द्यावांपृथिवीभ्याॅस्वाहाव्वातादारंभेस्वाहां।।६।। (४-२)

आकूंत्त्यैप्प्रयुजें।। आकूंत्त्यैप्प्रयुजेग्ग्नयेस्वाहांमेधायैमनंसेग्ग्नयेस्वाहांदीक्षायैतपंसेग्ग्नयेस्वाहासरं

स्वत्त्यैपूष्णेग्ग्नयेस्वाहां।। आपोदेवीर्बृहतीर्व्विश्श्वशम्भुवोद्द्यावांपृथिवीऽअरोन्तरिक्ष।।

बृहस्प्पतंयेहविषांव्विधेमस्वाहां।।७।। व्विश्श्वोदेवस्यं।। व्विश्श्वोदेवस्यंनेतुर्म्मर्त्तोव्वुरीत

सक्ख्यम्।। व्विश्श्वोरायऽइंषुद्ध्यतिद्द्युम्म्नंव्वृणीतपुष्ष्यसेस्वाहां।।८।। (२-३)

ऋक्क्सामयोंशिल्प्पें।। ऋक्क्सामयोंशिल्प्पेंस्त्थस्त्तेव्वामारंभेतेमांपातमास्ययज्ञस्योदृचं॒।।

शर्म्मांसिशर्म्मंमेयच्छनमंस्त्तेऽअस्त्तुमामांहिंसीं।।९।। ऊर्ग्गंसि।। ऊर्ग्गंस्याङ्गिरस्यूर्णम्म्रदाऽ

ऊर्ज्जंमयिंधेहि।। सोमंस्यनीविरंसिव्विष्णणोंशर्म्मांसिशर्म्मयजंमानस्येन्द्रंस्ययोनिंरसिसुसस्याः

कृषीस्कृंधि।। उच्छ्रंयस्वव्वनस्प्पतऽऊद्ध्वोमांपाह्य्यंहंसऽआस्ययज्ञस्योदृचं॒।।१०।। (२-४)

व्व्रतङ्कृणुत। व्व्रतङ्कृणुताग्ग्निर्ब्ब्रह्म्माग्ग्निर्य्यज्ञोव्वनस्प्पतिर्य्यज्ञियः॥ दैवीन्धियम्मनामहेसुमृडी

कामभिष्ट्टयेव्वर्च्चोधाँय्यज्ञवाहसꣳसुतीर्त्थानोऽअसद्द्वशे॥ येदेवामनोजातामनोयुजोदक्षक्क्रतव

स्त्तेनोवन्तुतेनःपान्तुतेब्भ्यꣳस्वाहा॥११॥ श्वात्त्राऽपीताः॥ श्वात्त्राऽपीताभवतयूयमापो

ऽअस्म्माकमन्तरुदरेसुशेवाः॥ ताऽअस्म्मब्भ्यमयक्ष्माऽअनमीवाऽअनागसꣳ

स्वदन्तुदेवीरमृताऽऋतावृधः॥१२॥ इयन्ते। यज्ञियातनूरपोमुञ्चामिनप्प्रजाम्॥ अꣳहोमुचꣳ

स्वाहाकृताꣳपृथिवीमाविशतपृथिव्व्यासम्भव॥१३॥ अग्नेत्त्वम्॥ अग्नेत्त्वꣳसुजागृहिव्वयꣳ

सुमन्दिषीमहि॥ रक्षाणोऽअप्प्रयुच्छन्न्प्रबुधेनꣳपुनस्कृधि॥१४॥ पुनर्म्मनः॥ पुनर्म्मनꣳपुनरायुर्म्म

ऽआगन्न्पुनःप्प्राणःपुनरात्क्मामऽआगन्न्पुनश्च्चक्षुꣳपुनꣳश्रोत्त्रम्मऽआगन्॥ व्वैश्श्वानरोऽअदब्ब्ध

स्त्तनूपाऽअग्निर्न्नःपातुदुरितादवद्द्यात्॥१५॥ त्वमग्ग्गे। व्व्रतपाऽअसिदेवऽआमर्त्त्येष्ष्वा॥

त्वँय्यज्ञेष्ष्वीड्यः॥ रास्वेयत्त्सोमाभूयोभरदेवोनःसविताव्वसोर्द्दाताव्वस्वदात्॥१६॥ (६-५)

एषाते। शुक्क्रतनूरेतद्द्वर्च्चस्त्तयासम्भवब्भ्राजङ्गच्छ॥ जूरसिधृतामनसाजुष्ट्टाव्विष्ष्णवे॥१७॥

तस्यास्ते। सत्त्यसंवसᳶप्प्रसवेतन्न्वोयन्त्रमशीयस्वाहा।। शुक्क्रमसिचन्द्रमस्यमृतमसिव्वैश्श्व

देवमसि।।१८।। चिदसि। मनासिधीरसिदक्षिणासिक्षत्त्रियासियज्ञियास्यदितिरस्युभयतᳲ

शीर्ष्णी।। सानᳶसुप्प्राचीसुप्प्रतीच्च्येधिमित्त्रस्त्त्वापदिबध्नीताम्पूषाद्ध्वनस्प्पात्त्विन्द्रायाद्ध्यक्षाय

।।१९।। अनुत्त्वा। मातामन्न्यतामनुपितानुब्भ्रातासगब्भ्र्योनुसखासयूत्थ्यᳲ।। सादेविदेव

मच्छेहीन्द्रायसोमᳲरुद्द्रस्त्त्वावर्त्तयतुस्वस्त्तिसोमसखापुनरेहि।।२०।। (४-६) व्वस्व्व्यसि।।

व्वस्व्यस्यदितिरस्यादित्त्यासिरुद्द्रासिचन्द्रासि।। बृहस्प्पतिष्ट्वासुम्म्नेरम्म्णातुरुद्द्रोव्वसुभिराचके

।।२१।। अदित्त्यास्त्त्वा। मूर्द्धन्नाजिघर्म्मिदेवयजनेपृथिव्व्याऽइडायास्प्पदमसिघृतवत्त्स्वाहा।।

अस्म्मेरमस्वास्म्मेतेबन्धुस्त्त्वेरायोमेरायोमाव्वयᳲरायस्प्पोषेणव्वियौष्म्मतोतोरायः।।२२।।

समक्ख्ये। देव्व्याधियासन्दक्षिणयोरुचक्षसा।। मामऽआयुᳶप्प्रमोषीम्मोऽअहन्तवव्वीरं

व्विदेयतवदेविसन्दृशि।।२३।। (३-७) एषते। गायत्त्रोभागऽइतिमेसोमायब्ब्रूतादेषतेत्त्रैष्टु

भोभागऽइतिमेसोमायब्ब्रूतादेषतेजागतोभागऽइतिमेसोमायब्ब्रूताच्छन्दोनामानाᳩसाम्म्राज्ज्यङ्गच्छे

तिमेसोमायब्ब्रूतादास्म्माकोसिशुक्क्रस्त्तेगग्रह्योव्विचितस्त्वाव्विचिन्न्वन्तु।।२४।। अभित्त्यम्।।
अभित्त्यन्देवᳶसवितारमोण्ण्यो꞉कविक्क्रतुमच्चामिसत्त्यसवᳶरत्नधामभिप्प्रियम्मतिङ्कविम्।।
ऊद्ध्वायस्यामतिर्भाऽअदिद्द्युतत्त्सवीमनिहिरण्ण्यपाणिरमिमीतसुक्क्रतु꞉कृपास्व꞉ ।।
प्रजाब्भ्यस्त्त्वाप्प्रजास्त्त्वानुप्प्राणन्तुप्प्रजास्त्त्वमनुप्प्राणिहि।।२५।। (२–८) शुक्क्रन्त्त्वा।
शुक्क्रेणक्क्रीणामिचन्द्रञ्चन्द्रेणामृतममृतेन।। सग्ग्मेतेगोरस्म्मेतेचन्द्राणितपसस्त्तनूरसिप्प्रजापते
र्व्वर्ण्ण꞉परमेणपशुनाक्क्रीयसेसहस्रपोषम्पुषेयम्।।२६।। मित्त्रोन꞉।। मित्त्रोनऽएहिसुमित्त्र
धऽइन्द्रस्योरुमाविशदक्षिणमुशन्नुशन्तᳫस्योनᳬस्योनम्।। स्वानब्भ्राजाङ्घारेबम्भारेहस्त्तसुहस्त्त
कृशानवेतेव꞉सोमक्क्रयणास्त्तान्न्रक्षद्ध्वम्मावोदभन्।।२७।। परिमा। ग्ग्नेदुश्च्चरिताद्बाधस्वामासु
चरितेभज।। उदायुषास्वायुषोदस्त्थाममृताँ२।।ऽअनु।।२८।। प्रतिपन्थाम्।। प्रतिपन्था
मपद्महिस्वस्त्तिगामनेहसम्।। येनव्विश्श्वाᳬपरिद्विषोव्वृणक्क्तिव्विन्दतेव्वसु।।२९।। (४–९)
अदित्त्यास्त्त्वक्।। अदित्त्यास्त्त्वगस्यदित्त्यैसदऽआसीद।। अस्त्तभ्नाद्द्यांव्वृषभोऽअन्तरिक्षम

मिमीतव्व रिमाणम्पृथिव्व्याः।। आसीदद्द्विश्श्वाभुवनानिसम्म्राड्ड्विश्श्वेत्तानिव्वरुणस्य व्व्रतानि।।३०।। व्वनेषुवि।। व्वनेषुव्व्युन्तरिक्षन्ततानव्वाजमर्व्वत्त्सुपयऽउस्रियासु।। हृत्त्सुक्क्रतुंव्वरुणोव्विक्क्ष्वग्ग्निन्दिविसूर्य्यमदधात्त्सोममद्द्रौ।।३१।। सूर्य्यस्यचक्षुः।। सूर्य्यस्यचक्षुरा रोहाग्नेरक्ष्णः कनीनकम्।। यत्रैतशेभिरीयसेब्भ्राजमानोव्विपश्चिचता।।३२।। उस्रावेतम्।। उस्रावेतन्धूर्षाहौयुज्ज्येथामनश्श्रूऽअवीरहणौब्ब्रह्म्मचोदनौ।। स्वस्तियजमानस्यगृहान्न गच्छतम्।।३३।। भद्द्रोमे। सिप्प्रच्च्यवस्वभुवस्प्पतेव्विश्श्वान्नयभिधामानि। मात्त्वापरिपरिणोव्विदन्मात्त्वापरिपन्थिनोव्विदन्मात्त्वाव्वृकाऽअघायवोव्विदन्।। श्येनो भूत्त्वापरापतयजमानस्यगृहान्नगच्छतन्नौसँस्कृतम्।।३४।। नमोमित्त्रस्य।। नमोमित्त्रस्यव्व रुणस्यचक्षसेमहोदेवायतदृतꣳसपर्य्यत।। दूरेदृशेदेवजातायकेतवेदिवस्प्पुत्त्रायसूर्य्यायशꣳसत ।।३५।। व्वरुणस्योत्तम्भनम्।। व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्क्कम्भसर्ज्जनीस्त्थोव्वरुणस्य ऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद।।३६।। याते।। यातेधामा

निहविषायजन्तितातेव्विशश्वापरिभूरस्त्तुयज्ञम्।। गयस्प्फानः प्प्रतरणस्सुवीरोवीरहाप्प्रचरासोम दुर्य्यान्।।३७।। (८-१०) इतिश्रीवाजसनेयसंहितायांचतुर्थोऽध्यायः।।४।। श्रीवेदपुरुषायनमः।।

अनुवाकसूत्रम् अग्ग्नेस्तनू, रापतयेत्वाचतुष्कौ, तप्तायनीमेद्वे, इन्द्रघोषस्त्वास्तिस्रो, युंजतेमनाष्टौ, देवस्यत्वाचतस्रो, देवस्यत्वापंच, विभूरसिचतस्रो, ज्योतिरसि, षड्डुरुव्विष्णोतिस्रो, दश त्रिचत्वारिꣳशत्।। (अ.५ मं.४३-अनु.१०)

हरिःॐ।। अग्ग्नेस्त्तनूः।। अग्ग्नेस्त्तनूरसिव्विष्ण्णवेत्त्वासोमस्यतनूरसिव्विष्ण्णवेत्त्वातिथेरातित्थ्यम सिव्विष्ण्णसिव्विष्ण्णवेत्त्वाश्श्येनायत्त्वासोमभृतेव्विष्ण्णवेत्त्वाग्ग्नयेत्त्वारायस्प्पोषदेव्विष्ण्णवेत्त्वा। ।१।। अग्ग्नेर्ज्जनित्त्रम्।। अग्ग्नेर्ज्जनित्त्रमसिव्वृषणौस्त्थऽउर्व्वश्श्यस्यायुरसिपुरूरवाऽअसि।। गायत्त्रेणत्त्वाच्छन्दसामन्था मित्त्रैष्टुभेनत्त्वाच्छन्दसामन्थामिजागतेनत्त्वाच्छन्दसामन्थामि।।२।। भवतन्नः।। भवतन्नः समनसौसचेतसावरेपसौ।। मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसौशिवौ भवतमद्द्यनः।।३।। अग्ग्नावग्ग्निः।। अग्ग्नावग्ग्निश्च्चरतिप्प्रविष्टऽऋषीणाम्पुत्त्रो

ऽअभिशस्तिपावा।। सनः स्योनः सुयजायजेहदेवेभ्भ्योहव्व्यꣳसदमप्प्रयुच्छन्त्स्वाहा।।४।।

(४-१) आपतयेत्त्वा।। आपतयेत्त्वापरिपतयेगृह्णामितनूनप्त्रेशाक्क्वरायशक्क्वन

ऽओजिष्ठाय।। अनाधृष्टमस्यनाधृष्ष्यन्देवानामोजोनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्न्य

मञ्जसासत्त्यमुपगेषꣳस्वितेमाधाः।।५।।

अग्ग्नेव्व्रतपाः।। अग्ग्नेव्व्रतपास्त्वेव्व्रतपायातवतनूरियꣳसामयियोममतनूरेषासात्त्वयि।।

सहनौव्व्रतपतेव्व्रतान्न्यनुमेदीक्षान्दीक्षापतिर्म्मन्न्यतामनुतपस्तपस्प्पतिः।।६।। अꣳशुरꣳशुष्टे।

देवसोमाप्प्यायतामिन्द्रायैकधनविदे।। आतुब्भ्यमिन्द्रःप्प्यायतामात्त्वमिन्द्रायप्प्यायस्व।।

आप्प्याययास्म्मान्त्सखीन्त्सन्न्यामेधयास्वस्तितेदेवसोमसुत्त्यामशीय।। एष्टारायःप्प्रेषेभगा

यऽऋतमृतवादिब्भ्योनमोद्द्यावापृथिवीब्भ्याम्।।७।। याते।। यातेऽअग्ग्नेयःशयातनूर्व्वर्षिष्ठा

गह्वरेष्ठा।। उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा।। यातेऽअग्ग्नेरजःशयातनू

र्व्वर्षिष्ठागह्वरेष्ठा।। उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा।। यातेऽअग्ग्नेहरिशयातनू

र्व्वर्षिष्ठागह्वरेष्ठा।। उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्त्स्वाहा।। ८।। (४-२)

तप्प्तायनीमे।। तप्प्तायनीमेसिव्वित्तायनीमेस्यवतान्न्मानाथितादवतान्न्माव्यथितात्।।

व्विदेदग्ग्निर्न्नभोनामाग्ग्नेऽअङ्गिरऽआयुनानाम्म्नेहियोस्याम्पृथिव्वयामसियत्तेनाधृष्ट्टन्नामयज्ञियन्ते

नत्त्वादधेव्विदेदग्ग्निर्न्नभोनामाग्ग्नेऽअङ्गिरऽआयुनानाम्म्नेहियोद्द्वितीयस्याम्पृथिव्व्यामसियत्तेना

धृष्ट्टन्नामयज्ञियन्तेनत्त्वादधेव्विदेदग्ग्निर्न्नभोनामाग्ग्नेऽअङ्गिरऽआयुनानाम्म्नेहियस्तृतीयस्याम्पृ

थिव्व्यामसियत्तेनाधृष्ट्टन्नामयज्ञियन्तेनत्त्वादधे।। अनुत्त्वादेववीतये।।९।। सि७ह्यसि।

सपत्नकसाहीदेवेब्भ्यः कल्प्पस्वसि७ह्यसिसपत्नकसाहीदेवेब्भ्यः शुन्धस्वसि७ह्यसिसपत्नकसा

हीदेवेब्भ्यः शुम्भस्व।।१०।। (२-३) इन्द्रघोषस्त्त्वा।। इन्द्रघोषस्त्त्वाव्वसुभिः

पुरस्त्तात्त्पातुप्प्रचेतास्त्त्वारुद्द्रैः पश्च्चात्त्पातुमनोजवास्त्त्वापितृभिर्द्दक्षिणतः पातुव्विश्श्वकर्म्मात्त्वादि

त्त्यैरुत्तरतः पात्त्विदमहन्तप्प्तंव्वार्ब्बहिर्द्धायज्ञान्निःसृजामि।।११।। सि७ह्यसि।। सि७ह्यसिस्वाहा

सि७ह्यस्यादित्त्यवनिःस्वाहासि७ह्यसिब्ब्रह्म्मवनिः क्षत्रवनिःस्वाहासि७ह्यसिसुप्प्रजावनीरायस्प्पो

षवनिःस्वाहासिछह्यस्यावहदेवान्न्यजमानायस्वाहाभूतेब्भ्यस्त्त्वा॥१२॥ ध्रुवोसि।

पृथिवीन्दृꣳहद्ध्रुव क्षिदस्यन्तरिक्षन्दृꣳहाच्च्युतक्षिदसिदिवन्दृꣳहाग्ग्नेःपुरीषमसि॥१३॥ (३–४)

युञ्जतेमनः॥ युञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः॥

व्विहोत्त्रादधेव्वयुनाविदेक ऽइन्न्महीदेवस्यसवितुःपरिष्ष्टुतिःस्वाहा॥१४॥ इदंव्विष्ण्णुः॥

इदंव्विष्ण्णुर्व्विचक्क्रमेत्त्रेधानिदधेपदम्॥ समूढमस्यपाꣳसुरेस्वाहा॥१५॥ इरावतीधेनुमती॥

इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या॥ व्व्यस्क्कब्भ्नारोदसीव्विष्ण्णवेतेदाधर्त्थपृथिवी

मभितोमयूखैःस्वाहा ॥१६॥ देवश्श्रुतौदेवेषु॥ देवश्श्रुतौदेवेष्ष्वाघोषतम्प्राचीप्प्रेतमद्ध्वर

ङ्क्लप्पयन्तीऽऊर्द्ध्वय्यज्ञन्नयतम्माजिह्वरतम्॥ स्वङ्गोष्ष्ठमावदतन्देवीदुर्य्येऽआयुर्म्मानिव्वादिष्ष्टम्प्रजा

म्मानिव्वादिष्टमत्त्ररमेथांव्वर्ष्म्मन्न्पृथिव्व्याः॥१७॥ व्विष्ण्णोर्न्नु। कंव्वीर्य्याणिप्प्रवोचँय्यः

पात्र्थिवानिव्विममेरजाꣳसि॥ योऽअस्क्कभायदुत्तरꣳसधस्त्थंव्विचक्क्रमाणस्त्रेधोरुगायो

व्विष्ण्णवेत्त्वा॥१८॥ दिवोवा। व्विष्ण्णऽउतवापृथिव्व्यामहोवाव्विष्ण्णऽउरोरन्तरिक्षात्॥

उभाहिहस्त्ताव्वसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्व्याद्विष्णवेत्त्वा।।१९।। प्रतत्।।
प्रतद्विष्णुस्त्तवतेव्वीर्य्येणमृगोनभीमः कुचरोगिरिष्ठाः।। यस्योरुषुत्त्रिषुव्विक्क्रमणेष्ष्वधिक्षियन्ति
भुवनानिव्विश्श्वा।।२०।। व्विष्णोरराटम्।। व्विष्णोरराटमसिव्विष्णोः श्श्नप्प्त्रेस्त्थोव्विष्णोः
स्यूरसिव्विष्णोर्द्ध्रुवोसि।। व्वैष्णवमसिव्विष्णवेत्त्वा।।२१।। (८-५) देवस्यत्त्वा।
सवितुः प्प्रसवेशिश्वनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम्।। आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपि
कृन्तामि।। बृहन्नसिबृहद्द्रवाबृहतीमिन्द्रायव्वाचंव्वद ।।२२।। रक्षोहणंव्वलगहनम्।।
रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वलगमुत्त्किरामियम्मे निष्ट्योयममात्त्योनिचखानेदमहन्तं
व्वलगमुत्त्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्तंव्वलगमुत्त्किरामियम्मोसबन्धुर्य्यमसबन्धु
र्न्निचखानेदमहन्तंव्वलगमुत्त्किरामियम्मेसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि।।२३।।
स्वराडसि। सपत्नकहासत्त्रराडस्यभिमातिहाजनराडसिरक्षोहासर्व्वराडस्यमित्त्रहा।।२४।।
रक्षोहणोवः।। रक्षोहणोवोव्वलगहनः प्प्रोक्षामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोवनयामिव्वैष्णव

वान्न्रक्षोहणोवोव्वलगहनोवस्तृणामिव्वैष्णवान्न्रक्षोहणौवांव्वलगहनाऽउपदधामिव्वैष्णवीरक्षो
हणौवांव्वलगहनौपर्य्यूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्त्थ॥२५॥ (४-६)
देवस्यत्त्वा। सवितुः प्प्रसवेशिवनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम्॥ आददेनार्य्यसीदमहꣳ
रक्षसाङ्ग्रीवाऽअपिकृन्तामि॥ यवोसियवयास्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्व्यैत्त्वा
शुन्धन्ताँल्लोकाः पितृषददनाः पितृषदनमसि॥२६॥ उद्दिवम्॥ उद्दिव꣹स्तभानान्तरिक्षम्पृणदृꣳ
हस्वपृथिव्व्यान्द्युतानस्त्त्वामारुतोमिनोतुमित्त्रावरुणौद्ध्रुवेणधर्म्मणा॥ ब्रह्म्मवनित्त्वाक्षत्त्र
वनिरायस्प्पोषवनिपर्य्यूहामि॥ ब्रह्म्मदृꣳहक्षत्त्रन्दृꣳहायुर्द्दृꣳहप्प्रजान्दृꣳह ॥२७॥ ध्रुवासि॥
ध्रुवोयँय्यजमानोस्स्मिन्नायतनेप्प्रजयापशुभिर्ब्भूयात्॥ घृतेनद्द्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिर
सिव्विश्श्वजनस्यच्छाया॥२८॥ परित्त्वा। गिर्व्वणोगिरऽइमाभवन्तुव्विश्श्वतः॥
व्वृद्धायुमनुवृद्धयोजुष्ट्टाभवन्तुजुष्ट्टयः॥२९॥ इन्द्रस्यस्यूः॥ इन्द्रस्यस्यूरसीन्द्रस्यद्ध्रुवोसि॥
ऐन्द्रमसिव्वैश्श्वदेवमसि॥३०॥ (५-७) व्विभूरसि॥ प्प्रवाहणोव्वह्निरसिहव्व्यवाहनः॥

श्वात्रोसिप्प्रचेतास्तुथोसिव्विश्श्ववेदाऽउशिगसि।।३१।। उशिगसि। कविरङ्गारिरसिबम्भारिर

वस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः सम्म्राडसिकृशानुः परिषद्द्यौसिपवमानोनभौसिप्प्रत

क्क्वामृष्ट्टोसिहव्व्यसूदनऽऋतधामासिस्वर्ज्ज्योतिः समुद्द्रोसि।।३२।। समुद्द्रोसि।

व्विश्श्वव्व्यचाऽअजोस्येकपादहिरसिबुध्न्न्योव्वागस्यैन्द्रमसिसदोस्यृतस्यद्द्वारौमामासन्ताप्प्तमद्ध्व

नामद्ध्वपतेप्प्रमातिरस्वस्तिमेस्मिन्न्पथिदेवयानेभूयान्न्मित्त्रस्यमा।।३३।। मित्त्रस्यमा।।

मित्त्रस्यमाचक्षुषेक्षद्ध्वमग्ग्नयः सगराः सगरास्त्थसगरेणनाम्म्नारौद्द्रेणानीकेनपातमाग्ग्नयः

पिपृतमाग्ग्नयोगोपायतमानमोवोस्तुमामाहिंसिष्ट।।३४।।

(४-८) ज्योतिरसि। व्विश्श्वरूपंव्विश्श्वेषान्देवानांसमित्।। त्वꣳसोमतनूकृद्ध्भ्योद्द्वेषोब्भ्योन्न्य

कृतेब्भ्यऽउरुयन्तासिव्वरूथꣳस्वाहाजुषाणोऽअप्प्तुराज्ज्यस्यव्वेतुस्वाहा।।३५।। शतम्।।२००।।

अग्ग्नेनय। सुपथारायेऽअस्म्मान्न्विश्श्वानिदेवव्वयुनानिव्विद्द्वान्।। युयोद्ध्य्यस्म्मज्जुहुराणमेनो

भूयिष्ट्ठान्तेनमऽउक्क्तिंव्विधेम।।३६।। अयन्नः।। अयन्नोऽअग्ग्निर्व्वरिवस्कृणोत्त्वयम्मृधः

पुरऽएंतुप्प्रभिन्दन्।। अयंव्वाजाञ्जयतुव्वाजंसातावयꣳशत्रूञ्जयतुजर्ह्हषाणꣳस्वाहा।।३७।।

उरुव्विंष्णणे।। उरुव्विंष्णोव्विक्क्रमस्वोरुक्षयायनस्कृधि।। घृङ्घृंतयोनेपिबप्प्रप्प्रंयज्ञपंतिन्तिर

स्वाहा।।३८।। देवंसवितः।। देवंसवितरेषतेसोमस्तꣳरंक्षस्वमात्त्वादभन्।। एतत्त्वन्देंवसोमदेवोदेवाँ

२।। ऽउपांगाऽइदमहम्मंनुष्य्यान्त्सहरायस्प्पोषैंणस्वाहानिर्व्वरुंणस्यंपाशान्म्मुच्च्ये।।३९।।

अग्ग्नेव्व्रतपाः।। अग्ग्नेव्व्रतपास्त्वेव्व्रंतपायातवंतनूर्म्मय्यभूंदेषासात्त्वयियोममंतनूस्त्वय्यभूंदियꣳ

सामयिं।। यथायथन्नौव्व्रतपतेव्व्रतान्न्यनुंमेदीक्षान्दीक्षापंतिरमꣳस्तानुतपस्त्तपंस्प्पतिः।।४०।।

(६-९) उरुव्विंष्णणो।। उरुव्विंष्णणोव्विक्क्रमस्वोरुक्षयायनस्कृधि।। घृतङ्घृंतयोनेपिब

प्प्रप्प्रंयज्ञपंतिन्तिरस्वाहा।।४१।। अत्त्यन्न्यान्।। अत्त्यन्न्याँ २।। ऽअगान्नान्न्याँ २।। ऽउपांगाम

र्व्वाक्क्त्वापरेब्भ्योविंदम्परोवंरेब्भ्यः।। तन्त्वांजुषामहेदेवव्वनस्प्पतेदेवयज्ज्यायैदेवास्त्वांदेव

यज्ज्यायैंजुषन्तांव्विष्णणवेत्त्वा।। ओषंधेत्त्रायंस्वस्वधिंतेमैनꣳहिꣳसीः।।४२।। द्याम्मा।। द्याम्मा

लेंखीरन्तरिंक्षम्माहिंꣳसीःपृथिव्व्यासम्भंव।। अयꣳहित्त्वास्वधिंतिस्त्तेतिंजानꣳप्प्राणिनायंमहते

सौभंगाय।। अतस्त्वन्देंवव्वनस्प्पतेशतवंल्शोव्विरोंहसहस्रंवल्शाव्विवयꣳरुंहेम ।।४३।। (३-१०।))।। इति श्रीवाजसनेयसंहितायां पंचमोऽध्यायः।।५।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।।

देवस्यत्त्वाषड्, पावीरसिपंच, माहिःषट्, संतेतिस्रः, समुद्रंगच्छ, हविष्मतीरिमाद्विकौ, हृदेत्वापंच, देवस्यत्वाष्टौ, अष्टौ, सप्तत्रिꣳशत्।। (अ.६ मं. ३७ अनु. ८) हरिः ॐ।।

देवस्यंत्त्वा। सवितुः प्प्रंसवेशिवनोंब्बाहुभ्यांम्पूष्णणोहस्त्ताभ्याम्।। आदंदेनार्य्यसीदमहꣳ रक्षंसाङ्गीवाऽअपिंकृन्तामि।। यवोंसियवयास्म्मद्द्वेषोंयवयारांतीर्द्दिवेत्त्वान्तरिंक्षायत्त्वा पृथिव्यैत्त्वाशुन्धंन्ताँल्लोकाःपिंतृषदंनाःपितृषदंनमसि।।१।। अग्ग्रेणीरंसि। स्वावेशऽउंन्नेतृणा मेतस्यंव्वित्तादधिंत्त्वास्त्थास्यतिदेवस्त्वांसवितामद्ध्वांनक्तु सुपिप्पलाभ्यस्त्वौषंधीभ्यः।। द्यामग्ग्रेणास्पृक्षऽआन्तरिंक्षम्मद्ध्येनाप्प्राःपृथिवीमुपरेणादृꣳहीः।।२।। यातेंयातेधामांन्न्युश्म्मसिगमंद्ध्यैयत्रगावोभूरिंशृङ्गाऽअयासंः।। अत्राहतदुंरुगायस्यव्विष्णणोंःपरमम्पदमवंभारिभूरिं।। ब्रह्म्मवनिंत्त्वाक्षत्रवनिंरायस्प्पोषवनिपर्य्यूंहामि।। ब्रह्म्मंदृꣳहक्षत्रन्दृꣳहायुंर्दृꣳहप्प्रजान्दृंꣳह।।३।।

व्विष्ण्णोःकर्म्माणि। पशश्यतयतोव्व्रतानिपस्प्पशे।। इन्द्रस्यऽयुज्ज्यःसखा।।४।। तार्द्विष्ण्णोः।

परमम्पदꣳसदापशश्यन्तिसूरयः।। दिवीवचक्षुराततम्।।५।। परिवीरसि।। परिवीरसिपरित्त्वा

दैवीर्व्विशोव्व्ययन्ताम्परीमँय्यजमानꣳरायोमनुष्ष्याणाम्।। दिवःसूनुरस्येषतेपृथिव्व्याँल्लोकऽ

आरण्ण्यस्तेपशुः।।६।। (६-१) उपावीरसि।। उपावीरस्युपदेवान्दैवीर्व्विशःप्प्रागुरुशिजोव्व

ह्निनतमान्।। देवत्त्वष्ट्टर्व्वसुरमहव्व्यातेस्वदन्ताम्।।७।। रेवतीरमद्धम्।। रेवतीरमद्धम्बृहस्प्पते

धारयाव्वसूनि।। ऋतस्यत्त्वादेवहविःपाशेनप्प्रतिमुञ्चामिधर्षामानुषः।।८।। देवस्यत्त्वा।

सवितुःप्प्रसवेशिवनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्ताब्भ्याम्।। अग्ग्नीषोमाब्भ्याञ्जुष्टन्नियुनज्मि।।

अद्ब्भ्यस्त्वौषधीब्भ्योनुत्त्वामातामन्न्यतामनुपितानुब्भ्रातासगब्भ्योनुसखासयूत्थ्यः।। अग्ग्नीषोमा

ब्भ्यान्त्वाजुष्टम्प्रोक्षामि।।९।। अपाम्पेरुः।। अपाम्पेरुरस्यापोदेवीःस्वदन्तुस्वात्तञ्चित्तसद्देवहविः।।

सन्तोप्प्राणोव्वातेनगच्छताꣳसमङ्गानियजत्त्रैःसँय्यज्ज्ञपतिराशिषा।।१०।। घृतेनाक्क्तौ।

पशूँस्त्रायेथाꣳरेवतियजमानेप्प्रियन्धाऽआविश।। उरोरन्तरिक्षात्सजूर्देवेनव्वातेनास्यहविषस्त्मना

यजसमंस्यतन्न्वाभव।। व्वर्षोव्वर्षीयसियज्ञेयज्ञपतिन्धाःस्वाहादेवेब्भ्योदेवेब्भ्यःस्वाहा।।११।।
(५-२) माहिं॰।। माहिंर्ब्भूर्म्मापृदाकुर्न्नमस्त्तऽआतानानर्व्वाप्प्रेहिं।। घृतस्यंकुल्ल्याऽ
उपंऽऋतस्यपत्थ्याऽनु।।१२।। देवीरापः। शुद्धाव्वोंइद्व्वङ्सुपंरिविष्ट्टादेवेषुसुपरिविष्ट्टाव्व
यम्पंरिवेष्ट्टारोंभूयास्म्म।।१३।। व्वाचंन्ते।। व्वाचंन्तेशुन्धामिप्प्राणन्तेंशुन्धामिचक्षुंस्त्तेशुन्धामि
श्रोत्त्रंन्तेशुन्धामिनाभिंन्तेशुन्धामिमेड्ढ्रंन्तेशुन्धामिपायुन्तेंशुन्धामिचरित्त्राँस्त्तेशुन्धामि।।१४।।
मनंस्त्ते।। मनंस्त्तऽआप्प्यायतांव्वाक्त्रऽआप्प्यायताम्प्राणस्त्तऽआप्प्यायताञ्चक्षुंस्त्तऽ
आप्प्यायताᳫश्रोत्त्रंन्तऽआप्प्यायताम्।। यत्तेंक्क्रूरँय्यदास्त्थितन्तत्तऽआप्प्यायतान्निष्ट्ट्यायं
तान्तत्तेशुद्ध्यतुशमहोंब्भ्यः।। ओषंधेत्त्रायंस्वस्वधिंतेमैनंङ्हिङ्सीः।।१५।। रक्षसाम्भागः।।
रक्षंसाम्भागोऽसिनिरंस्त्तᳬरक्षंऽइदमहङ्रक्षंऽइदमहङ्रक्षोभितिंष्ट्ठामीदमहङ्रक्षोवंबाधऽइदमहङ्रक्षोध
मन्तमोंनयामि।। घृतेनंद्द्यावापृथिवीप्प्रोर्णुवाथांव्वायोव्वेस्त्तोकानांमग्ग्निराज्ज्यंस्यव्वेतुस्वाहा
स्वाहांकृतेऽऊर्द्ध्वनंभसम्मारुतङ्गंच्छतम्।।१६।। इदमांपः।। इदमांपःप्प्रवंहतावद्द्यञ्चमलंञ्चयत्।।

यच्चाभिदुद्रोहानृतँय्यच्चशेपेऽअभीरुणम्।। आपोमातस्म्मादेनस॑ल्पवमानश्च्चमुञ्चतु।।१७।। (६–३) सन्ते।। सन्तेमनोमनसासम्प्राणःप्प्राणेनगच्छताम्।। रेडस्यग्निष्ट्वाश्र्श्रीणात्त्वापस्त्त्वा समरिणन्न्वातस्यत्त्वाद्ध्राज्यैपूष्ण्णोरह्याऊष्म्मणोव्व्यथिषत्त्प्रयुतन्द्वेषः।।१८।। घृतङ्घृतपावानः। घृतङ्घृतपावानःपिबतव्वसाव्वसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा।। दिशःप्प्रदिशऽ आदिशोव्विदिशऽउद्दिशोदिग्भ्यः स्वाहा।।१९।। ऐन्द्रःप्प्राणः।। ऐन्द्रःप्प्राणोऽअङ्गेऽअङ्गे निदीद्ध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गेनिधीतः।। देवत्त्वष्टर्ब्भूरितेसंसमेतुसलक्ष्मायद्विषुरूपम्भवाति ।। देवत्त्रायन्तमवसेसखायोनुत्त्वामातापितरोमदन्तु।।२०।। (३–४) समुद्द्रङ्गच्छ।। समुद्द्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवसवितारङ्गच्छस्वाहामित्त्रावरुणौगच्छस्वाहाहोरात्त्रेगच्छ स्वाहाच्छन्दासिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्व्यन्नभो गच्छस्वाहाग्निंव्वैश्श्वानरङ्गच्छस्वाहामनोमेहार्द्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्ज्योतिःपृथिवी म्भस्म्मनापृणस्वाहा।।२१।। मापः।। मापोमौषधीर्हिसीर्द्धाम्म्नोधाम्म्नोराजँस्त्ततोव्वरुणनोमुञ्च।।

यदाहुरग्घ्न्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च।। सुमित्त्रियानऽआपऽओषधयःसन्तु

दुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः।।२२।। (२–५) हविष्म्मतीरिमाः।।

हविष्म्मतीरिमाऽआपोहविष्म्माँ२।। ऽआविवासति। हविष्म्मान्देवोऽअद्ध्वरोहविष्म्माँ२।।

ऽअस्त्तुसूर्य्यः।।२३।। अग्ग्नेर्व्वः।। अग्ग्नेर्व्वोपन्नगृहस्यसदसिसादयामीन्द्राग्ग्न्योर्ब्भागधेयीस्त्थ

मित्त्रावरुणयोर्ब्भागधेयीस्त्थव्विश्श्वेषान्देवानाम्भागधेयीस्त्थ।। अमूर्व्याऽउपसूर्य्येयाभिर्व्वा

सूर्य्यःसह।। तानोहिन्न्वन्त्वद्ध्वरम्।।२४।। (२–६) हृदेत्त्वा।। हृदेत्त्वामनसेत्त्वादिवेत्त्वा

सूर्य्यायत्त्वा।। ऊर्द्ध्वमिममद्ध्वरन्दिविदेवेषुहोत्त्रायच्छ।।२५।। सोमराजन्।। सोमराज

न्न्विश्श्वास्त्त्वम्प्रजाऽउपावरोहव्विश्श्वास्त्त्वाँम्प्रजाऽउपावरोहन्तु।। शृणोत्त्वग्ग्निःसमिधाहवम्मे

शृण्वन्त्वापोधिषणाश्च्चदेवीः।। श्रोताग्ग्रावाणोव्विदुषोनयज्ञꣳशृणोतुदेवःसविता हवम्मेस्वाहा

।।२६।। देवीरापः।। देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्य ऽइन्द्रियावान्नमदिन्तमः।।

तन्देवेब्भ्योदेवत्त्रादत्तशुक्क्रपेब्भ्योयेषाम्भागस्त्थस्वाहा।।२७।। कार्षिरसि।।

कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि।। समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः।।२८।।

यमग्ग्ने।। यमग्ग्नेपृत्त्सुमर्त्त्यमवाव्वाजेषुयञ्जुनाः।। सयन्ताशश्श्वतीरिषःस्वाहा।।२९।। (५-७)

देवस्यत्त्वा।। देवस्यत्त्वासवितुःप्प्रसवेशिश्वनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्।।

आददेरावासिगभीरमिममद्ध्वरङ्कृधीन्द्रायसुषूतमम्।। उत्तमेनपविनोर्ज्जस्वन्तम्मधुमन्तम्पयस्वन्तं

निग्ग्राब्भ्यास्त्थदेवश्श्रुतस्त्तर्प्पयतमामनोमे।।३०।। मनोमे। तर्प्पयतव्वाचम्मेतर्प्पयतप्प्राणम्मे

तर्प्पयतचक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मेतर्प्पयतात्त्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्म्मेतर्प्पयतगणा

न्म्मेतर्प्पयतगणामेमाव्वितृषन्।।३१।। इन्द्रायत्त्वा।। इन्द्रायत्त्वाव्वसुमतेरुद्रवतऽइन्द्रायत्त्वादित्त्यवत

ऽइन्द्रायत्त्वाभिमातिग्घ्ने।। श्येनायत्त्वासोमभृतेग्ग्नयेत्त्वारायस्प्पोषदे।।३२।। यत्ते।

सोमदिविज्ज्योतिर्य्यत्त्पृथिव्व्याँय्यदुरावन्तरिक्षे। तेनास्म्मैयजमानायोरुरायेकृद्ध्यधिदात्रेव्वोचः

।।३३।। श्वात्त्रास्त्थ।। श्वात्त्रास्त्थव्वृत्रतुरोराधोगूर्त्ताऽअमृतस्यपत्नीः।। तादेवीर्द्देवत्त्रे

मँय्यज्ञन्नयतोपहूताःसोमस्यपिबत।।३४।। माभेः।। माभेर्म्मासंविक्क्थाऽऊर्ज्जन्धत्स्वधिषणेव्वी

इ्वीसतीव्वींडयेथामूर्ज्जन्दधाथाम्।। पाप्म्माहतोनसोमं॑।।३५।। प्रागपाक्।।
प्रागपागुदगधराक्क्सर्व्वतस्त्त्वादिशऽआधावन्तु।। अम्बनिष्प्परसमरीव्विदाम्।।३६ ।। त्वमङ्ग।।
त्वमङ्गप्प्रशꣳसिषोदेवꣳशविष्ठमर्त्त्यम्।। नत्त्वदन्न्योमघवन्नस्त्तिमर्ड्डितेन्द्रब्ब्रवीमितेव्वचं॑।।३७।।
(८-८) इति श्रीवाजसनेयसंहितायां षष्ठोऽध्यायः।।६।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।।
व्वाचस्पतयेत्रिवो, पयामगृहीतोसित्रिका, वायोद्विका, यंव्वांद्विको, यावामेका, तंप्रत्नकथाचतस्रो, ऽयंव्वेनस्त्रिका, येदेवासस्त्रिका, इन्द्राय मूर्द्धानंद्विकौ, यस्तएका, प्राणायमे तिस्रो, मधवऽएकेन्द्राग्नीऽआगतमेका, घैको, मासऽएका, विश्वेदेवासऽआगतऽएके, न्द्रमरुत्वऽएका, मरुत्वन्तंवृषभमेका, मरुतान्त्वा, सजोषाऽइन्द्रऽएका, मरुत्वाँ२।। ऽइन्द्रऽएका, महाँ२।। ऽइन्द्रऽएका, महाँ २।। ऽइन्द्रऽएको, दुत्यमष्टौपंचविꣳशतिरष्टाचत्वारिꣳशत् (अ. ७ मं. ४८ अनु. २५) हरिः ॐ।।
व्वाचस्प्पतयेपवस्वव्वृष्णोऽअꣳशुब्भ्याङ्गभस्त्तिपूतः।। देवोदेवेब्भ्यं॑पवस्वयेषाम्भागोसि।।१।।

मधुमतीर्न्नः।। मधुमतीर्न्नऽइषस्कृधियत्तेसोमादाब्भ्यन्नामजागृवितस्म्मैतेसोमसोमायस्वाहा स्वाहोर्व्वन्तरिक्षमन्न्वेमिस्वाङ्कृतोसि।।२।। स्वाङ्कृतोसि। व्विश्श्वेब्भ्यऽइन्द्रियेब्भ्योदिव्व्येब्भ्यः पार्त्थिवेब्भ्योमनस्त्त्वाष्टुस्वाहात्त्वासुभवसूर्य्यायदेवेब्भ्यस्त्त्वामरीचिपेब्भ्योदेवाᳫंशोयस्म्मैत्त्वेडेतत्त सत्त्यमुपरिप्प्रुताभङ्गेनहतोसौफट्ट्प्राणायत्त्वाव्व्यानायत्त्वा।।३।। (३-१) उपयामगृहीतोसि।। उपयामगृहीतोस्यन्तर्य्यच्छमघवन्पाहिसोमम्।। उरुष्ष्यरायऽएषोयजस्व।।४।। अन्तस्त्ते।। अन्तस्त्तेद्द्यावापृथिवीदधाम्म्यन्तर्द्दधाम्म्युर्व्वन्तरिक्षम्।। सजूर्द्देवेभिरवरैःपरैश्च्चान्तर्य्यामेमघवन्मादयस्व।।५।। स्वाङ्कृतोसि।। स्वाङ्कृतोसिव्विश्श्वेब्भ्यऽइन्द्रियेब्भ्योदिव्व्येब्भ्यः पार्त्थिवेब्भ्योमनस्त्त्वाष्टुस्वाहात्त्वासुभवसूर्य्यायदेवेब्भ्यस्त्त्वामरीचिपेब्भ्यऽउदानायत्त्वा।।६।। (३-२) आवायो।। आवायो भूषशुचिपाऽउपनःसहस्स्रन्तेनियुतोव्विश्श्ववार।। उपोतेऽअन्धोमद्यमयामियस्यदेवदधिषेपूर्व्वपेयंव्वायवेत्त्वा।।७।। इन्द्रवायूऽइमे। सुताऽउपप्प्रयोभिरागतम्।। इन्दवोवामुशन्तिहि।। उपयामगृहीतोसिव्वायवऽइन्द्रवायुब्भ्यान्त्वैषतेयोनिःसजोषोब्भ्यान्त्वा

।।८।। (२–३) अयंव्वाम्।। अयंव्वाम्मित्रावरुणासुतꣳसोमऽऋतावृधा।। म मेदिहश्र्श्रुतꣳहवम्।।
उपयामगृहीतोसिमित्रावरुणाब्भ्यान्त्वा।।९।। रायाव्वयम्।। रायाव्वयꣳससवाꣳसोमदेमहव्व्येन
देवायवसेनगावः।। तान्धेनुम्मित्रावरुणायुवन्नोव्विश्श्वाहाधत्तमनपस्फुरन्तीमेषतेयोनिर्ऋतायु
ब्भ्यान्त्वा।।१०।। (२–४) यावाम्।। यावाङ्कशामधुमत्त्यश्श्विनासूनृतावती।। तयायज्ञम्मि
मिक्षतम्।। उपयागृहीतोस्यश्श्विब्भ्यान्त्वैषतेयोनिर्म्माद्ध्वीब्भ्यान्त्वा।।११।। (१–५) तम्प्रत्नकथा।
पूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम्।। प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्ज
यन्तमनुयासुव्वर्द्धसे।। उपयामगृहीतोसिशण्डायत्त्वैषतेयोनिर्व्वीरताम्पाह्यपमृष्टꣳशण्डोदेवा
स्त्त्वाशुक्क्रपाꣳप्प्रणयन्त्वनाधृष्टासि।।१२।। सुवीरोव्वीरान्।। सुवीरोव्वीरान्प्प्रजनयन्परीह्य
भिरायस्प्पोषेणयजमानम्।। सञ्जग्ग्मानोदिवापृथिव्व्याशुक्क्रꣳशुक्क्रशोचिषानिरस्तꣳशण्डः
शुक्क्रस्याधिष्ठानमसि।।१३।। अच्छिन्नस्यते। देवसोमसुवीर्य्यस्यरायस्प्पोषस्यददितारः स्याम।।
साप्प्रथमासꣳस्कृतिर्व्विश्श्ववारासप्प्रथमोव्वरुणोमित्त्रोऽअग्ग्निꣳ।।१४।। सप्प्रथमꣳ।।

सप्प्रथमोबृहस्प्पतिश्चिकित्वाँस्तस्म्माऽइन्द्रायसुतमाजुहोतस्वाहा।। तृम्पन्तुहोत्रामद्धोयाः
स्विष्ट्टायाःसुप्प्रीताःसुहुतायत्त्स्वाहायाऽग्नीत्।।१५।। (४-६) अयंव्वेनः।। अयंव्वेन
श्च्चोदयत्त्पृश्निगब्भार्ज्ज्योतिर्ज्जरायूरजसोव्विमाने।। इममपाᳶसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामति
भीरिहन्ति।। उपयामगृहीतोसिमक्कर्कायत्त्वा।।१६।। मनोन। येषुहवनेषुतिग्मंव्विपः
शच्च्याव्वनुथोद्द्रवन्ता।। आयःशय्र्याभिस्तुविनृम्म्णोऽअस्याश्श्रीणीतादिशङ्गभस्त्तावेषतेयोनिः
प्प्रजाःपाह्यपमृष्ट्टोमक्कर्कोदेवास्त्त्वामन्थिपाःप्प्रणयन्त्वनाधृष्टासि।।१७।। सुप्प्रजाः। प्प्रजाः
प्प्रजनयन्न्परीह्यभिरायस्प्पोषेणयजमानम्।। सञ्जग्ग्मानोदिवापृथिव्व्यामन्थीमन्थिशोचि
षानिरस्त्तोमक्कर्कोमन्थिनोधिष्ट्टानमसि।।१८।। (३-७) येदेवासः।। येदेवासोदिव्व्येकादशस्त्थ
पृथिव्व्यामध्येकादशस्त्थ।। अप्प्सुक्षितोमहिनैकादशस्त्थतेदेवासोयज्ञमिमञ्ज्जुषद्ध्वम्।।१९।।
उपयामगृहीतोसि।। उपयामगृहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणःपाहियज्ञम्पाहियज्ञपतिं
व्विष्णुस्त्त्वामिन्द्रियेणपातुव्विष्णुन्त्वम्पाह्यभिसवनानिपाहि।।२०।। सोमःपवते।। सोमःपव

तेसो॒म॑ ॑पवते॒स्म्मै॒ब्ब्रह्म्म॑णे॒स्म्मै॒क्षत्त्रा॑यास्म्मै॒सु॑न्न्वते॒यज॑मानायपवतऽइ॒षऽऊ॒र्ज्जे॒प॑वते॒द्द्भ्यऽओष॑धी

भ्भ्य॒ःपवते॒द्यावा॑पृथि॒वीभ्भ्या॑म्पवतेसुभू॒ताय॑पवते॒व्विश्श्वे॑भ्भ्यस्त्वादे॒वेभ्भ्य॑ऽए॒षते॒योनि॒र्व्विश्श्वे॑

भ्भ्यस्त्वादे॒वेभ्भ्य॑ ॑।।२१।। (३-८) उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाबृ॒हद्द्व॑ते॒व्वय॑स्वतऽउक्क्थाव्व्यं॒

ङ्गृह्णामि।। यत्त॑ऽइन्द्रबृ॒हद्द्व॒यस्त्तस्म्मै॑त्त्वा॒व्विष्ण॑वेत्त्वै॒षते॒योनि॑रु॒क्क्थेभ्भ्य॑स्त्वादे॒वेभ्भ्य॑स्त्वादे॒वा

व्व्यँ॒य्य॒ज्ञस्या॒यु॑षेगृह्णामिमि॒त्त्रावरु॑णाभ्भ्यान्त्वा।।२२।। मि॒त्त्रावरु॑णाभ्भ्यान्त्वा। देवा॒व्व्यँ॒य्य॒

ज्ञस्या॒यु॑षेगृह्णा॒मीन्द्रा॑यत्त्वादेवा॒व्व्यँ॒य्य॒ज्ञस्यायु॑षेगृह्णमीन्द्रा॒ग्ग्निभ्भ्या॑न्त्वादेवा॒व्व्यँ॒य्य॒ज्ञस्यायु॑षे

गृह्णा॒मीन्द्रा॒वरु॑णाभ्भ्यान्त्वादेवा॒व्व्यँ॒य्य॒ज्ञस्यायु॑षेगृह्णा॒मीन्द्रा॒बृह॒स्प्पति॑भ्भ्यान्त्वादेवा॒व्व्यँ॒य्य॒

ज्ञस्यायु॑षेगृह्णा॒मीन्द्रा॒विष्णु॑भ्भ्यान्त्वादेवा॒व्व्यँ॒य्य॒ज्ञस्यायु॑षेगृह्णामि।।२३।।(२-९)

मू॒र्द्धान॑न्दि॒वः।। मू॒र्द्धान॑न्दि॒वोऽअ॑रतिम्पृ॑थि॒व्व्याव्वै॑श्श्वान॒रमृ॒तऽआजा॒तम॒ग्ग्निम्।। क॒विꣳसम्म्राज॒म

ति॑थि॒ञ्जना॑नामा॒सन्नापात्त्रञ्जनयन्तदे॒वाः।।२४।। उ॒प॒या॒मगृ॑हीतोसि। द्ध्रु॒वो॒सिद्ध्रु॒व

क्षि॑तिर्द्ध्रु॒वाणा॑न्ध्रु॒वत॒मोच्च्यु॑तानामच्च्युत॒क्षित्त॑मऽए॒षते॒योनि॑र्व्वैश्श्वान॒राय॑त्त्वा।। ध्रु॒वन्ध्रु॒वेण॒

मनसाव्वाचासोममवनयामि।।अथानऽइन्द्रऽइद्द्विशोसपत्नाऽसमनसस्क्करत्।।२५।। (२-१०)

यस्त्तेद्रप्प्सस्क्कन्दतियस्त्तेऽअदशुग्ग्रावच्च्युतोधिषणयोरुपस्त्थात्।। अद्ध्वर्य्योर्वापरिवाय:

पवित्त्रात्तन्तेजुहोमिमनसाव्वषट्कृतऽस्वाहादेवानामुत्क्रमणमसि।।२६।। (१-११) प्राणायमे।

व्वर्च्चोदाव्वर्च्चसेपवस्वव्व्यानायमेव्वर्च्चोदाव्वर्च्चसेपवस्वोदानायमेव्वर्च्चोदाव्वर्च्चसेपवस्व

व्वाचेमेव्वर्च्चोदाव्वर्च्चसेपवस्वक्क्रतूदक्षाब्भ्याम्मेव्वर्च्चोदाव्वर्च्चसेपवस्वश्श्रोत्त्रायमेव्वर्च्चो

दाव्वर्च्चसेपवस्वचक्षुब्भ्र्याम्मेव्वर्च्चोदसौव्वर्च्चसेपवेथमात्क्मनेमे।।२७।। आत्क्मनेमे।

व्वर्च्चोदाव्वर्च्चसेपवस्वौजसेमेव्वर्च्चोदाव्वर्च्चसेपवस्वायुषेमेव्वर्च्चोदाव्वर्च्चसेपवस्वव्विश्श्वा

ब्भ्योमेप्प्रजाब्भ्योव्वर्च्चोदसौव्वर्च्चसेपवेथाम्।।२८।। कोसि। कतमोसिकस्यासिकोनामासि।।

यस्यतेनामामन्न्महियन्त्वासोमेनातीतृपाम।। भूर्ब्भुव:स्व:सुप्प्रजा:प्प्रजाभि:स्याऽसुवीरोव्वीरै:

सुपोष:पोषै: ।।२९।। (३-१२) उपयामगृहीतोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयाम

गृहीतोसिशुक्क्रायत्त्वोपयामगृहीतोसिशुचयेत्त्वोपयामगृहीतोसिनभसेत्त्वोपयामगृहीतोसिनभस्या

यत्त्वोपयामगृहीतोसीषेत्त्वोपयामगृहीतोस्यूर्ज्जेत्त्वोपयामगृहीतोसिसहसेत्त्वोपयामगृहीतोसिसह
स्यायत्त्वोपयामगृहीतोसितपसेत्त्वोपयामगृहीतोसितपस्यायत्त्वोपयामगृहीतोस्यꣳहसस्प्पतयेत्त्वा
।।३०।। (१-१३) इन्द्राग्ग्नीऽआगतम्।। इन्द्राग्ग्नीऽआगतꣳसुतङ्गीर्ब्भिर्न्नभोव्वरेण्ण्यम्।। अस्य
पातन्धियेषिता।। उपयामगृहीतोसीन्द्राग्ग्निब्भ्यान्त्वैषतेयोनिरिन्द्राग्ग्निब्भ्यान्त्वा।।३१।।
(१-१४) आघ।। आघायेऽअग्ग्निमिन्धतेस्तृणन्तिबर्हिरानुषक्।। येषामिन्द्रोयुवासखा।। उपयाम
गृहीतोस्यग्ग्नीन्द्राब्भ्यान्त्वैषतेयोनिरग्ग्नीन्द्राब्भ्यान्त्वा।।३२।। (१-१५) ओमासश्च्चार्षणी धृत꣡।।
ओमासश्च्चार्षणीधृतोव्विश्श्वेदेवासऽआगत।। दाश्श्वाꣳसोदाशुषꣳसुतम्।। उपयाम
गृहीतोसिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यꣳऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः।।३३।। (१-१६)
व्विश्श्वेदेवास꣡।। व्विश्श्वेदेवासऽआगतशृणुतामऽइमꣳहवम्।। एदम्बर्हिर्न्निषीदत।। उपयाम
गृहीतोसिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यꣳऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः।।३४।। (१-१७)
इन्द्रमरुत्त्व꣡।। इन्द्रमरुत्त्वऽइहपाहिसोमँय्यथाशार्य्यातेऽअपिबꣳसुतस्य।। तवप्प्रणीतीतव

शूरशर्म्मन्नाविंवासन्तिकवयं॑सुयज्ञा॒॥ उपयामगृंहीतोसीन्द्रांयत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रांयत्त्वा
मरुत्त्वंते॥३५॥ (१–१८) मरुत्त्वंन्तंव्वृषभं। व्वांवृधानमकंवारिन्दिव्व्यꣳशासमिन्द्रम्॥ व्विश्श्वा
साहमवंसेनूतंनायोग्ग्रꣳसंहोदामिहतꣳहुंवेम॥ उपयामगृंहीतोसीन्द्रंयत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रां
यत्त्वामरुत्त्वंते॥ (१–१९) उपयामगृंहीतोसिमरुतान्त्वौजंसे॥३६॥ (१–२०) सजोषांऽइन्द्र॥
सजोषांऽइन्द्रसगंणोमरुद्भिः सोमंम्पिबव्वृत्रहाशूंरव्विद्द्वान्॥ जहिशत्त्रूँ१॥ रपमृधोंनुदस्वाथा
भंयङ्कृणुहिव्विश्श्वतोंनः॥ उपयामगृंहीतोसीन्द्रांयत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रांयत्त्वामरुत्त्वंते
॥३७॥ (१–२१) मरुत्त्वाँ२॥ ऽइन्द्र। व्वृषभोरणांयपिबासोमंमनुष्ष्वधम्मदांय॥ आसिंञ्चस्व
जठरेमद्ध्वंऽऊर्म्मिन्त्वꣳराजांसिप्प्रतिंपत्सुतानांम्॥ उपयामगृंहीतोसीन्द्रांयत्त्वामरुत्त्वंतऽएषतेयो
निरिन्द्रांयत्त्वामरुत्त्वंते॥३८॥ (१–२२) महाँ२॥ ऽइन्द्रं॑॥ महाँ२॥ ऽइन्द्रोंनृवदाचंर्षणि
प्प्राऽउतद्विबर्हांऽअमिनः॒सहोंभिः॥ अस्म्मद्द्र्यग्ग्वावृधेव्वीर्य्यांयोरुः॒पृथुः॒सुकृंतꣳकेर्तृभिंर्ब्भूत्॥
उपयामगृंहीतोसिमहेन्द्रायंत्त्वैषतेयोनिंर्म्महेन्द्रायंत्त्वा॥३९॥ (१–२३) महाँ२॥ ऽइन्द्रं॑॥ महाँ२॥

ऽइन्द्रोयऽओजसापर्ज्जन्न्योव्वृष्ट्टिमाँ२।। ऽइव।। स्तोमैर्व्वत्त्सस्यव्वावृधे।। उपयामगृहीतोसिम
हेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा।।४०।। (१–२४) उदुत्त्यम्।। उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिके
तवः।। दृशेव्विश्श्वायसूर्य्यꣳस्वाहा।।४१।। चित्रन्देवानाम्।। चित्रन्देवानामुदगादनी
कञ्चक्क्षुर्म्मित्त्रस्यव्वरुणस्याग्ग्नेः।। आप्प्राद्द्यावापृथिवीऽअन्तरिक्क्षꣳसूर्य्यऽआत्त्माजगतस्त्त
स्त्थुषश्च्चस्वाहा।।४२।। अग्ग्नेनय। सुपथारायेऽअस्म्मान्विश्श्वानिदेवव्वयुनानिव्विद्द्वान्।।
युयोद्ध्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंव्विधेमस्वाहा।।४३।। अयन्नः।। अयन्नोऽ
अग्ग्निर्व्वरिवस्कृणोत्त्वयम्मृधःपुरऽएतुप्प्रभिन्दन्।। अयंव्वाजाञ्जयतुव्वाजसातावयꣳ
शत्त्रूँञ्जयतुजर्हृषाणꣳस्वाहा।।४४।। रूपेणवः।। रूपेणवोरूपमब्भ्यागान्तुथोवोव्विश्श्ववेदाव्वि
भजतु।। ऋतस्यपथाप्प्रेतचन्द्रदक्षिणाव्विस्वꣳपश्श्यव्व्यन्तरिक्षँय्यतस्वसदस्यैः।।४५।।
ब्राह्म्मणमद्द्य। विदेयम्पितृमन्तम्पैतृमत्त्यमृषिमार्षेयꣳसुधातुदक्षिणम्।। अस्म्मद्द्रातादेवत्त्रागच्छत
प्प्रदातारमाविशत।।४६।। अग्ग्नयेत्त्वा।। अग्ग्नयेत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयायुर्द्दात्त्र

ऽएधिमयोमह्यम्प्रतिग्ग्रहीत्त्रेरुद्रायत्त्वामह्यँव्वरुणोददातुसोमृतत्त्वमशीयप्प्राणोदात्त्रऽएधिव्वयोम
ह्यम्प्रतिग्ग्रहीत्त्रेबृहस्प्पतयेत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयत्त्वग्ग्दात्त्रऽएधिमयोमह्यम्प्रतिग्ग्र
हीत्त्रेयमायत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयहयोदात्त्रऽएधिव्वयोमह्यम्प्रतिग्ग्रहीत्त्रे।।४७।।
कोदात्।। कोदात्त्कस्म्माऽउदात्त्कामोदात्त्कामायादात्।। कामोदाताकामः प्प्रतिग्ग्रहीताकामैतत्ते
।।४८।। (८-२५) इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः।।७।। श्रीवेदपुरुषायनमः।।
अनुवाकसूत्रम्।। उपयामगृहीतोस्यादित्येभ्यः पंच, वाममद्यद्वे, सुशर्मास्येका, बृहस्पतिसुतस्यद्वे, हरिरसिचतस्रः, समिन्द्रेऽष्टौ, माहिः पंच, ऽएजतुदशमास्यः पंचा, तिष्ठैका, युक्ष्वाह्योके, न्द्रमिदेका, यस्मान्नद्वे, ऽग्नेपवस्वो, त्तिष्ठन्न, दृश्रमु, दुत्यमेकैका, जिघ्र द्वे, विनइन्द्र, वाचस्पतिं, व्विश्वकर्मन्नेकैका, ग्नयेत्वाचतस्र, इहरतिस्तिस्रः, परमेष्ठीदश, त्रयोविꣳशतिस्त्रिषष्टिः।। (अ. ८ मं. ६३ अनु. २३) हरिः ॐ।।
उपयामगृहीतोसि।। उपयामगृहीतोस्यादित्त्येब्भ्यस्त्वा।। व्विष्णऽउरुगायैषतेसोमस्तꣳ

रक्षस्वमात्त्वादभन्॥१॥ कदाचन। स्त्तरीरसिनेन्द्रसश्च्चासिदाशुषे॥ उपोपेन्नुमघवन्न्भूय
ऽइन्नुतेदानन्देवस्यपृच्च्यतऽआदित्त्येब्भ्यस्त्वा॥२॥ कदाचन। प्प्रयुच्छस्युभेनिपासिजन्म्मनी॥
तुरीयादित्त्यसवनन्तऽइन्द्रियमातस्त्थावमृतन्दिव्व्यादित्त्येब्भ्यस्त्वा॥३॥ यज्ञोदेवानाम्॥
यज्ञोदेवानाम्प्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः॥ आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्चिच्चा
द्य्यावरिवोवित्त्तरासदादित्त्येब्भ्यस्त्वा॥४॥ व्विवस्वन्नादित्त्य॥ व्विवस्वन्नादित्त्यैषतेसोमपीथ
स्त्तस्म्मिन्न्मत्त्स्व॥ श्रदस्म्मैनरोव्वचसेदधातनयदाशीर्द्दादम्पतीव्वाममश्न्नुतः॥ पुमान्न्पुत्त्रोजाय
तेव्विन्दतेव्वस्वधाव्विश्श्वाहारपऽएधतेगृहे॥५॥ (५–१) व्वाममद्द्य। सवितर्व्वाममुश्श्वो
दिवेदिवेव्वाममस्म्मब्भ्यꣳसावीः॥ व्वामस्यहिक्षयदेवभूरेरयाधियाव्वामभाजःस्याम॥६॥
उपयामगृहीतोसि। सावित्त्रोसिचनो धाश्च्चनोधाऽअसिचनोमयिधेहि॥ जिन्न्वयज्ञञ्जिन्न्वयज्ञ
पतिम्भगायदेवायत्त्वासवित्त्रे॥७॥ (२–२) शतम्॥३००॥ उपयामगृहीतोसि।
सुशर्म्मासिसुप्प्रतिष्ठानोबृहदुक्षायनमः॥ व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वा

देवेब्भ्यः।।८।। (१-३) उपयाम गृहीतोसि।। उपयामगृहीतोसिबृहस्प्पतिसुतस्यदेवसोमतऽ
इन्दोरिन्द्रिया वतꣳपत्क्नीवतोग्ग्रहाँ२।। ऽऋद्ध्यासम्।। अहम्परस्त्तादहमवस्त्ताद्यदन्तरिक्षन्त
दुमेपिताभूत्।। अहꣳसूर्य्यमुभयतोददर्शा हन्देवानाम्परमङ्गुहायत्।।९।। अग्ना३।। ऽइपत्क्नीवन्।।
अग्ना३।। ऽइपत्क्नीवन्त्सजूर्द्देवेनत्त्वष्ट्ट्रासोमम्पिबस्वाहा।। प्रजापतिर्व्वृषासिरेतोधारेतोमयिधेहि
प्प्रजापतेस्त्तेव्वृष्णोरेतोधसोरेतोधामशीय।।१०।। (२-४) उपयामगृहीतोसि।। उपयाम
गृहीतोसिहरिरसिहारियोजनोहरिब्भ्यान्त्वा।। हर्य्योर्द्धानास्त्थसहसोमाऽइन्द्राय।।११।। यस्त्ते।
ऽअश्श्वसनिर्ब्भक्षोयोगोसनिस्त्तस्यतऽइष्ट्टयजुषस्त्तुतस्त्तोमस्यशस्त्तोक्क्थस्योपहूतस्योपहूतोभक्षयामि
।।१२।। देवकृतस्यैनसः।। देवकृतस्यैनसोवयजनमसिमनुष्ष्यकृतस्यैनसोवयजनमसिपितृ
कृतस्यैनसोवयजनमस्यात्त्मकृतस्यैनसोवयजनमस्येनसऽएनसोवयजनमसि।। यच्चाहमेनो
व्विद्द्वाँश्च्चकारयच्चाविद्द्वाँस्त्तस्यसर्व्वस्यैनसोवयजनमसि।।१३।। संव्वर्च्चसा।। संव्वर्च्च
सापयसासन्तनूभिरगन्मम्हिमनसासꣳशिवेन।। त्वष्ट्टासुदत्त्रोव्विदधातुरायोनुमार्ष्टुतन्न्वो

यद्द्विलिष्टम्।।१४।। (४-५) समिन्द्र। णोमनसानेषिगोभिꣳसꣳसूरिभिर्म्मघवन्त्सꣳस्वस्त्या।।
सम्ब्रह्म्मणादेवकृतँय्यदस्त्तिसन्देवानाꣳसुमतौयज्ञियानाꣳस्वाहा।।१५।। संव्वर्च्चसा।।
संव्वर्च्चसापयसासन्तनूभिरगन्न्महिमनसासꣳशिवेन। त्वष्टासुदत्त्रोव्विदधातुरायोनुमार्ष्टुतन्न्वो
यद्द्विलिष्टम्।।१६।। धातारातिः। सवितेदञ्जुषताम्प्रजापतिर्न्निधिपादेवोऽअग्ग्निः।।
त्वष्टाव्विष्णुः प्प्रजयासꣳरराणायजमानायद्द्रविणन्दधातस्वाहा।।१७।। सुगावः।। सुगावोदेवाः
सदनाऽअकर्म्मयऽआजग्ग्मेदꣳसवनञ्जुषाणाः।। भरमाणाव्वहमानाहवीꣳष्ष्यस्म्मेधत्तव्वसवो
व्वसूनिस्वाहा।।१८।। याँ २।। ऽआवहः।। याँ२।। ऽआवहऽउशतोदेवदेवाँस्त्तान्प्रेरयस्वेऽ
अग्ग्नेसधस्त्थे।। जक्षिवाꣳसः पपिवाꣳस श्च्चाव्विश्श्वेसुङ्घर्म्मꣳस्वरातिष्ठतानु स्वाहा।।१९।।
व्वयꣳहि। त्त्वाप्प्रयतियज्ञेऽअस्म्मिन्नग्ग्नेहोतारमवृणीमहीह।। ऋधगयाऽऋधगुताशमिष्ठाः
प्प्रजानन्न्यज्ञमुपयाहिव्विद्द्वान्त्स्वाहा।।२०।। देवागातुविदः।। देवागातुविदोगातुंव्वित्त्वागातु
मित।। मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः।।२१।। यज्ञंयज्ञम्।। यज्ञंयज्ञङ्गच्छयज्ञ

पतिङ्गच्छस्वाँय्योनिङ्गच्छस्वाहा।। एषतेयज्ञोयज्ञपतेसहसूक्क्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा।।२२।। (८-६) माहिर्म्माहिर्भूर्म्मापृदाकुः।। उरुꣳहिराजाव्वरुणश्च्चाकारसूर्य्याय पन्थामन्न्वेतवाऽऊं।। अपदेपादाप्प्रतिधातवेकरुतापवक्क्ताहृदयाव्विधश्चिच्चात्।। नमोव्वरुणा याभिष्ठितोव्वरुणस्यपाशः।।२३।। अग्ग्नेरनीकम्।। अग्ग्नेरनीकमपऽआविवेशापान्न पात्त्प्रतिरक्षन्न सुर्य्यम्।। दमेदमेसमिधँय्यक्ष्यग्ग्नेप्प्रतितेजिह्व्वाघृतमुच्चरण्ण्यत्त्स्वाहा।।२४।। समुद्द्रेते।। समुद्द्रेतेहृदयमप्प्स्वन्तःसन्त्वाव्विशन्त्वोषधीरुतापः।। यज्ञस्यत्त्वायज्ञपते सूक्क्तोक्क्तौनमोवाकेव्विधेमयत्त्स्वाहा।।२५।। देवीरापः।। देवीरापऽएषवोगर्ब्भस्तꣳसुप्प्रीतꣳ सुभृतम्बिभृत।। देवसोमैषतेलोकस्तस्मिञ्छञ्चाव्वक्ष्वपरिचाव्वक्ष्व।।२६।। अवभृथनिचुम्पुण। निचेरुरसिनिचुम्पुणः।। अवदेवैर्द्देवकृतमेनोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्ण्णोदेवरिषस्प्पाहि देवानाꣳसमिदसि।।२७।। (५-७) एजतुदशमास्यः।। एजतुदशमास्योगर्ब्भोजरायुणासह।। यथायंव्वायुरेजतियथासमुद्द्रऽएजति।। एवायन्दशमास्योऽअस्स्रञ्जरायुणासह।।२८।। यस्यैते।

यज्ञियोगर्ब्भोयस्यैयोनिर्र्हिरण्ण्ययी।। अङ्गान्न्यह्रुतायस्यतम्मात्त्रासमंजीगम७स्वाहा।।२९।।
पुरुदस्म्मोव्विषुरूप॑।। पुरुदस्म्मोव्विषुरूपऽइन्दुरन्तर्म्महिमानमानञ्जधीरः।। एकपदीन्द्विपदीन्त्रि
पदीञ्चातुष्प्पदीमष्ट्टापदीम्भुवनानुप्प्रथन्ता७स्वाहा।।३०।। मरुतोयस्य।। मरुतोयस्यहिक्षयेपाथा
दिवोव्विमहस॑।। ससुगोपातमोजनः।।३१।। महीद्द्यौः। पृथिवीचनऽइमँय्यज्ञम्मिमिक्षताम्।।
पिपृतान्नोभरीमभिः।।३२।। (५–८) आतिष्ठ। व्वृत्रहन्नरथँय्युक्क्तातेब्ब्रह्म्मणाहरी।।
अर्व्वाचीनœसुतेमनोग्ग्रावाकृणोतुव्वग्नुना।। उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयो
निरिन्द्रायत्त्वाषोडशिने।।३३।। (१–९) युक्क्ष्वाहि। केशिनाहरीव्वृषणाकक्क्ष्यप्प्रा।।
अथानऽइन्द्रसोमपागिरामुपश्श्रुतिञ्चार।। उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रा
यत्त्वाषोडशिने।।३४।। (१–१०) इन्द्रमित्।। इन्द्रमिद्धरीव्वहतोप्प्रतिधृष्टशवसम्।। ऋषीणाञ्चा
स्तुतीरुपयज्ञञ्चमानुषाणाम्।। उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वा
षोडशिने।।३५।। (१–११) यस्म्मान्न। जातःपरोऽअन्न्योऽअस्त्तियऽआविवेशभुवना

निव्विश्श्वा।। प्रजापतिष्प्रजयासःरराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी।।३६।।

इन्द्रैश्च। सम्म्राड्ड्व्वरुणश्च्चराजातौतैभक्षञ्चक्क्रतुरग्रऽएतम्।। तयोरहमनुभक्षम्भक्षयामि व्वाग्देवीजुषाणासोमस्यतृप्प्यतुसहप्प्राणेनस्वाहा।।३७।। (२–१२) अग्ग्नेपवस्व।।

अग्ग्नेपवस्वस्वपाऽअस्म्मेव्वर्च्चःसुवीर्य्यम्।। दधद्द्रयिम्मयिपोषम!।। उपयामगृहीतोस्यग्ग्नयेत्त्वा व्वर्चसऽएषतेयोनिरग्ग्नयेत्त्वाव्वर्च्चसे।। अग्ग्नेव्वर्च्चस्विन्न्वर्च्चस्वाँस्त्वन्देवेष्ष्वसिव्वर्च्चस्वान हम्मनुष्ष्येषुभूयासम्।।३८।। (१–१३) उत्तिष्ठन्नोजसा।। उत्तिष्ठन्नोजसासहपीत्त्वी शिप्प्रेऽअवेपयः।। सोममिन्द्रचमूसुतम्।। उपयामगृहीतोसीन्द्रायत्त्वौजसऽएषतेयो निरिन्द्रायत्त्वौजसे।। इन्द्रौजिष्ठौ जिष्ठस्त्वन्देवेष्ष्वस्योजिष्ठोहम्मनुष्ष्येषुभूयासम्।।३९।।

(१–१४) अदृश्श्रमस्य। केतवोव्विरश्म्मयोजनाँ२।।ऽअनु।। भ्राजन्तोऽअग्ग्नयोयथा।। उपयामगृहीतोसिसूरूर्यायत्त्वा बभ्राजायैषतेयोनिःसूर्य्यायत्त्वाबभ्राजाय।। सूर्य्यबभ्राजिष्ठ बभ्राजिष्ठस्त्वन्देवेष्ष्वसिबभ्राजिष्ठो हम्मनुष्ष्येषुभूयासम्।।४०।। (१–१५) उदुत्त्यम्।।

उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ।। दृशेव्विश्श्वायसूर्य्यम् ।। उपयामगृहीतो सिसूर्य्यायत्त्वा बभ्राजायैषतेयोनिःसूर्य्यायत्त्वाबभ्राजाय ।।४१।। (१-१६) आजिग्घ्र ।। आजिग्घ्रकलशम्मह्यात्त्वा व्विशन्त्विन्दवः ।। पुनरूर्ज्जानिवर्त्तस्वसानःसहस्रन्धुक्क्ष्वोरुधारापयस्वतीपुनर्म्मा विशताद्द्रयिः ।।४२।। इडेरन्ते ।। इडेरन्तेहव्व्येकाम्म्येचन्द्रेज्ज्योतेदितिसरस्वति महिव्विश्श्रुति ।। एतातेऽअग्घ्न्येनामानिदेवेभ्भ्योमासुकृतम्ब्रूतात् ।।४३।। (२-१७) व्विनः ।। व्विनऽइन्द्र मृधोजहिनीचायच्छपृतन्न्यतः ।। योऽअस्म्माँ२ ।। ऽअभिदासत्त्यधरङ्गमयातमः ।। उपयाम गृहीतोसीन्द्रायत्त्वाव्विमृधऽएषतेयोनिरिन्द्रायत्त्वाव्विमृधे ।।४४।। (१-१८) व्वाचस्प्पतिं । व्विश्श्वकर्म्माणमूतयेमनोजुवंव्वाजेऽअद्द्याहुवेम ।। सनोव्विश्श्वानिहवनानिजोषद्विश्श्वशम्भू रवसेसाधुकर्म्मा ।। उपयामगृहीतोसीन्द्रायत्त्वाव्विश्श्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाव्विश्श्व कर्म्मणे ।।४५।। (१-१९) व्विश्श्वकर्म्मन्न्हविषा ।। व्विश्श्वकर्म्मन्न्हविषाव्वर्द्धनेनत्त्रातार मिन्द्रमकृणोरवद्ध्यम् ।। तस्म्मैव्विशःसमनमन्तपूर्व्वीरयमुग्ग्रोव्विहव्व्योयथासत् ।। उपयमगृहीतो

सीन्द्रायत्त्वाव्विश्श्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाव्विश्श्वकर्म्मणे ।।४६ ।। (१–२०) उपयाम गृहीतोसि ।। उपयामगृहीतोस्यग्ग्नयेत्त्वागायत्रच्छन्दसङ्गृह्णण्णा मीन्द्रायत्त्वात्त्रिष्ट्टुप्पछन्द सङ्गृह्णण्णामिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्योजगच्छन्दसङ्गृह्णण्णा म्म्यनुष्ट्टुप्तेभिगरः ।।४७ ।। व्व्रेशीनान्त्वा ।। व्व्रेशीनान्त्वापत्क्मन्नाधूनोमिकुकूननानान्त्वापत्क्मन्नाधूनोमिभन्दनानान्त्वा पत्क्मन्नाधूनोमिमदिन्तमानान्त्वापत्क्मन्नाधूनोमिमधुन्तमानान्त्वापत्क्मन्नाधूनोमिशुक्क्रन्त्वा शुक्क्रऽआधूनोम्म्यह्नोरूपेसूर्य्यस्यरश्शिमषु ।।४८ ।। ककुभꣳरूपं । व्वृषभस्यरोचतेबृहच्छुक्क्रः शुक्क्रस्यपुरोगाःसोमꣳसोमस्यपुरोगाः ।। यत्तेसोमादाब्भ्यन्नामजागृवितस्म्मैत्त्वागृह्णण्णामितस्म्मैते सोमसोमायस्वाहा ।।४९ ।। उशिक्क्त्वम् ।। उशिक्क्त्वन्देवसोमाग्ग्नेःप्प्रियम्पाथोपीहिव्व शीत्त्वन्देव सोमेन्द्रस्यप्प्रियम्पाथोपीह्यस्म्मत्त्सखात्त्वन्देवसोमव्विश्श्वेषान्देवानाम्प्प्रियम्पाथोपीहि ।।५० ।। (४–२१) इहरतिः ।। इहरतिरिहरमद्ध्वमिहधृतिरिहस्वधृतिꣳस्वाहा ।। उपसृजन्ध रुणम्मात्त्रेधरुणोमातरन्धयन् ।। रायस्प्पोषमस्म्मासुदीधरत्त्स्वाहा ।।५१ ।। सत्त्रस्यऽऋद्धिः ।।

सत्रस्यऽऋद्धिरस्यगन्न्मज्ज्योतिरमृताऽअभूम ।। दिवम्पृथिव्व्याऽअद्ध्यारुहामाविदामदेवान्त्स्वज्ज्योतिः ।।५२।। युवन्तम् ।। युवन्तमिन्द्रापर्व्वता पुरोयुधायोनःपृतन्न्यादपतन्तमिद्द्धंतंव्वज्ज्रेणतन्तमिद्द्धंतम् ।। दूरेचत्तायच्छन्त्सद्गहनँय्यदिनंक्षत् ।। अस्म्माकꣳशत्त्रूँन्परिशूरव्विश्श्वतोदर्म्मादर्षीष्ट्टव्विश्श्वतः ।। भूर्भुवःस्वःसुप्प्रजाःप्प्रजाभिःस्यामसुवीराव्वीरैःसुपोषाःपोषैः ।।५३।। (३–२२) परमेष्ठ्ठ्यभिधीतः। प्प्रजापतिर्व्वाचिव्व्याहृतायामन्धोऽअच्छेतःसवितासन्न्यांव्विश्श्वकर्म्मादीक्षायाम्पूषासोमक्क्रयण्ण्यामिन्द्रश्च्च ।।५४।। इन्द्रश्च्च। मरुतश्च्चक्क्रयायोपोत्त्थितोसुरःपण्ण्यमानोमित्त्रःक्क्रीतोव्विष्ण्णुःशिपिविष्ट्टऽऊरावासन्नोव्विष्ण्णुर्न्नरन्धिषःप्प्रोह्यमाणःसोमः ।।५५।। प्रोह्यमाणःसोमः ।। प्रोह्यमाणः सोमऽआगतोव्वरुणऽआसन्द्यामासन्नोग्गिनराग्ग्नीद्ध्रऽइन्द्रोहविर्द्धानेथर्व्वोपावह्रियमाणो व्विश्श्वेदेवाः ।।५६।। व्विश्श्वेदेवाः ।। व्विश्श्वेदेवाऽअꣳशुषुन्न्युप्प्तोव्विष्ण्णुराप्प्रीतपाऽआप्प्याय्यमानोयमःसूयमानोव्विष्ण्णुःसम्भ्रियमाणोव्वायुःपूयमानःशुक्क्रःपूतःशुक्क्रःक्षीरश्श्री

म्र्मन्थीसंक्क्तुश्श्रीव्विंश्श्वेदेवाः ।।५७।। व्विश्श्वेदेवाः।। व्विश्श्वेदेवाश्च्चमसेषून्नीतोसुर्हो

मायोद्द्यतोरुद्द्रोहूयमानोव्वातोब्भ्यावृत्तोनृचक्षाःप्प्रतिक्ख्यातोभक्षोभक्ष्यमाणः

पितरोनाराशꣳसाःसन्नःसिन्धुः।।५८।। सन्नःसिन्धुः।। सन्नःसिन्धुरवभृथायोद्द्यतःसमुद्द्रो

ब्भ्यवह्रियमाणःसलिलःप्प्रप्प्लुतोययोरोजसास्क्कभितारजाꣳसिव्वीर्य्येभिर्व्वीरतमाशविष्ठा।।

यापत्त्येतेऽअप्प्रतीतासहोभिर्व्विष्ण्णूऽअगन्न्वरुणापूर्व्वहूतौ।।५९।। देवान्दिवम्।। देवान्दिव

मगन्न्यज्ञस्त्ततोमाद्द्रविणमष्टुमनुष्ष्यानन्तरिक्षमगन्न्यज्ञस्त्ततोमाद्द्रविणमष्टुपितॄन्पृथिवीमगन्न्य

ज्ञस्त्ततोमाद्द्रविणमष्ट्टुयङ्क्ञ्च्चलोकमगन्न्यज्ञस्त्ततोमेभद्द्रमभूत्।।६०।। चतुस्त्रिꣳशत्तन्तवः।।

चतुस्त्रिꣳशत्तन्तवोयेव्वितत्न्तिरेयऽइमँय्यज्ञꣳस्वधयाददन्ते।। तेषाञ्छिन्नꣳसम्म्वेतद्दधामि

स्वाहाघर्म्मोऽअप्प्येतुदेवान् ।।६१।। यज्ञस्यदोहः।। यज्ञस्यदोहोव्विततःपुरुत्त्रासो

ऽअष्टुधादिवमन्न्वाततान।। सयज्ञधुक्क्ष्व महिमेप्प्रजायाꣳरायस्प्पोषंव्विश्श्वमायुरशीयस्वाहा

।।६२।। आपवस्व।। आपवस्वहिरण्ण्यवदश्श्ववत्सोमव्वीरवत्।। व्वाजङ्गोमन्तमाभरस्वाहा

।।६३।। (१०-२३)।। इतिश्रीवाजसनेय संहितायामष्टमोऽध्यायः ।।८।। श्रीवेदपुरुषाय नमः।।

अनुवाकसूत्रम्।। देवसवितश्चातस्र, इंद्रस्यवज्रः पंच, देवस्याहं दशा, पयेस्वाहातिस्रो, वाजस्येममष्टा, वग्निरेकाक्षरेणचतुष्कौ, षतेचतुष्कौ, सवितात्वाद्वे, अष्टौचत्वारिꣳशत् (अ. ९ मं. ४० अनु. ८) हरिः ॐ।।

देवसवितः।। देवसवितꣳप्प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय।। दिव्व्योगन्धर्व्वꣳकेतपूꣳकेतन्नꣳ पुनातुव्वाचस्प्पतिर्व्वाजन्नꣳस्वदतुस्वाहा।।१।। ध्रुवसदन्त्वा। नृषदम्मनꣳसदमुपयामगृहीतोसीन्द्रा यत्त्वाजुष्टंगृह्णणम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम्।। अप्प्सुषदन्त्वाघृतसदंव्व्योमसदमुपया मगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णणाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम्।। पृथिविसदन्त्वान्तरिक्ष सदन्दिविसदन्देवसदन्नाकसदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णणाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम्।।२।। अपाꣳरसम्।। अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम्।। अपाꣳरसस्ययोरसस्तं व्वोगृह्णणाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णणाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम्।।

३।। ग्रहाऽऊर्ज्जाहुतयः।। ग्रहाऽऊर्ज्जाहुतयोव्व्यन्तोव्विप्प्रांयमतिम्।। तेषांव्विशिप्प्रियाणांव्वो
हमिषमूर्ज्जꣳसमग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्ट्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्ट्टतमम् ।।
सम्पृचौस्त्थःसम्मांभद्द्रेणपृङ्क्तंव्विपृचौस्त्थोव्विमापाप्मनापृङ्क्तम्।।४।। (४-१) इन्द्रस्य
व्वज्ज्रः।। इन्द्रस्यव्वज्ज्रोसिव्वाजसास्त्वयायंव्वाजꣳसेत्।। व्वाजस्यनुप्प्रसवेमातरम्महीमदितिन्ना
मव्वचसाकरामहे।। यस्यामिदंव्विश्श्वम्भुवनमाविवेशतस्यान्नोदेवःसविताधर्म्मसाविषत्।।५।।
अप्प्स्वन्तः।। अप्प्स्वन्तरमृतमप्प्सुभेषजमपामुतप्प्रशस्तिष्ष्वश्श्वाभवतव्वाजिनः।। देवीरापो
योवऽऊर्म्मिःप्प्रतूर्त्तिःककुन्म्मान्वाजसास्तेनायंव्वाजꣳसेत्।।६।। व्वातोवा।। व्वातोवामनोवा
गन्धर्व्वाःसप्प्तविꣳशतिः।। तेऽअग्ग्रेश्श्वमयुञ्जँस्तेऽअस्मिम्मञ्जवमादधुः।।७।। व्वातरꣳहाभव।
व्वाजिन्न्युज्ज्यमानऽइन्द्रस्येवदक्षिणःश्श्रियैधि।। युञ्जन्तुत्त्वामरुतोव्विश्श्ववेदसऽआतेत्त्वष्ट्टा
पत्त्सुजवन्दधातु।।८।। जवोयः।। जवोयस्तेव्वाजिन्निहितोगुहायःश्श्येनेपरीत्तोऽअचरच्च व्वाते।।
तेनंनोव्वाजिन्न्बलवान्न्बलेनव्वाजजिच्चभवसमनेचपारयिष्ष्णुः।। वाजिनोव्वाजजितो

व्वाजꣳसरिष्ष्यन्तोबृहस्प्पतेर्ब्भागमवजिग्घ्रत॥९॥ (५-२) देवस्याहम्॥ देवस्याहꣳसवितुः
सवेसत्त्यसवसोबृहस्प्पतेरुत्तमन्नाकꣳरुहेयम्॥ देवस्याहꣳसवितुःसवेसत्त्यसवसइन्द्रस्योत्त
मन्नाकꣳरुहेयम्॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्रसवसोबृहस्प्पतेरुत्तमन्नाकमरुहम्॥ देवस्याहꣳ
सवितुःसवेसत्त्यप्प्रसवसऽइन्द्रस्योत्तमन्नाकमरुहम्॥१०॥ बृहस्प्पतेव्वाजम्॥ बृहस्प्पते
व्वाजञ्जयबृहस्प्पतयेव्वाचंव्वदतबृहस्प्पतिंव्वाजञ्जापयत॥ इन्द्रव्वाजञ्जयेन्द्रायव्वाचंव्व
दतेन्द्रंव्वाजञ्जापयत॥११॥ एषावः॥ एषावꣳसासत्त्यासंव्वागभूद्द्ययाबृहस्प्पतिं
व्वाजमजीजपताजीजपतबृहस्प्पतिंव्वाजंव्वनस्प्पतयोव्विमुच्च्यद्ध्वम्॥ एषावꣳसासत्त्यासं
व्वागभूद्द्ययेन्द्रंव्वाजमजीजपताजीजपतेन्द्रंव्वाजंव्वनप्पतयोव्विमुच्च्यद्ध्वम्॥१२॥
देवस्याहम्॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्रसवसोबृहस्प्पतेर्व्वाजजितोव्वाजञ्जेषम्॥ व्वाजिनो
व्वाजजितोद्ध्वनस्क्कब्भ्नुवन्तोयोजनामिमानाꣳकाष्ठ्ठाङ्गच्छत॥१३॥ एषस्यः॥ एषस्यव्वा
जीक्षिपणिन्तुरण्ण्यतिग्ग्रीवायाम्बद्धोऽअपिकक्षऽआसनि॥ क्क्रतुन्दधिक्क्राऽअनुसꣳसनिष्ष्य

दत्त्पथामङ्क्ताꣳस्यन्न्वापनीफणत्त्स्वाहा।।१४।। उतस्म्म।। उतस्म्मास्यद्द्रवतस्तुरण्ण्यतः
पर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः।। श्येनस्येवद्ध्रजतोऽअङ्कसम्परिदधिक्क्राव्ण्णःसहोर्ज्जातरित्त्रतः
स्वाहा।।१५।। शन्नः।। शन्नोभवन्तुव्वाजिनोहवेषुदेवताताामितद्द्रवःस्वर्क्काः।। जम्भयन्तोहिं
व्वृकꣳरक्षाꣳसिसनेम्म्यस्म्मद्युयवन्नमीवाः।।१६।। तेनः।। तेनोऽअर्व्वन्तोहवनश्श्रुतोहवं
व्विश्श्वेशृण्ण्वन्तुव्वाजिनोमितद्द्रवः।। सहस्रसामेधसातासनिष्ष्यवोमहोयेधनꣳसमिथेषुजब्भ्रिरे
।।१७।। व्वाजेवाजेवत। व्वाजिनोनोधनेषुव्विप्प्चऽअमृताऽऋतज्ञाः।। अस्यमद्ध्वःपिबत
मादयद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानैः।।१८।। आमा।। आमाव्वाजस्यप्प्रसवोजगम्म्यादेमेद्द्यावा
पृथिवीव्विश्श्वरूपे।। आमागन्ताम्पितरामातराचामासोमोऽअमृतत्त्वेनगम्म्यात्।। व्वाजिनो
व्वाजजितोव्वाजꣳससृवाꣳसोबृहस्प्पतेर्ब्भागमवजिग्घ्रतनिमृजानाः।।१९।। (१०–३) आपये
स्वाहा। स्वापयेस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहाह्न्नेमुग्ग्धायस्वा
हामुग्ग्धायव्वैनꣳशिनायस्वाहाव्विनꣳशिनऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपत

येस्वाहाधिपतयेस्वाहा।।२०।। आयुर्य्यज्ञेन। कल्प्पताम्प्राणोयज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेन
कल्प्पता७श्रोत्रँय्यज्ञेनकल्प्पताम्पृष्ठँय्यज्ञेनकल्प्पताँय्यज्ञोयज्ञेनकल्प्पताम्।। प्रजापतेःप्प्रजा
ऽअभूमस्वर्द्देवाऽअगन्म्मामृताऽअभूम।।२१।। अस्म्मेवः।। अस्म्मेवोऽअस्त्विन्द्रियम
स्म्मेनृम्म्णमुतक्क्रतुरस्म्मेव्वर्च्चा७सिसन्तुवः।। नमोमात्त्रेपृथिव्व्यैनमोमात्त्रेपृथिव्व्याऽइयन्ते
राड्डयन्तासियमनोद्ध्रुवोसिधरुणः।। कृष्ष्यैत्त्वाक्षेमायत्त्वारय्यैत्त्वापोषायत्त्वा।।२२।। (३-४)
व्वाजस्येमम्।। व्वाजस्येमम्प्रसवःसुषुवेग्ग्रेसोमः राजानमोषधीष्ष्वप्प्सु।। ताऽअस्म्मब्भ्यम्मधुमती
र्ब्भवन्तुव्वयःराष्ट्रेजागृयामपुरोहिताःस्वाहा।।२३।। व्वाजस्येमाम्।। व्वाजस्येमाम्प्रसवः
शिश्रियेदिवमिमाचव्विश्श्वाभुवनानिसम्म्राट्।। अदित्त्सन्तन्दापयतिप्प्रजानन्त्सनोरयिः
सर्व्ववीरन्नियच्छतुस्वाहा।।२४।। व्वाजस्यनु। प्प्रवसऽआबभूवेमाचव्विश्श्वाभुवनानिसर्व्वतः।।
सनेमिराजापरियातिव्विद्द्वान्प्रजाम्पुष्टिंव्वर्द्धयमानोऽअस्म्मेस्वाहा।।२५।। सोमःराजानम्।
सोमःराजानमवसेग्ग्निमन्न्वारभामहे।। आदित्त्यान्व्विष्ष्णुःसूर्य्यम्ब्रह्म्माणञ्चबृहस्प्पति७

स्वाहा।।२६।। अर्य्यमणम्बृहस्प्पतिम्।। अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानायचोदय।।
व्वाचंव्विष्णुꣳसरस्वतीᳪसवितारञ्चव्वाजिनᳪस्वाहा।।२७।। अग्ग्नेऽअच्छ।। अग्ग्नेऽ
अच्छावदेहनꣳप्प्रतिनꣳसुमनाभव।। प्रनोयच्छसहस्रजित्त्वꣳहिधनदाऽअसिस्वाहा।।२८।। प्रनः।।
प्रनोयच्छत्त्वर्य्यमाप्प्रपूषाप्प्रबृहस्प्पतिः।। प्रवाग्ग्देवीददातुनꣳस्वाहा।।२९।। देवस्यंत्त्वा।
सवितुः प्प्रसवेशिश्वनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्याम्।। सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रियेदधामि
बृहस्प्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ।।३०।। (८-५) अग्निरेकाक्षरेण। प्चणमुद
जयत्तमुज्जेषमश्विनौद्व्यक्षरेणद्विपदोमनुष्ष्यानुदजयतान्तानुज्जेषंव्विष्णुस्त्र्यक्षरेणत्रीँल्लोकानु
दजयत्तानुज्जेषꣳसोमश्च्चतुरक्षरेणचतुष्प्पदꣳपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्षरेण।।३१।।
पूषापञ्चाक्षरेण।। पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविताषडक्षरेणषड्तूनुद
जयत्तानुज्जेषम्मरुतःसप्प्ताक्षरेणसप्प्तग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्प्पतिरष्टाक्षरेणगाय
त्त्रीमुदजयत्तामुज्जेषम्मित्त्रोनवाक्षरेण।।३२।। मित्त्रोनवाक्षरेण। त्त्रिवृतᳪस्तोममुदजयत्तमुज्जेषं

व्वरुणोदशाक्षरेणव्विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेणत्त्रिष्टुभमुदजयत्तामुज्जेषंव्विश्श्वेदे
वाद्द्वादशाक्षरेणजगतीमुदजयँस्तामुज्जेषंव्वसवस्त्रयोदशाक्षरेण।।३३।। व्वसवस्त्रयोदशाक्षरेण।
त्त्रयोदशꣳस्तोममुदजयँस्तमुज्जेषꣳरुद्द्राश्च्चतुर्द्दशाक्षरेणचतुर्द्दशꣳस्तोममुदजयँस्तमुज्जेषमादित्त्याः
पञ्चदशाक्षरेणपञ्चदशꣳस्तोममुदजयँस्तमुज्जेषमदितिःषोडशाक्षरेणषोडशꣳस्तोममुदजयत्तमु
ज्जैषम्प्रजापतिःसप्प्तदशाक्षरेणसप्प्तदशꣳस्तोममुदजयत्तमुज्जेषम्।।३४।। (४–६) एषते।
निर्ऋतेभागस्तञ्जुषस्वस्वाहग्ग्निनेत्त्रेब्भ्योदेवेब्भ्यः पुरःसद्भ्यःस्वाहायमनेत्त्रेब्भ्योदेवेब्भ्योदक्षिणा
सद्भ्यःस्वाहाव्विश्श्वदेवनेत्त्रेब्भ्योदेवेब्भ्यः पश्च्चात्त्सद्भ्यस्वाहामित्त्रावरुणनेत्त्रेब्भ्योवामरुन्नेत्त्रे
ब्भ्योवादेवेब्भ्यऽउत्तरासद्भ्यःस्वाहासोमनेत्त्रेब्भ्योदेवेब्भ्यऽउपरिसद्भ्योदुवस्वद्भ्यःस्वाहा।।३५।।
ये देवाः।। येदेवाऽअग्ग्निनेत्त्राःपुरःसदस्त्तेब्भ्यःस्वाहायेदेवायमनेत्त्रादक्षिणासदस्त्तेब्भ्यःस्वाहाये
देवाव्विश्श्वदेवनेत्त्राःपश्च्चात्त्सदस्त्तेब्भ्यःस्वाहायेदेवामित्त्रावरुणनेत्त्रावामरुन्नेत्त्रावोत्त्तरासदस्त्ते
ब्भ्यःस्वाहायेदेवाःसोमनेत्त्राऽउपरिसदोदुवस्वन्तस्त्तेब्भ्यःस्वाहा।।३६।। अग्ग्नेसहस्व।। अग्ग्ने सह

स्वपृतनाऽअभिमातीरपास्य।। दुष्टरस्तरन्नरातीर्व्वर्च्चोधायज्ञवाहसि।।३७।। देवस्यत्त्वा। सवितु॒ प्प्रसवेशिवनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्।। उपाᳫशोर्व्वीर्य्येणजुहोमिहतᳬरक्षःस्वाहारक्ष सान्त्वाव्वधायावधिष्म्मरक्षोवधिष्म्मामुमसौहत॒।।३८।। (४-७) सविताात्त्वा। सवानाᳫ सुवतामग्ग्निर्गृहपतीनाᳫसोमोव्वनस्प्पतीनाम्।। बृहस्प्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्र॒ पशुब्भ्योमित्र॒सत्त्योव्वरुणोधर्म्मपतीनाम्।।३९।। इमन्देवाः।। इमन्देवाऽअसपत्नᳬ सुवद्ध्वम्महतेक्षत्त्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय।। इमममुष्ष्यपुत्त्रममुष्ष्यैपुत्त्र मस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्म्मणानाᳫराजा।।४०।। (२-८)।। इतिश्रीवाजसनेय संहितायांनवमोऽध्यायः।।९।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। अपोदेवाश्चतस्रः, सोमस्यत्विषिः पञ्चा, वेष्टादन्दशूकाः सप्त, सोमस्यत्वाचतस्र, ऽइन्द्रस्यव्वज्रः पञ्च, स्योनासिचतस्रः, सविऋप्रसवित्रैका, शिवभ्यांपच्यस्वचतस्रो, ष्टौचतुस्रिᳬशत् (अ.१० मं. ३४ अनु. ८) हरिःॐ।। राष्ट

अपोदेवाः।। अपोदेवामधुमतीरगृब्भणन्नूर्ज्जस्वतीराजस्वश्चिच्चतानाः।। याभिम्मित्रावरुणाव

ब्भ्यषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्यरातीः।। १।। व्वृष्ष्णऽऊर्म्मिः।। व्वृष्ष्णऽऊर्म्मिरसिराष्ट्ट्र

दाराष्ट्ट्रम्मेदेहिस्वाहाव्वृष्ष्णऽऊर्म्मिरसिराष्ट्ट्रदाराष्ट्ट्रममुष्मैदेहिव्वृषसेनोसिराष्ट्ट्रदाराष्ट्ट्रम्मेदे

हिस्वाहाव्वृषसेनोसिराष्ट्ट्रदाराष्ट्ट्रममुष्मैदेह्यर्त्थेतस्त्थ।।२।। अर्त्थेतस्त्थ। राष्ट्ट्रदाराष्ट्ट्रम्मेदत्त

स्वाहार्त्थेतस्त्थराष्ट्ट्रदाराष्ट्ट्रममुष्मैदत्तौजस्वतीस्त्थराष्ट्ट्रदाराष्ट्ट्रम्मेदत्तस्वाहौजस्वतीस्त्थरा

ष्ट्ट्रदाराष्ट्ट्रममुष्मैदत्तापः परिवाहिणीस्त्थराष्ट्ट्रदाराष्ट्ट्रम्मेदत्तस्वाहापः परिवाहिणीस्त्थराष्ट्ट्र

दाराष्ट्ट्रममुष्मैदत्तापाम्पतिरसिराष्ट्ट्रदाराष्ट्ट्रम्मेदेहिस्वाहापाम्पतिरसिराष्ट्ट्रदाराष्ट्ट्रममुष्मै

देह्यपाङ्गर्ब्भोसिराष्ट्ट्रदाराष्ट्ट्रम्मेदेहिस्वाहापाङ्गर्ब्भोसिराष्ट्ट्रदाराष्ट्ट्रममुष्मैदेहिसूर्य्यत्त्वचसस्त्थ

।।३।। सूर्य्यत्त्वचसस्त्थ। राष्ट्ट्रदाराष्ट्ट्रम्मेदत्तस्वाहासूर्य्यत्त्वचसस्त्थराष्ट्ट्र दाराष्ट्ट्रममुष्मैदत्त

सूर्य्यवर्च्चसस्त्थराष्ट्ट्रदाराष्ट्ट्रम्मेदत्तस्वाहासूर्य्यवर्च्चसस्त्थराष्ट्ट्रदाराष्ट्ट्र ममुष्मैदत्तमान्दास्त्थ

राष्ट्ट्रदाराष्ट्ट्रम्मैदत्तस्वाहामान्दास्त्थराष्ट्ट्रदाराष्ट्ट्रममुष्मैदत्तव्व्रजक्षितस्त्थराष्ट्ट्रदाराष्ट्ट्रम्मेदत्त

स्वाहाव्व्रजक्षितस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तव्वाशास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाव्वाशास्त्थ
राष्ट्रदाराष्ट्रममुष्म्मैदत्तशविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रम
मुष्म्मैदत्तशक्क्वरीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशक्क्वरीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तजनभृतस्त्थ
राष्ट्रदाराष्ट्रम्मेदत्तस्वाहाजनभृतस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तव्विश्श्वभृतस्त्थराष्ट्रदाराष्ट्रम्मे
दत्तस्वाहाव्विश्श्वभृतस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापःस्वराजस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्त।।
मधुमतीर्म्मधुमतीभिःपृच्च्यन्ताम्महिक्षत्रङ्क्षत्रियायव्वन्न्वानाऽअनाधृष्टाःसीदतसहौजसोमहिक्षत्र
ङ्क्षत्रियायदधती।।४।।(४-१) शतम् ।।४००।।

सोमस्यत्त्विषिः।। सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात्।। अग्ग्नयेस्वाहासोमायस्वाहासवित्त्रे
स्वाहासरस्वत्त्यैस्वाहापूष्ष्णेस्वाहाबृहस्प्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्श्लोकायस्वाहाꣳ
शायस्वाहाभगायस्वाहार्य्यम्म्णेस्वाहा।।५।। पवित्त्रेस्त्थः।। पवित्त्रेस्त्थोव्वैष्णव्व्यौसवितुर्व्वः
प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिम्भिः।। अनिभृष्ट्टमसिव्वाचोबन्धुस्त्तपोजाः

सोमस्यदात्रमसिस्वाहाराजस्वः॥६॥ सधमादोद्युम्न्निनीः॥ सधमादोद्युम्न्निनीरापऽएताऽ
अनाधृष्टाऽअपस्योव्वसानाः॥ पस्त्यासुचक्क्रेव्वरुणःसधस्त्थमपाᳩशिशुर्म्मातृतमास्वन्तः॥७॥
क्षत्रस्योल्बम्॥ क्षत्रस्योल्बमसिक्षत्रस्यजराय्वसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्य
व्वार्त्रघ्नमसिमित्रस्यासिव्वरुणस्यासित्वयायंव्वृत्रंव्वधेत्॥ दृबासिरुजासिक्षुमासि॥
पातैनम्चञ्चम्पातैनम्प्रत्त्यञ्चम्पातैनन्तिर्य्यञ्चन्दिग्भ्यःपात॥८॥ आविर्म्मर्य्याः॥
आविर्म्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रोव्वृद्धश्रवाऽआवित्तौमित्रावरुणौधृतव्रतावा
वित्तःपूषाव्विश्वववेदाऽआवित्तेद्यावापृथिवीव्विश्वशम्भुवावावित्तादितिरुरुशर्म्मा॥९॥ (५–
२) अवेष्टादन्दशूकाः॥ अवेष्टादन्दशूकाःप्चचीमारोहगायत्रीत्त्वावतुरथन्तरᳫसामत्रिवृत्त्स्तोमो
व्वसन्तऽऋतुर्ब्रह्मद्रविणन्दक्षिणामारोह॥१०॥ दक्षिणामारोह। त्रिष्टुप्प्त्वावतुबृहत्त्साम
पञ्चदशस्तोमोग्रीष्मऽऋतुःक्षत्रन्द्रविणम्प्रतीचीमारोह॥११॥ प्रतीचीमारोह। जगतीत्त्वावतुव्वै
रूपᳫसामसप्प्तदशस्तोमोव्वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह॥१२॥ उदीचीमारोहा। नुष्ट्टु

प्प्त्वावतुव्वैराजꣳसामैकविꣳशस्तोमः शरदृतुः फलन्द्रविणमूद्ध्वामारोह ।।१३।। ऊद्ध्वामारोह।

पङ्क्तिस्त्वावतुशाक्क्वररैवतेसामनीत्त्रिणवत्त्रयस्त्रिꣳशौस्तोमौहेमन्तशिशिरावृतूव्वर्च्चोद्द्रविण

म्प्रत्त्यस्तन्नमुचेःशिरः ।।१४।। सोमस्यत्त्विशिः।। सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात् ।।

मृत्त्योःपाह्योजोसिसहोस्यमृतमसि।।१५।। हिरण्ण्यरूपाऽउषसः।। हिरण्ण्यरूपाऽउषसोव्विरोक

ऽउभाविन्द्राऽउदिथःसूर्य्यश्च्च।। आरोहतंव्वरुणमित्त्रगर्त्तन्ततश्च्चक्षाथामदितिन्दितिञ्च्चमित्त्रोसि

व्वरुणोसि।।१६।। (७–३) सोमस्यत्त्वा। द्द्युम्म्नेनाभिषिञ्च्चाम्म्यग्ग्नेर्ब्भ्राजसासूर्य्यस्य

व्वर्च्चसेन्द्रस्येन्द्रियेण।। क्षत्त्राणाङ्क्षत्त्रपतिरेद्ध्यतिदिद्द्यून्पाहि।।१७।। इमन्देवाः।। इमन्देवाऽ

असपत्त्नꣳसुवद्ध्वम्महतेक्षत्त्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय।। इमममुष्य्यपुत्त्र

ममुष्य्यैपुत्त्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्म्मणानाꣳराजा।।१८।। प्रपर्व्वतस्य।

व्वृषभस्यपृष्ठान्नावश्च्चरन्तिस्वसिचऽइयानाः।। ताऽआववृत्त्रन्नधरागुदक्क्ताऽअहिम्बुद्ध्न्यम्

मनुरीयमाणाः।। व्विष्ण्णोर्व्विक्क्रमणमसिव्विष्ण्णोर्व्विक्क्रान्तमसिव्विष्ण्णोःक्क्रान्तमसि

।।१९।। प्रजापतेन। त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिता बभूव।। यत्त्कामास्त्तेजुहुमस्त्तन्नोऽ अस्त्त्वयममुष्ष्यपितासावस्यपिताव्वयꣳस्यामपतयोरयीणाꣳ स्वाहा।। रुद्द्रयत्तेक्क्रिविपरन्ना मतस्म्मिन्हुतमस्यमेष्ट्ट्रमसिस्वाहा।।२०।। (४-४)

इन्द्रस्यव्वज्ज्रः।। इन्द्रस्यव्वज्ज्रोसिमित्त्रावरुणयोस्त्त्वाप्प्रशास्त्रोः प्प्रशिषायुनज्ज्मि ।। अव्व्यथायै त्त्वास्वधायैत्त्वारिष्ट्टोऽअर्ज्जुनोमरुताम्प्रसवेनजयापाममन सासमिन्द्रियेण।।२१।। मातेे।। मातऽइन्द्रतेव्वयन्तुराषाडयुक्क्तासोऽअब्ब्रह्म्मताव्विदसाम।। तिष्ठ्ठारथमधियंव्वज्ज्रहस्त्तारश्म्मी न्देवयमसेस्वश्श्वान्।।२२।। अग्ग्नयेगृहपतये।। अग्ग्नयेगृहपतयेस्वाहासोमायव्वनस्प्पतये स्वाहामरुतामोजसेस्वाहेन्द्रस्येन्द्रियायस्वाहा।। पृथिविमातर्म्मा माहिꣳसीर्म्मोऽअहन्त्वाम्।।२३।। हꣳसः शुचिषत्।। हꣳसः शुचिषद्द्वसुरन्तरिक्षसद्द्धोताव्वेदिषदतिथिर्द्दुरोणसत्।। नृषद्द्वरसदृत सद्द्व्योमसदब्ब्जागोजाऽऋतजाऽअद्द्रिजाऽऋतम्बृहत्।।२४।। इयदसि।। इयदस्यायुरस्यायुर्म्मयिधे हियुङ्ङसिव्वर्च्चोसिव्वर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि।। इन्द्रस्यवांव्वीर्य्यकृतोबाहूऽअभ्युपाव

हरामि।।२५।। (५-५) स्योनासि। सुषदासिक्षत्रस्ययोनिरसि।। स्योनामासीदसुषदामासीदक्षत्रस्य योनिमासीद।।२६।। निषसाद। धृतव्व्रतोव्वरुणऽपस्त्त्यास्वा।। साम्म्राज्ज्यायसुक्क्रतु॒ः।।२७।। अभिभूरसि।। अभिभूरस्येतास्त्तेपञ्चदिशः कल्प्पन्ताम्ब्रह्म्मँस्त्वम्ब्रह्म्मासिसवितासिसत्त्यप्प्रस वोव्वरुणोसिसत्त्यौजाऽइन्द्रोसिव्विशौजारुद्द्रोसिसुशेवः।। बहुकारश्श्रेयस्क्करभूयस्क्करेन्द्रस्य व्वज्ज्रोसितेनमेरद्ध्या।।२८।। अग्निः पृथुः।। अग्ग्निः पृथुर्द्धर्म्मणस्प्पतिर्ज्जुषाणोऽअग्ग्निः पृथुर्द्धर्म्मणस्प्पतिराज्ज्यस्यव्वेतुस्वाहास्वाहाकृताऽसूर्य्यस्य रश्म्मिभिर्य्यतद्ध्वऽसजातानाम्मद्ध्य मेष्ठ्याय।।२९।। (४-६) सवित्त्राप्प्रसवित्त्रा। सरस्वत्त्याव्वाचा त्त्वष्ट्ट्रारूपैः पूष्ष्णापशुभिरिन्द्रेणास्म्मेबृहस्प्पतिनाब्ब्रह्म्मणाव्वरुणेनौजसाग्ग्निातेजसासोमेनराज्ञा व्विष्ष्णुनादशम्म्यादेवतयाप्प्रसूतऽप्प्रसर्प्पामि।।३०।। (१-७) अश्श्विबभ्याम्पचच्च्यस्व।। अश्श्विबभ्याम्पचच्च्यस्वसरस्वत्त्यैपचच्च्यस्वेन्द्रायसुत्त्राम्म्णेपचच्च्यस्व।। व्वायुः पूतः पवित्त्रेणप्प्रत्त्य ङ्क्सोमोऽअतिस्रुतः।। इन्द्रस्ययुज्ज्यऽसखा।।३१।। कुविदङ्ग। यवमन्तोयवञ्चिद्द्यथादान्त्यनु

पूर्व्वंव्वियूय।। इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्क्तिँय्यजन्ति।। उपयामगृहीतोस्य
शिश्वबभ्यान्त्वासरस्वत्त्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णे।।३२।। युवꣳसुरामम्।। युवꣳसुराममश्शिवनान
मुंचावासुरेसचा।। व्विपिपानाशुंभस्प्पतीऽइन्द्रङ्कर्म्मस्वावतम्।।३३।। पुत्त्रमिंवपितरौ।। पुत्त्रमिंव
पितरांवशिश्वनोभेन्द्रावथुःकाव्व्यैर्द्दꣳसनाभिः।। यत्त्सुरामंव्व्यपिबःशचीभिःसरस्वतीत्त्वाम
घवन्नभिष्ण्णक्।।३४।। (४–८) इतिश्रीवाजसनेयसंहितायांदशमोऽध्यायः।।१०।।
श्रीवेदपुरुषायनमः। अनुवाकसूत्रम्। युञ्जानएकादश, प्रतूर्त्तंव्वाजिन्षोडश, देवस्यत्वादशा,
पोदेवीर्द्वादशा, पोह्योकादशा, दितिष्ट्वापञ्चा, कूतिमग्निमष्टादश, सप्तत्र्यशीतिः।। (अ.११ मं.
८३ अनु. ७) ।। हरिःॐ।। युञ्जानꣳप्प्रथमम्।। युञ्जानꣳप्प्रथमम्मनस्तत्त्वायसविताधियं।।
अग्ग्नेज्ज्योतिर्न्निचाय्यपृथिव्व्याऽअद्ध्याभरत्।।१।। युक्क्तेनमनसा। व्वयन्देवस्यसवितुꣳसवे।।
स्वर्ग्ग्यायशक्क्त्या।।२।। युक्क्त्वायसविता। देवान्त्स्वर्य्यतोधियादिवम्।। बृहज्ज्योतिः
करिष्ष्यतꣳसवितापप्रसुवातितान्।।३।। युञ्जतेमनः।। युञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्राव्वि

प्प्रस्यबृहतोव्विपश्श्चितः।। व्विहोत्राँदधेव्वयुनाविदेकऽइन्न्महीदेवस्यसवितुः परिष्टुतिः।।४।। युजेवाम्।। युजेवाम्ब्रह्मपूर्व्यन्नमोभिर्व्विश्श्लोकऽएतुपत्थ्येवसूरेः।। शृण्वन्तुव्विश्श्वेऽअमृतस्यपुत्राऽआयेधामानिदिव्व्यानितस्त्थुः।।५।। यस्यप्प्रयाणम्।। यस्यप्प्रयाणमन्न्वन्न्यऽइद्द्ययुर्देवादेवस्यमहिमानमोजसा।। यःपार्त्थिवानिव्विममेसऽएतशोरजाᳪसिदेवःसविता महित्त्वना।।६।। देवसवितः।। देवसवितःप्प्रसुवयज्ज्ञम्प्रसुवयज्ज्ञपतिम्भगाय।। दिव्व्योगन्धर्व्वः केतपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वाचन्नःस्वदतु।।७।। इमन्नः।। इमन्नोदेवसवितर्य्यज्ज्ञम्प्रणय देवाव्व्यᳪसखिविदᳪसत्राजितन्धनजितᳪस्वर्ज्जितम्।। ऋचास्तोमᳪसमर्द्धयगायत्रेण रथन्तरम्बृहद्गायत्रवर्त्तनिस्वाहा।।८।। देवस्यत्त्वा। सवितुःप्प्रसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।। आददेगायत्रेणच्छन्दसाङ्गिरस्वत्पृथिव्व्याःसधस्त्थादग्ग्निम्पुरीष्यमङ्गिरस्वदा भरत्त्रैष्टुभेनच्छन्दसाङ्गिरस्वत्।।९।। अब्भ्रिरसि।। अब्भ्रिरसिनार्य्यसित्त्वयाव्वयमग्ग्निᳬशकेम खनितुᳪसधस्त्थऽआ।। जागतेनच्छन्दसाङ्गिरस्वत्।।१०।। हस्तऽआधाय। सविताबिब्भ्रदब्भ्रिᳪ

हिरण्ण्ययीम्।। अग्ग्नेर्ज्ज्योतिर्न्निचाय्य्यपृथिव्व्याऽअद्ध्याभरदानुष्ट्टुभेनच्छन्दसाङ्गिर स्वत्।।११।। (११-१) प्रतूर्त्तंव्वाजिन्।। प्रतूर्त्तंव्वाजिन्नाद्द्रवव्वरिष्ट्ठामनुसंव्वतम्।। दिवितेजन्म्मपरम मन्तरिक्षेतवनाभिः पृथिव्व्यामधियोनिरित्।।१२।। युञ्जाथाᳬरासभम्।। युञ्जाथाᳬरासभय्युव मस्म्मिन्न्यामेव्वृषण्णवसू।। अग्ग्निम्भरन्तमस्म्मयुम्।।१३।। योगेयोगेतवस्तरम्।। योगेयोगे तव स्त्तरंव्वाजेवाजेहवामहे।। सखायऽइन्द्रमूतये।।१४।। प्रतूर्व्वन्नेहि।। प्रतूर्व्वन्नेह्यवक्क्रामन्नशस्ती रुद्द्रस्यगाणपत्त्यम्मयोभूरेहि।। उर्व्वन्तरिक्षंव्वीहिस्वस्तिगव्व्यूतिरभयानिकृण्ण्वन्न्पूष्णणासयुजा सह।।१५।। पृथिव्व्याःसधस्त्थात्।। पृथिव्व्याःसधस्त्थादग्ग्निम्पुरीष्ष्यमङ्गिरस्वदाभराग्ग्नि म्पुरीष्ष्यमङ्गिरस्वदच्छेमोग्ग्निम्पुरीष्ष्यमङ्गिरस्वद्द्भरिष्ष्यामः।।१६।। अन्न्वग्ग्निः।। अन्न्वग्ग्निरुष सामग्ग्रमक्ख्यदन्न्वहानिप्प्रथमोजातवेदाः।। अनुसूर्य्यस्यपुरुत्त्राचरश्म्मीननुद्द्यावापृथिव्वीऽ आततन्थ।।१७।। आगत्त्यव्वाजी।। आगत्त्यव्वाज्ज्यद्ध्वानꣳसर्व्वामृधोव्विधूनुते।। अग्ग्निꣳसधस्त्थे महतिचक्क्षुषानिचिकीषते।।१८।। आक्क्रम्म्यव्वाजिन्।। आक्क्रम्म्यव्वाजिन्न्पृथिवीमग्ग्निमिच्छ

रुचात्त्वम्।। भूम्म्यांव्वृत्त्वायनोब्ब्रूहियतꣳखनेमतंव्वयम्।।१९।। द्यौस्ते।। पृष्ठ्ठम्पृथिवीसधस्त्थ

मात्क्मान्तरिक्षꣳसमुद्द्रोयोनिः।। व्विक्ख्यायचक्षुषात्त्वमभितिष्ठ्ठपृतन्न्यतः।।२०।। उत्त्क्राम।

महतेसौभगायास्म्मादास्त्थानाद्द्रविणोदाव्वाजिन्।। व्वयꣳस्यामसुमतौपृथिव्व्याऽअग्निङ्खनन्त

ऽउपस्त्थेऽअस्याः।।२१।। उदक्क्रमीत्।। उदक्क्रमीद्द्रविणोदाव्वाज्ज्यर्व्वाकꣳसुलोकꣳसुकृतम्पृथि

व्व्याम्।। ततःखनेमसुप्प्रतीकमग्ग्निꣳस्वोरुहाणाऽअधिनाकमुत्तमम्।।२२।। आत्त्वा। जिघर्म्मिमन

साघृतेनप्प्रतिक्षियन्तम्भुवनानिव्विश्श्वा।। पृथुन्तिरश्च्चाव्वयसाबृहन्तंव्व्यचिष्ठ्ठ मन्नैरभसन्दृशा

नम्।।२३।। आविश्श्वतः। प्प्रत्त्यञ्चञ्जिघम्म्र्यर्रक्षसामनसातज्जुषेत।। मर्य्यश्श्रीस्प्पृहयद्द्वर्ण्णो

ऽअग्निर्न्नाभिमृशेतन्न्वाजब्भुराणः।।२४।। परिवाजपतिः।। परिवाजपतिꣳकविरग्ग्निर्हव्व्यान्न्यक्क्र

मीत्।। दधद्द्रत्न्कानिदाशुषे।।२५।। परित्त्वा। ग्ग्नेपुरंव्वयंव्विप्प्रꣳसहस्यधीमहि।। धृषद्द्वर्ण्णन्दिवे

दिवेहन्तारम्भङ्गुरावताम्।।२६।। त्वमग्ग्ने।। त्वमग्ग्नेद्द्युभिस्त्वमाशुशुक्षणिस्त्वमद्द्भ्यस्त्व

मश्म्मनस्प्परि।। त्वंव्वनेब्भ्यस्त्व मोषधीब्भ्यस्त्वन्नृणान्नृपतेजायसेशुचिः।।२७।। (१६–२)

देवस्यंत्त्वा। सवितुः प्प्रसवेशिश्वनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्।। पृथिव्व्याःसधस्त्थादग्ग्नि
म्पुरीष्यमङ्गिरस्वत्त्खनामि।।

ज्योतिष्म्मन्तन्त्वाग्ग्नेसुप्प्रतीकमजंस्रेणभानुनादीद्यतम्।। शिवम्प्रजाब्भ्योहिंसन्तम्पृथिव्व्याः
सधस्त्थादग्ग्निम्पुरीष्यमङ्गिरस्वत्त्खनाम।।२८।। अपाम्पृष्ठम्।। अपाम्पृष्ठमसियोनिरग्ग्नेः
समुद्रमभितपिन्न्वमानम्।। व्वर्द्धमानोमहाँ२।। ऽआचपुष्क्करेदिवोमात्त्रयाव्वरिम्म्णाप्प्रथस्व
।।२९।। शर्म्मच।। शर्म्मचस्त्थोव्वर्म्मचस्त्थोच्छिद्रेबहुलेऽउभे।। व्व्यचस्वतीसंव्वसाथाम्भृत
मग्ग्निम्पुरीष्यम्।।३०।। संव्वसाथाम्।। संव्वसाथास्वर्व्विदासमीचीऽउरसात्क्मना।।
अग्ग्निमन्तर्ब्भरिष्यन्तीज्ज्योतिष्म्मन्तमजंस्रमित्।।३१।। पुरीष्योसि। व्विश्श्वभराऽअथर्व्वात्त्वा
प्प्रथमोनिरमन्थदग्ग्ने।। त्वामग्ग्नेपुष्क्करादद्ध्यथर्व्वानिरमन्थत।। मूर्ध्नोव्विश्श्वस्यव्वाघतः
।।३२।। तमुंत्त्वा। दद्ध्यङ्ङृषिःपुत्त्रऽईधेऽअथर्व्वण।। व्वृत्रहणम्पुरन्दरम्।।३३।। तमुंत्त्वा।
पात्थ्योव्वृषासमीधेदस्युहन्तमम्।। धनञ्जयरणेरणे।।३४।। सीदहोत।। सीदहोतस्वऽउलोके

चिकित्त्वान्त्सादयायज्ञꣳसुकृतस्ययोनौ।। देवावीर्द्देवान्हविषायजास्यग्ग्नेबृहद्द्यजमानेव्वयोधाः
।।३५।। निहोता। होतृषदनेव्विदानस्त्त्वेषोदीदिवाँ२।। ऽअसदत्त्सुदक्षः।। अदब्ब्धव्व्रतप्प्रमतिर्व्व
सिष्ठꣳसहस्रम्भरःशुचिजिह्व्वोऽअग्ग्निः।।३६।। सꣳसीदस्व। महाँ२।। ऽअसिशोचस्वदेववीतमः
।। व्विधूममग्ग्नेऽअरुषम्मियेद्ध्यसृजप्प्रशस्त्तदर्शतम्।।३७।। (१०-३) अपोदेवीः।। अपोदेवीरुप
सृजमधुमतीरयक्ष्मायप्प्रजाब्भ्यः।। तासामास्त्थानादुज्जिहतामोषधयꣳसुपिप्पलाः।।३८।। सन्ते।
व्वायुर्म्मातरिश्श्वादधातूत्तानायाहृदयँय्यदिद्वकस्त्तम्।। योदेवानाञ्चरसिप्प्राणथेनकस्म्मैदेवव्व
षडस्त्तुतुब्भ्यम्।।३९।। सुजातोज्ज्योतिषा। सहशर्म्मव्वरूथमासदत्त्स्वः।। व्वासोऽअग्ग्नेव्विश्श्व
रूपꣳसंव्वययस्वव्विभावसो।।४०।। उदुतिष्ठ। स्वद्ध्वरावानोदेव्व्याधिया।। दृशेचभासाबृहता
सुशुक्क्वनिराग्ग्नेयाहिसुशस्त्तिभिः।।४१।। ऊद्ध्र्वऽऊषुणः।। ऊद्ध्र्वऽऊषुणऽऊतयेतिष्ठादेवोन
सविता।। ऊद्ध्र्वोव्वाजस्यसनितायदञ्जिभिर्व्वाघद्भिर्व्विह्व्वयामहे।।४२।। सजातः।। सजातो
गब्भोंऽअसिरोदस्योरग्ग्नेचारुर्व्विभृतऽओषधीषु।। चित्रःशिशुꣳपरितमाꣳस्यक्क्तून्प्रमातृब्भ्योऽ

अधिकनिक्क्रदद्द्राः।।४३।। स्थिरोभव। व्वीड्ड्वङ्गऽआशुर्ब्भवव्वाज्ज्यर्व्वन्।। पृथुर्ब्भवसुषदस्त्व मग्ग्नेः पुरीषवाहणः।।४४।। शिवोभव। प्प्रजाब्भ्योमानुषीब्भ्यस्त्वमङ्गिरः।। माद्द्यावापृथिवीऽ अभिशोचीर्म्मान्तरिक्षम्माव्वनस्प्पतीन्।।४५।। प्रैतु। व्वाजीकनिक्क्रदन्नानदद्द्रासभःपत्त्वा।। भरन्नग्ग्निम्पुरीष्ष्युम्मापाद्द्यायुषःपुरा।। व्वृषाग्ग्निंव्वृषणम्भरन्नपाङ्गर्ब्भःसमुद्द्रियम्।। अग्ग्नऽ आयाहिव्वीतये।।४६।। ऋतःसत्त्यम्।। ऋतःसत्त्यमृतःसत्त्यमग्ग्निम्पुरीष्ष्यमङ्गिरस्वद्द्भरामः।। ओषधयःप्प्रतिमोदद्ध्वमग्ग्निमेतःशिवमायन्तमब्भ्यत्त्रयुष्म्माः।। व्व्यस्यन्न्विश्श्वाऽअनिराऽ अमीवा निषीदन्नोऽअपदुर्म्मतिञ्जहि।।४७।। ओषधयःप्प्रति। गृब्भ्णीतपुष्प्पवतीः सुपिप्प्पलाः।। अयंव्वोगर्ब्भऽऋत्त्वियःप्प्रत्त्कःसधस्त्थमासदत्।।४८।। व्विपाजसा। पृथुनाशोशुचानोबाधस्व द्द्विषोरक्षसोऽअमीवाः।। सुशर्म्मणोबृहतःशर्म्मणिस्यामग्ग्नेरहःसुहवस्यप्प्रणीतौ ।।४९।। (१२-४) आपोहि। ष्ठामयोभुवस्त्तानऽऊर्ज्जेदधातन।। महेरणायचक्षसे।।५०।। योवः। शिवतमोर सस्त्तस्यभाजयतेहनः।। उशतीरिवमातरः।।५१।। तस्म्माऽअरम्।। तस्म्माऽअरङ्गमामवोयस्य

क्षयायजिन्वथ।। आपोजनयथाचनः।।५२।। मित्त्रःसꣳसृज्ज्य। पृथिवीम्भूमिञ्चज्ज्योतिषासह।।

सुजातञ्जातवेदसमयक्ष्मायत्त्वासꣳसृजामिप्प्रजाब्भ्यः।।५३।।

रुद्द्राःसꣳसृज्ज्य। पृथिवीम्बृहज्ज्योतिꣳसमीधिरे। तेषाम्भानुरजस्रऽइच्छुक्क्रोदेवेषुरोचते।।५४।।

सꣳसृष्टांव्वसुभिः।। सꣳसृष्टांव्वसुभीरुद्द्रैर्द्धीरैःकर्म्मण्ण्याम्मृदम्।। हस्त्ताब्भ्याम्मृद्द्वीङ्कृत्त्वा

सिनीवालीकृणोतुताम्।।५५।। सिनीवालीसुकपर्द्दा। सुकुरीरास्वौपशा।। सातुब्भ्यमदितेमह्यो

खान्दधातुहस्त्तयोः।।५६।। उखाङ्कृणोतु।। उखाङ्कृणोतुशक्क्त्याबाहुब्भ्यामदितिर्द्धिया।।

मातापुत्त्रँय्यथोपस्त्थेसाग्ग्निम्बिभर्त्तुगर्ब्भऽआ।। मखस्यशिरोसि।।५७।। व्वसवस्त्त्वा।।

कृण्ण्वन्तुगायत्त्रेणच्छन्दसाङ्गिरस्वद्ध्रुवासिपृथिव्व्यसिधारयामयिप्प्रजाꣳरायस्प्पोषङ्गौपत्त्यꣳसु

वीर्य्यꣳसजातान्न्यजमानायरुद्द्रास्त्त्वाकृण्ण्वन्तुत्त्रैष्ट्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधार

यामयिप्प्रजाꣳरायस्प्पोषङ्गौपत्त्यꣳसुवीर्य्यꣳसजातान्न्यजमानायादित्त्यास्त्त्वाकृण्ण्वन्तुजागतेन

च्छन्दसाङ्गिरस्वद्ध्रुवासिद्द्यौरसिधारयामयिप्प्रजाꣳरायस्प्पोषङ्गौपत्त्यꣳसुवीर्य्यꣳसजातान्न्यजमा

नायव्विश्श्वेत्त्वादेवाव्वैश्श्वानराꣳकृण्ण्वन्त्वानुष्ट्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदिशोसिधारयामयि

प्प्रजाꣳरायस्प्पोषङ्गौपत्त्यꣳसुवीर्य्यꣳसजातान्न्यजमानाय।।५८।। अदित्त्यैरास्न्ना।।

अदित्त्यैरास्न्नास्यदितिष्ट्टेबिलङ्गृब्भ्णातु।। कृत्त्वायसामहीमुखाम्मृन्मयींय्योनिमग्ग्नये।।

पुत्त्रेब्भ्यꣳप्प्रायच्छददितिꣳश्र्श्रपयानिति।।५९।। व्वसवस्त्त्वा। धूपयन्तुगायत्त्रेणच्छन्द

साङ्गिरस्वद्रुद्द्रास्त्त्वाधूपयन्तुत्त्रैष्ट्टुभेनच्छन्दसाङ्गिरस्वदादित्त्यास्त्त्वाधूपयन्तुजागतेनच्छन्दसाङ्गिरस्वद्

द्विश्श्वेत्त्वादेवाव्वैश्श्वानराधूपयन्त्वानुष्ट्टुभेनच्छन्दसाङ्गिरस्वदिन्द्रस्त्त्वाधूपयतुव्वरुणस्त्त्वाधूपयतुव्वि

ष्ण्णुस्त्त्वाधूपयतु।।६०।। (११-५) अदितिष्ट्ट्वा। देवीव्विश्श्वदेव्व्यावतीपृथिव्व्याꣳ

सधस्त्थेऽअङ्गिरस्वत्त्खनत्त्ववटदेवानान्त्वापत्त्नीर्द्देवीव्विश्श्वदेव्व्यावतीꣳपृथिव्व्याꣳसधस्त्थेऽअङ्गि

रस्वद्दधतूखेधिषणास्त्त्वादेवीर्व्विश्श्वदेव्व्यावतीꣳपृथिव्व्याꣳसधस्त्थेऽअङ्गिरस्वदभीन्धतामुखे

व्वरूत्त्रीष्ट्ट्वादेवीर्व्विश्श्वदेव्व्यावतीꣳपृथिव्व्याꣳसधस्त्थेऽअङ्गिरस्वच्छ्रपयन्तूखेग्ग्नास्त्त्वादेवीर्व्वि

श्श्वदेव्व्यावतीꣳपृथिव्व्याꣳसधस्त्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्त्वाच्छिन्नपत्त्राचदेवीर्व्विश्श्वदेव्व्या

वतीपृथिव्व्याऽसधस्त्थेऽअङ्गिरस्वत्त्पचन्तूखे।।६१।। मित्त्रस्यचर्षणीधृतः।। मित्त्रस्यचर्षणीधृतो
वोदेवस्यसानसि।। द्युम्म्नञ्चित्रश्र्श्रवस्तमम्।।६२।। देवस्त्वा। सवितोद्द्वपतुसुपाणिऽस्वङ्गुरिः
सुबाहुरुतशक्क्त्या।। अव्व्यथमानापृथिव्व्यामाशादिशऽआपृण।।६३।। उत्त्थायबृहती। भवोदुति
ष्ठुद्द्ध्रुद्धुवात्त्वम्।। मित्त्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषामाभेदि।।६४।। व्वसवस्त्वा ।।
व्वसवस्त्वाच्छृन्दन्तुगायत्त्रेणच्छन्दसाङ्गिरस्वद्रुद्द्रास्त्वाच्छृन्दन्तुत्त्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्त्या
स्त्वाच्छृन्दन्तुजागतेनच्छन्दसाङ्गिरस्वद्विश्श्वेत्त्वादेवाव्वैश्श्वानराऽआच्छृन्दन्त्वानुष्ट्टुभेनच्छन्द
साङ्गिरस्वत्।।६५।। (५-६) आकूतिमग्ग्निम्।। आकूतिमग्ग्निम्प्रयुजꣳस्वाहामनोमेधामग्ग्नि
म्प्रयुजꣳस्वाहाचित्तंव्विज्ञातमग्ग्निम्प्रयुजꣳस्वाहाव्वाचोव्विधृतिमग्ग्निम्प्रयुजꣳस्वाहाप्प्रजापत
येमनवेस्वाहाग्ग्नयेव्वैश्श्वानरायस्वाहा।।६६।। व्विश्श्वोदेवस्य। नेतुर्म्मर्त्तोव्वुरीतसक्ख्यम्।।
व्विश्श्वोरायऽइषुद्व्यतिद्द्युम्म्नंव्वृणीतपुष्ष्यसेस्वाहा।।६७।। मासु। भित्त्थामासुरिषोम्बधृष्णु
व्वीरयस्वसु।। अग्ग्निश्च्चेदङ्करिष्ष्यथ।।६८।। दृꣳहस्वदेवि। पृथिविस्वस्तयऽआसुरीमाया

स्वधयाकृतासि।। जुष्टन्देवेभ्यऽइदमस्तुहव्व्यमरिष्टात्त्वमुदिहियज्ञेऽअस्म्मिन्।।६९।। दृव्वन्नः

सर्प्पिरासुतिः। प्प्रत्नोहोताव्वरेण्ण्यः।। सहसस्प्पुत्रोऽअद्भूतः।।७०।। शतम्।।५००।। परस्या

ऽअधि। संव्वतोवराँ२।। ऽअभ्यातर।। यत्राहमस्म्मिताँ२।। ऽअव।।७१।। परमस्याः परावतः।।

परमस्याःपरावतोरोहिदश्श्वऽइहागहि।। पुरीष्ष्यःपुरुप्प्रियोग्ग्नेत्त्वन्तरामृधः।।७२।। यदग्ग्ने।।

यदग्ग्नेकानिकानिचिदातेदारूणिदद्ध्मसि ।। सर्व्वन्तदस्तुतेघृतन्तज्जुषस्वय विष्ठ्ठ्य।।७३ ।।

यदत्ति।। यदत्त्युपजिह्व्वकायद्व्रम्म्रोऽअतिसर्प्पति।। सर्व्वन्तदस्तुतेघृतन्तज्जुषस्वयविष्ठ्य ।।७४।।

अहरहरप्प्रयावम्।। अहरहरप्प्रयावम्भरन्तोश्श्वायेवतिष्ठ्ठतेघासमस्म्मै।। रायस्प्पोषेणसमिषाम

दन्तोग्ग्नेमातेप्प्रतिवेशारिषाम।।७५।। नाभापृथिव्व्याः। समिधानेऽअग्ग्नौरायस्प्पोषाय

बृहतेहवामहे।। इरम्मदम्बृहदुक्क्थँय्यजत्त्रञ्जेतारमग्ग्निम्पृतनासुसासहिम्।।७६।। याःसेनाः।।

याःसेनाऽअभीत्त्वरीराव्व्याधिनीरुगणाऽउत।। येस्त्तेनायेचतस्क्कारास्त्ताँस्त्तेऽअग्ग्नेपिदधाम्म्यास्ये

।।७७।। दꣳष्ट्राब्भ्याम्मलिम्म्लून्।। दꣳष्ट्राब्भ्याम्मलिम्म्लूञ्जम्भ्यैस्त्तस्क्कराँ२।।ऽउत।।

हनुभ्याᳪस्त्तेनान्भगवस्त्ताँस्त्वञ्ज्ञादसुखादितान्।।७८।। येजनेषु। मलिम्म्लवस्त्तेनासस्त्तस्क्वरा व्वने।। येकक्षेष्ष्वघायवस्त्ताँस्त्तेदधामिजम्भयोः।।७९।। योऽअस्म्मब्भ्यम्।। योऽअस्म्मब्भ्यम रातीयाद्यश्च्चनोद्द्वेषतेजनः।। निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्व्वन्तम्मस्म्मसाकुरु।।८०।। सᳪशितम्मे।। सᳪशितम्मेब्ब्रह्म्मसᳪशितंव्वीर्य्यम्बलम्।। सᳪशितक्षत्त्रञ्जिष्णुयस्याहमस्म्मि पुरोहितः।।८१।। उदेषाम्।। उदेषाम्बाहूऽअतिरमुद्द्वर्च्चोऽअथोबलम्।। क्षिणोमिब्ब्रह्म्मणा मित्त्रानुन्नयामिस्वाँ२।।ऽअहम्।।८२।। अन्नपतेन्नस्य। नोहेह्यनमीवस्यशुष्म्मिणः।। प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्प्पदे।।८३।। (१८-७) इतिश्रीवाजसनेयसंहितायाम् एकादशोऽध्यायः।।११।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। दृशानःसप्तदश, दिवस्परिद्वादश, समिधाग्निंपंचदशा। पेतसप्तदशा, सुन्वन्तमयजमानंत्रयोदश, याऽओषधीः सप्तविᳪशति, मामाषोडश, सप्तसप्तदशᳪशतम्। (अ. १२ मं. ११७ अनु. ७) हरिः ॐ।। दृशानोरुक्क्मः।। दृशानोरुक्क्मऽउर्व्याव्व्यद्यौदुर्म्मर्षमायुःश्श्रियेरुचानः।। अग्निरमृतोऽ

अभवद्द्वयोर्भिर्य्यदेनन्द्यौरजनयत्त्सुरेताः।।१।। नक्क्तोषासासमनसा।। नक्क्तोषासासमनसाव्विरूपे
धापयेतेशिशुमेकंꣳसमीची।।द्यावाक्षामारुक्क्मोऽअन्तर्व्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः
।।२।। व्विश्श्वारूपाणि।। व्विश्श्वारूपाणिप्प्रतिमुञ्चतेकविःप्प्रासावीद्द्भद्रन्द्द्विपदेचतुष्प्पदे।।
व्विनाकमक्ख्यत्त्सविताव्वरेण्ण्योनुप्प्रयाणमुषसोव्विराजति।।३।। सुपण्र्णोसि। गरुत्त्माँस्त्रिवृत्ते
शिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ।। स्तोमऽआत्त्माच्छन्दाꣳस्यङ्गानियजूꣳषिनाम।। सामतेतनूर्व्वाम
देव्व्यँय्यज्ञायज्ञियम्पुच्छन्धिष्ण्ण्याः शफाः।। सुपण्र्णोसिगरुत्त्मान्दिवङ्गच्छस्वःपत।।४।। व्विष्ण्णो
ꣳक्क्रमः।। व्विष्ण्णोꣳक्क्रमोसिसपत्त्नहागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्क्रमस्वव्विष्ण्णोꣳक्क्र
मोस्यभिमातिहात्त्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनुविक्क्रमस्वव्विष्ण्णोꣳक्क्रमोस्यरातीयतोहन्ताजागत
ञ्छन्दऽआरोहदिवमनुविक्क्रमस्वव्विष्ण्णोꣳक्क्रमोसिशत्त्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनु
विक्क्रमस्व।।५।। अक्क्रन्ददग्निः।। अक्क्रन्ददग्निस्त्तनयन्निवद्द्यौःक्षामारेरिहद्द्वीरुधः समञ्जन्।।
सद्द्योजज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्त्यन्तः।।६।। अग्ग्नेभ्भ्यावर्त्तिन्।। अग्ग्नेभ्भ्या

वर्त्तिन्नभिमानिवर्त्तस्वायुषाव्वर्च्चसाप्प्रजयाधनेन।। सन्न्यामेधयारय्यापोषेण।।७।। अग्ग्नेऽ

अङ्गिरः। शतन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः।। अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृधि

पुनर्न्नोरयिमाकृधि।।८।। पुनरूर्ज्जा। निवर्त्तस्वपुनरग्ग्नऽइषायुषा।। पुनर्न्नःपाह्यꣳहसः।।९।।

सहरय्या। निवर्त्तस्वाग्ग्नेपिन्न्वस्वधारया।। व्विश्श्वप्प्स्न्याव्विश्श्वतस्प्परि।।१०।। आत्त्वा।

हार्षमन्तरभूद्द्ध्रुवस्तिष्ठाविचाचलिः।। व्विशस्त्त्वासर्व्वाव्वाञ्छन्तुमात्त्वद्राष्ट्रमधिभ्रशत्।।११।।

उदुत्तमम्।। उदुत्तमम्व्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳश्रथाय।। अथाव्वयमादित्त्यव्व्रतेतवा

नागसोऽअदितयेस्याम।।१२।। अग्ग्रेबृहन्।। अग्ग्रेबृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्जगन्वान्तमसो

ज्योतिषागात्।। अग्ग्निर्भानुनारुशतास्वङ्गऽआजातोव्विश्श्वासद्मान्न्यप्प्राः।।१३।। हꣳसः

शुचिषत्।। हꣳसःशुचिषद्वसुरन्तरिक्षसद्धोताव्वेदिषदतिथिर्द्दुरोणसत्।। नृषद्वरसदृतसद्व्योम

सदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत्।।१४।। सीदत्त्वम्।। सीदत्त्वम्मातुरस्याऽउपस्त्थेव्वि

श्श्वान्न्यग्ग्नेव्वयुनानिव्विद्द्वान्।। मैनान्तपसामार्च्चिषाभिशोचीरन्तरस्याꣳशुक्क्रज्ज्योतिर्व्विभाहि

।।१५।। अन्तरंग्ग्नो। रुचात्त्वमुखाया सदनेस्वे। तस्यास्त्वहरंसातपञ्जातवेदशिवोभव।।१६।।
शिवोभूत्त्वा। मह्यमग्ग्नेऽअथोसीदशिवस्त्त्वम्।। शिवाकृत्त्वादिश सर्व्वा स्वँय्योनिमिहासद
।।१७।। (१७-१) दिवस्प्परि। प्प्रथमञ्जज्ञेऽअग्ग्निरस्म्मद्द्वितीयम्परिजातवेदा।। तृतीयम
प्प्सुनृमणाऽअजस्स्रमिन्धानऽएनञ्जरतेस्वाधी।।१८।। व्विद्द्मातें।। विद्द्मातेऽअग्ग्नेत्त्रेधात्त्र
याणिव्विद्द्मातेधामव्विभृतापुरुत्त्रा।। विद्द्मातेनामपरमङ्गुहायद्विद्द्मातमुत्त्सँय्यतऽआजगन्थ
।।१९।। समुद्द्रेत्त्वा। नृमणाऽअप्प्स्वन्तर्नृचक्षाऽईधेदिवोऽअग्ग्नऽऊधन्।। तृतीयेत्त्वारजसितस्त्थिवा
समपामुपस्त्थेमहिषाऽअवर्द्धन्।।२०।। अक्क्रन्ददग्ग्नि।। अक्क्रन्ददग्ग्निस्त्तनयन्निवद्द्यौ
क्षामारेरिहद्द्वीरुध समञ्जन्।। सद्द्योजज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्त्यन्त
।।२१।। श्रीणामुदार।। श्रीणामुदारोधरुणोरयीणाम्मनीषाणाम्प्रर्प्पण सोमगोपा।। व्वसु सूनु
सहसोऽअप्प्सुराजाव्विभात्त्यग्ग्रऽउषसामिधान।।२२।। व्विश्श्वस्यकेतु।। व्विश्श्वस्यकेतु
र्ब्भुवनस्यगर्ब्भऽआरोदसीऽअपृणाज्जायमान।। वीडुञ्चिदद्द्रिमभिनत्त्परायञ्जनायदग्ग्निमयजन्त

पश्च्॥२३॥ उशिक्क्पावकः॥ उशिक्क्पावकोऽअरतिःसुमेधामर्त्तेष्ष्वग्निरमृतोनिधायि॥
इयर्त्तिधूममरुषम्भरिब्भ्रदुच्छुक्क्रेणशोचिषाद्द्यामिनक्षन्॥२४॥ दृशानोरुक्क्मः॥ दृशानोरुक्क्म
ऽउर्व्व्याव्व्यद्द्यौदुर्म्मर्षमायुःश्श्रियेरुचानः॥ अग्निरमृतोऽअभवद्द्वयोभिर्य्यदेनन्द्यौरजन
यत्सुरेताः॥२५॥ यस्ते॥ यस्तेऽअद्द्यकृणवद्भद्द्रशोचेपूपन्देवघृतवन्तमग्ने॥ प्रतन्नयप्प्रतर
व्वस्योऽअच्छाभिसुम्म्नन्देवभक्क्तँय्यविष्ठ॥२६॥ आतम्॥ आतम्भजसौश्श्रवसेष्ष्वग्न
ऽउक्क्थऽउक्क्थऽआभजशस्यमाने॥ प्प्रियःसूर्य्येप्प्रियोऽअग्नाभवात्त्युज्जातेनभिनदद्दुज्जनित्वैः
॥२७॥ त्वामग्ने॥ त्वामग्नेयजमानाऽअनुद्द्यून्विश्श्वाव्वसुदधिरेव्वार्य्याणि॥ त्वयासहद्द्र
विणमिच्छमानाव्व्रजङ्गोमन्तमुशिजोव्विवव्व्रुः॥२८॥ अस्ताव्व्यग्निः॥ अस्ताव्व्यग्निर्न्नरा७
सुशेवोव्वैश्श्वानरऽऋषिभिःसोमगोपाः॥ अद्द्वेषेद्द्यावापृथिवीहुवेमदेवाधत्तरयिमस्म्मेसुवीरम्
॥२९॥ (१२-२) समिधाग्निम्॥ समिधाग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम्॥ आस्मिन्हव्
व्याजुहोतन ॥३०॥ उदुत्त्वा॥ उदुत्त्वाव्विश्श्वेदेवाऽअग्नेभरन्तुचित्तिभिः॥ सनोभवशिवस्त्वः

सुप्प्रतीकोव्विभावसुः।।३१।। प्रेत्।। प्रेदग्ग्नेज्ज्योतिष्म्मान्न्याहिशिवेभिरच्चिर्भिष्ट्वम्।।
बृहद्द्भिर्ब्भानुभिर्ब्भासन्न्माहिᳪसीस्त्तन्न्वाप्प्रजाः।।३२।। अक्क्रन्ददग्ग्निः।। अक्क्रन्ददग्ग्निस्स्तन
यन्निवद्द्यौःक्षामारेरिहद्द्वीरुधः समञ्जन्।। सद्द्योजज्ज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभानुना
भात्त्यन्तः।।३३।। प्रप्प्रायम्।। प्रप्प्रायमग्ग्निर्ब्भरतस्स्यशृण्ण्वेव्वियत्त्सूर्य्योनरोचतेबृहद्भाः।।
अभियःपूरुम्पृतनासुतस्त्थौदीदायदैव्व्योऽअतिथिःशिवोनः।।३४।। आपोदेवीः।। आपोदेवीः
प्प्रतिगृब्भ्णीतभस्स्मैतत्त्स्योनेकृणुद्ध्वᳪसुरभाऽउलोके।। तस्स्मैनमन्ताञ्जनयःसुपत्न्नीर्म्मातेव
पुत्त्रम्बिभृताप्प्स्वेनत्।।३५।। अप्प्स्वग्ग्ने।। अप्प्स्वग्ग्नेसधिष्ट्टवसौषधीरनुरुद्ध्यसे।।
गर्ब्भेसञ्जायसेपुनः।।३६।। गर्ब्भोऽअसि।। गर्ब्भोऽअस्योषधीनाङ्गर्ब्भोव्वनस्प्पतीनाम्।।
गर्ब्भोव्विश्श्वस्स्यभूतस्स्याग्ग्नेगर्ब्भोऽअपामसि।।३७।। प्रसद्द्यभस्स्मना।। प्रसद्द्यभस्स्म
नायोनिमपश्च्चपृथिवीमग्ग्ने।। सᳪसृज्ज्यमातृभिष्ट्ट्वञ्ज्योतिष्म्मान्पुनरासदः।।३८।।
पुनरासद्द्य।। पुनरासद्द्यसदनमपश्च्चपृथिवीमग्ग्ने।। शेषेमातुर्य्यथोपस्त्थेन्तरस्स्याᳬशिवतमः

।।३९।। पुनरूर्जा। निवर्त्तस्वपुनरग्गनऽइषायुषा।। पुनर्न्नःपाह्यꣳहसः।।४०।। सहरय्या।
निवर्त्तस्वाग्ग्नेपिन्न्वस्वधारया।। व्विश्श्वप्स्न्याव्विश्श्वतस्प्परि।।४१।। बोधामे।
ऽअस्यव्वचसोयविष्ठुमꣳहिष्ठस्यप्प्रभृतस्यस्वधावः।। पीयतित्त्वोऽअनुत्त्वोगृणातिव्वन्दारुष्टे
तन्न्वंव्वन्देऽअग्ग्ने।।४२।। सबोधि। सूरिर्म्मघवाव्वसुपतेव्वसुदावन्।। युयोद्ध्यस्म्मद्द्वेषा७
सिव्विश्श्वकर्म्मणेस्वाहा।।४३।। पुनस्त्त्वा। दित्त्यारुद्द्राव्वसवः समिन्धताम्पुनर्ब्ब्रह्म्माणोव्व
सुनीथयज्ञैः।। घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः।।४४।। (१५-३) अपेत।।
अपेतव्वीतव्विचसर्प्पतातोयेत्त्रस्त्थपुराणायेचनूतनाः।। अदाद्द्यमोवसानम्पृथिव्व्याऽअक्क्रन्नि
मम्पितरोलोकमस्म्मै।।४५।। सँज्ञानमसि। कामधरणम्मयितेकामधरणम्भूयात्।। अग्ग्नेर्ब्भस्म्मा
स्यग्ग्नेःपुरीषमसिचितस्त्थपरिचितऽऊद्ध्र्वचितःश्रयद्ध्वम्।।४६।। अयꣳसः।। अयꣳसोऽ
अग्गिनर्य्यस्मिन्त्सोममिन्द्रःसुतन्दधेजठरेव्वावशानः।। सहस्त्रियंव्वाजमत्त्यन्नसप्प्तिꣳसस
वान्त्सन्त्स्तूयसेजातवेदः।।४७।। अग्ग्नेयत्।। अग्ग्नेयत्तेदिविव्वर्च्चःपृथिव्व्याँय्यदोष

धीष्ष्वप्प्स्वायजत्र।। येनान्तरिक्षमुर्व्वाततन्थत्त्वेषःसभानुरर्ण्णवोनृचक्षाः।।४८।। अग्ग्नेदिवः।।
अग्ग्नेदिवोऽअर्ण्णमच्छाजिगास्यच्छादेवाँ२।। ऽऊचिषेधिष्ण्याये।। यारोचनेपरस्तात्त्सूर्य्यस्य
याश्च्चावस्तादुपतिष्ठन्तऽआपः।।४९।। पुरीष्ष्यासोऽअग्ग्नयः। प्प्रावणेभिःसजोषसः।।
जुषन्ताँय्यज्ञमद्द्रुहोनमीवाऽइषोमहीः।।५०।। इडामग्ग्ने। पुरुदꣳसꣳसनिङ्गोःशश्श्वत्तमꣳ
हवमानायसाध।। स्यान्नःसूनुस्तनयोव्विजावाग्ग्नेसातेसुमतिर्ब्भूत्त्वस्म्मे।।५१।। अयन्ते।।
अयन्तेयोनिर्ऋत्त्वियोयतोजातोऽअरोचथाः।। तञ्जानन्नग्ग्नऽआरोहाथानोव्वर्द्धयारयिम्।।५२।।
चिदसि।। चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीद।।५३।।
लोकम्पृण। च्छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम्।। इन्द्राग्ग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनावसीषदन्
।।५४।। ताऽअस्य।। ताऽअस्यसूददोहसःसोमꣳश्रीणन्तिपृश्न्नयः।। जन्मन्देवानांव्विशस्त्रिष्ष्वा
रोचनेदिवः।।५५।। इन्द्रंव्विश्श्वाः।। इन्द्रंव्विश्श्वाऽअवीवृधन्त्समुद्रव्व्यचसङ्गिरः।। रथीतमꣳ
रथीनांव्वाजानाꣳसत्त्पतिम्प्पतिम्।।५६।। समितम्।। समितꣳसङ्कल्प्पेथाꣳसम्प्प्रियौरोचिष्ष्णू

सुमनस्यमानौ।। इषमूर्ज्जमभिसंव्वसानौ।।५७।। संवाम्।। संवाम्मनाᳬसिसंव्रतासमुचित्तान्न्याकरम्।। अग्ग्नेपुरीष्ष्याधिपाभवत्त्वान्नऽइषमूर्ज्जँय्यजमानायधेहि।।५८।। अग्ग्नेत्त्वम्।। अग्ग्नेत्त्वम्पुरीष्ष्योरयिमान्पुष्ट्टिमाँ२।। ऽअसि।। शिवाᳬकृत्त्वादिशᳬसर्व्वाᳬस्वँय्योनिमिहासदᳬ।।५९।। भवतन्नᳬ।। भवतन्नᳬसमनसौसचेतसावरेपसौ।। मायज्ञᳬहिᳬसिष्ट्टम्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्द्यनᳬ।।६०।। मातेवपुत्त्रम्।। मातेवपुत्त्रम्पृथिवीपुरीष्ष्यमग्ग्निᳬस्वेयोनावभारुखा।। तांव्विश्श्वैर्द्देवैर्ऋतुभिᳬसंविदानᳬप्प्रजापतिर्व्विश्श्वकर्म्माव्विमुञ्चतु।।६१।। (१७-४) असुन्न्वन्तमयजमानम्।। असुन्न्वन्तमयजमानमिच्छस्त्तेनस्येत्त्यामन्न्विहितस्क्करस्य।। अन्न्यमस्म्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु।।६२।। नमᳬसुते।। नमᳬसुतेनिर्ऋतेतिग्ग्मतेजोयस्म्मयंव्विचृताबन्धमेतम्।। यमेनत्त्वँय्यम्म्यासंविदानोत्तमेनाकेऽअधिरोहयैनम्।।६३।। यस्यास्त्ते। घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय।। यान्त्वाजनोभूमिरितिप्प्रमन्दतेनिर्ऋतिन्त्वाहम्परिवेदव्विश्श्वतᳬ।।६४।। यन्ते। देवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम्।।

तन्तेव्विष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतः।। नमोभूत्त्यैयेदञ्चकार।।६५।। निवेशनः सङ्गमनः।। निवेशनःसङ्गमनोव्वसूनांव्विश्श्वारूपाभिचष्ट्टेशचीभिः।। देवऽइवसवितासत्त्य धर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम्।।६६।। सीरायुञ्जन्ति। कवयोयुगाव्वितन्न्वतेपृथक्।। धीरादेवेषुसुम्म्नया।।६७।। युनक्क्तसीरा।। युनक्क्तसीराव्वियुगातनुद्ध्वङ्कृतेयोनौव्वपतेहबीजम्।। गिराचश्श्रुष्ट्टिःसभराऽअसन्नोनेदीयऽइत्सृण्ण्यः पक्क्वमेयात्।।६८।। शुनःसु। फालाव्विकृषन्तु भूमिःशुनङ्कीनाशाऽअभियन्तुव्वाहैः।। शुनासीराहविषातोशमानासुपिप्पलाऽ ओषधीःकर्त्तनास्म्मे ।।६९।। घृतेनसीता।। घृतेनसीतामधुनासमज्ज्यतांव्विश्श्वैर्द्देवैरनुमतामरुद्भिः।। ऊर्ज्जस्वती पयसापिन्न्वमानास्म्मान्त्सीतेपयसाब्भ्याववृत्त्स्व।।७०।। लाङ्गलम्पवीरवत्।। लाङ्गलम्पवीरवत्सु शेवःसोमपित्त्सरु।। तदुद्द्वपतिगामविम्प्रफर्व्व्यञ्चपीवरीम्प्रस्त्थावद्द्रथवाहणम्।।७१।। कामङ्काम दुघे। धुक्क्ष्वमित्त्रायव्वरुणायच।। इन्द्रायाश्श्विब्भ्याम्पूष्ष्णेप्प्रजाब्भ्यऽओषधीब्भ्यः ।।७२।। व्विमुच्च्यद्ध्वम्।। व्विमुच्च्यद्ध्वमग्घ्न्यादेवयानाऽअगन्न्मतमसस्प्पारमस्य।। ज्योतिरापाम।।७३।।

सजूरब्दः॥ सजूरब्दोऽअयवोभिः सजूरुषाऽअरुणीभीः॥ सजोषसावश्विनादꣳसोभिः सजूः सूरऽ एतशेनसजूर्वैश्वानरऽइडयाघृतेनस्वाहा॥७४॥ (१३-५) याऽओषधीः॥ याऽओषधीः पूर्वाजातादेवेभ्यस्त्रियुगम्पुरा॥ मनैनुबभ्रूणामहꣳशतन्धामानिसप्तच॥७५॥ शतंवः॥ शतंवोऽअम्बधामानिसहस्रमुतवोरुहः॥ अधाशतक्रत्त्वोयूयमिमम्मेऽअगदङ्कृत॥७६॥ ओषधीः प्रति। मोदद्ध्वम्पुष्पवतीः प्रसूवरीः॥ अश्वाऽइवसजित्त्वरीर्वीरुधःपारयिष्ण्वः॥७७॥ ओषधीरिति। मातरस्तद्वोदेवीरुपब्ब्रुवे॥ सनेयमश्श्वङ्गांव्वासऽआत्मानन्तवपूरुष॥७८॥ अश्वत्थेवः॥ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता॥ गोभाजऽइत्किलासथयत्सनवथ पूरुषम्॥७९॥ यत्रौषधीः। समग्मतराजानः समिताविव॥ व्विप्रः सऽउच्च्यतेभिषग्रक्षोहामीव चातनः॥८०॥ अश्वावतीꣳसोमावतीम्॥ अश्वावतीꣳसोमावतीमूर्ज्जयन्तीमुदोजसम्॥ आवित्त्सिसर्व्वाऽओषधीरस्माऽअरिष्टतातये॥८१॥ उच्छुष्माः॥ उच्छुष्माऽओषधीनाङ्गा वोगोष्ठादिवेरते॥ धनꣳसनिष्ष्यन्तीनामात्त्मानन्तवपूरुष॥८२॥ इष्कृतिर्नाम। वोमाताथोयूयꣳ

स्त्थनिष्कृती॑।। सीरा॒प॑तत्त्रिणी॑स्त्थनयदामय॑तिनिष्कृ॑थ।।८३।। अतिविश्श्वा॑÷। परिष्ठ्ठास्त्तेनऽ

इ॑वव्व्रजम॑क्क्रमु॑।। ओष॑धीप्प्राचु॑च्च्यवुर्य्यत्त्किञ्च॑तन्न्वो॒रप॑÷।।८४।। यदिमा॒।। यदिमाव्वाज

य॑न्नहमोष॑धीर्हस्त्त॑ऽआदधे।। आत्त्मायक्ष्म॑स्यनश्श्यतिपुराजी॑वगृभो॑यथा।।८५।। यस्यौषधी॑।

प्प्रसर्प्पथाङ्ग॑मङ्गम्परु॑ष्प्परु॑।। ततोयक्ष्म॑व्विबा॑धद्ध्वऽउग्ग्रोम॑द्ध्यमशीरि॑व।।८६।। साकँय्य॑क्ष्म।।

साकँय्य॑क्ष्मप्प्रप॑तचाषे॑णकिकिदीविना॑।। साकंव्वात॑स्यद्ध्राज्ज्या॑साकन्न॑श्श्यनिहाक॑या।।८७।।

अन्न्याव॑÷।। अन्न्यावो॑ऽअन्न्याम॑वत्त्वन्न्यान्न्यस्याऽउपा॑वत।। ता॒सर्व्वा॑÷संविदानाऽइदम्मेप्प्राव॑ता

व्वच॑÷।।८८।। या॒फलिनी॑।। या॒फलिनीर्य्याऽअ॑फलाऽअ॑पुष्प्पायाश्च्च॑पुष्प्पिणी॑।।

बृहस्प्पति॑प्प्रसूतास्त्तानो॑मुञ्चन्त्वꣳह॑स॑।।८९।। मुञ्चन्तु॑मा। शपत्थ्या॒दथो॑व्वरुण्ण्यादुत।।

अथो॑यमस्यपड्ड्वी॑शात्त्सर्व्व॑स्म्माद्देवकिल्बिषात्।।९०।। अवपत॑न्तीरवदन्।। अवपत॑न्तीर

वदन्दिवऽओष॑धयस्प्परि॑।। यञ्जीवमश्न्नवा॑महैनसरि॑ष्ष्यातिपूरु॑ष॑।।९१।। याऽओष॑धी॑।।

याऽओष॑धी॒सोम॑राज्ञीर्ब्ब॑ह्व्वी॒शतवि॑चक्षणा॑।। तासा॑मसित्त्वमु॑त्तमारङ्कामा॑यशꣳहृदे।।९२।।

याऽओषधीः।। याऽओषधीःसोमराज्ञीर्व्विष्ठिताःपृथिवीमनु।। बृहस्प्पतिप्प्रसूताऽअस्यैसन्दत्त
व्वीर्य्यम्।।९३।। याश्च्च।। याश्च्चेदमुपशृण्ण्वन्तियाश्च्चदूरम्परागताः।। सर्व्वाः्सङ्गत्त्यव्वीरु
धोस्यैसन्दत्तव्वीर्य्यम्।।९४।। मावः।। मावोरिषत्त्खनितायस्म्मैचाहङ्खनामिवः।। द्विपाच्च
तुष्प्पादस्म्माकꣳसर्व्वमस्त्वनातुरम्।।९५।। ओषधयःसम्।। ओषधयःसमवदन्तसोमेनसहराज्ञा।।
यस्म्मैकृणोतिब्ब्राह्म्मणस्तꣳराजन्पारयामसि।।९६।। नाशयित्त्रीबलासस्य।। नाशयित्त्री बला
सस्यार्शसऽउपचितामसि।। अथोशतस्ययक्ष्माणाम्पाकारोरसिनाशनी।।९७।। त्वाङ्गन्धर्व्वाः।।
त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः।। त्वामोषधेसोमोराजाव्विद्द्वान्यक्ष्मादमुच्च्यत
।।९८।। सहस्वमे।। सहस्वमेअरातीःसहस्वपृतनायतः।। सहस्वसर्व्वम्पाप्मानꣳसहमानास्योषधे
।।९९।। दीर्ग्घायुस्त्ते।। दीर्ग्घायुस्त्तऽओषधेखनितायस्म्मैचत्त्वाखनाम्म्यहम्।। अथोत्त्वन्दीर्ग्घायु
र्ब्भूत्त्वाशतवल्शाव्विरोहतात्।।१००।। त्वमुत्तमा। स्योषधेतवव्वृक्षाऽउपस्त्तयः।। उपस्तिरस्तु
सोस्म्माकँय्योऽअस्म्माँ२।।ऽअभिदासति।।१०१।। (२७–६) मामा।। मामाहिꣳसीज्जनितायः

पृथिव्व्यायोवादिवꣳसत्त्यधर्म्माव्व्यानट्।। यश्च्चापश्च्चन्द्राः प्प्रथमोजजानकस्म्मैदेवायहविषा

व्विधेम।।१०२।। अब्भ्यावर्त्तस्व। पृथिवियज्ञेनपयसासह।। व्वपान्तेऽअग्ग्निरिषितोऽअरोहत्

।।१०३।। अग्ग्नेयत्।। अग्ग्नेयत्तेशुक्क्रँय्यच्चन्द्रँय्यत्त्पूतँय्यच्च्चयज्ञियम्।। तद्देवेब्भ्योभरामसि

।।१०४।। इषमूर्ज्जम्।। इषमूर्ज्जमहमितऽआदमृतस्ययोनिम्महिषस्यधाराम्।। आमागोषुव्विशत्त्वा

तनूषुजहामिसेदिमनिराममीवाम्।।१०५।। अग्ग्नेतव।। अग्ग्नेतवश्श्रवोव्वयोमहिब्भ्राजन्तेऽअर्च्च

योव्विभावसो।। बृहद्भानोशवसाव्वाजमुक्क्थ्थ्यन्दधासिदाशुषेकवे।।१०६।। पावकवर्च्चाꣳशुक्क्र

वर्च्चाः।। पावकवर्च्चाꣳशुक्क्रवर्च्चाऽअनूनवर्च्चाऽउदियर्षिभानुना।। पुत्त्रोमातराव्विचरन्नु

पावसिपृणक्षिरोदसीऽउभे।।१०७।। ऊर्ज्जोनपात्।। ऊर्ज्जोनपाज्जातवेदꣳसुशस्त्तिभिर्म्मन्दस्वधीति

भिर्हितः।। त्वेऽइषꣳसन्दधुर्ब्भूरिवर्प्पसश्चित्त्रोतयोव्वामजाताः।।१०८।। इरज्ज्यन्नग्ग्ने।

प्प्रथयस्वजन्तुभिरस्म्मेरायोऽअमर्त्त्य।। सदर्शतस्यव्वपुषोव्विराजसिपृणक्षिसानसिङ्क्रतुम्

।।१०९।। इष्क्कर्त्तारमद्ध्वरस्य।। इष्क्कर्त्तारमद्ध्वरस्यप्प्रचेतसङ्क्षयन्तꣳराधसोमहः।। रातिंव्वामस्य

सुभगाम्महीमिषन्दधासिसानसिꣳरयिम्।।११०।। ऋतावानम्महिषं। व्विश्श्वदर्शतमग्ग्निꣳ
सुम्म्नायदधिरेपुरोजनाः।। श्रुत्त्कर्ण्णꣳसप्प्रथस्त्तमन्त्वागिरादैव्व्यम्मानुषायुगा।।१११।। आप्प्या
यस्व।। आप्प्यायस्वसमेतुतेव्विश्श्वतः सोमव्वृष्ण्ण्यम्।। भवाव्वाजस्यसङ्गथे।।११२।। सन्ते।।
सन्तेपयाꣳसिसमुयन्तुव्वाजाःसंवृष्ण्ण्यान्न्यभिमातिषाहः।। आप्प्यायमानोऽअमृतायसोमदिवि
श्श्रवाꣳस्युत्तमानिधिष्ष्व।।११३।। आप्प्यायस्व। मदिन्तमसोमव्विश्श्वेभिरꣳशुभिः।। भवानः
सप्प्रथस्त्तमःसखाव्वृधे।।११४।। आते। व्वत्त्सोमनोयमत्त्परमाच्चित्त्सधस्त्थात्।। अग्ग्नेत्त्वाङ्का
मयागिरा।।११५।। तुब्भ्यन्ताऽ।। तुब्भ्यन्ताऽअङ्गिरस्त्तमव्विश्श्वाः सुक्षितयःपृथक्।।
अग्ग्नेकामाययेमिरे।।११६।। अग्ग्निःप्प्रियेषु।। अग्ग्निःप्प्रियेषुधामसुकामोभूतस्यभव्व्यस्य।।
सम्म्राडेकोव्विराजति।।११७।। (१६–७) इतिश्रीवाजसनेयसंहितायांद्वादशोऽध्यायः।१२।।
श्रीवेदपुरुषायनमः। अनुवाकसूत्रम्।। मयिगृह्णामिपंचदश, ध्रुवास्येकादश, मधुव्वाताऽ
एकादश, सम्यक्स्त्रवंतिनवे, मंमाषड, पांत्वैका,ऽयंपुरःपंच, सप्ताष्टापंचाशत् (अनु. ७ मं. ५८

अ. १३)।। हरिः ॐ।। मयि गृह्णामि।। मयिगृह्णाम्म्यग्ग्रेऽअग्निꣳरायस्प्पोषायसुप्प्रजास्त्वा
यसुवीर्य्याय।। मामुदेवताꣳसचन्ताम्।।१।। अपाम्पृष्ठम्।। अपाम्पृष्ठमसियोनिरग्ग्नेः
समुद्रमभितꣳपिन्न्वमानम्।। व्वर्द्धमानोमहाँ२।।ऽआचपुष्क्करेदिवोमात्त्रयाव्वरिम्म्णाप्प्रथस्व
।।२।। ब्रह्मयज्ञानम्।। ब्रह्मयज्ञानम्प्रथमम्पुरस्त्ताद्वद्विसीमतःसुरुचोव्वेनऽआवः।। सबुन्ध्याऽ
उपमाऽअस्यव्विष्ठाःसतश्च्चयोनिमसतश्च्चव्विवः।।३।। हिरण्ण्यगर्ब्भःसम्।। हिरण्ण्यगर्ब्भः
समवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत्।। सदाधार पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषा
व्विधेम।।४।। द्रप्प्सश्च्चस्क्कन्द। पृथिवीमनुद्यामिमञ्चयोनिमनुयश्च्चपूर्व्वः।। समानय्योनि
मनुसञ्चरन्तन्द्रप्प्सञ्जुहोम्म्यनुसप्प्तहोत्राः।।५।। नमोस्तु। सर्प्पेब्भ्योयेवेचपृथिवीमनु।।
येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः।।६।। याऽइषवः।। याऽइषवोयातुधानानाय्येवा
व्वनस्प्पतीँ१।। रनु। येवावटेषुशेरतेतेब्भ्यःसर्प्पेब्भ्योनमः।।७।। येवा।। येवामीरोचनेदिवोयेवा
सूर्य्यस्स्मरश्मिषु।। येषामप्प्सुसदस्कृतन्तेब्भ्यःसर्प्पेब्भ्योनमः।।८।। कृणुष्ष्वपाजः।। कृणुष्ष्वपाजः

प्प्रसितिन्नपृत्थ्वीँय्याहिराजेवामवाँ२।।ऽइभेन।। तृष्ष्वीमनुप्प्रसितिन्द्रूणानोस्त्तासिव्विद्ध्यरक्षसस्त्त

पिष्ट्ठै।।९।। तवबभ्भ्रमासः।। तवबभ्भ्रमासऽआशुयापतन्त्यनुस्प्पृशधृषताशोशुचान।। तपू

ष्ष्यग्ग्नेजुह्व्वापतङ्गानसन्दितोव्विसृजव्विष्ष्वगुल्क्का।।१०।। प्रतिस्प्पशः।। प्रतिस्प्पशो

व्विसृजतूर्ण्णितमोभवापायुर्व्विशोऽअस्याऽअदब्बध।। योनोदूरेऽअघशसोयोऽअन्त्यग्ग्नेमा

किष्ट्टेव्व्यथिरादधर्षीत्।।११।। उदग्ग्ने। तिष्ठुप्प्रत्त्यातनुष्ष्वन्न्युमित्त्राँ२।।ऽओषतात्तिग्ग्महेते।।

योनोऽअरातिसमिधानचक्क्रेनीचातन्धक्ष्यतसन्नशुष्क्कम्।।१२।। ऊद्ध्र्वोभव।। ऊद्ध्र्वोभव

प्प्रतिविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्वदैव्व्यान्न्यग्ग्ने।। अवस्त्थिरातनुहियातुजूनाञ्जा

मिमजामिम्प्रमृणीहिशत्त्रून्।। अग्ग्नेष्ट्ट्वातेजसासादयामि।।१३।। अग्ग्निर्म्मूर्द्धा।। दिवः

ककुत्त्पतिःपृथिव्व्याऽअयम्।। अपारेतासिजिन्न्वति।। इन्द्रस्यत्त्वौजसासादयामि।।१४।।

भुवोयज्ञस्य।। भुवोयज्ञस्यरजसश्च्चनेतायत्त्रानियुद्भिःसचसेशिवाभिः।। दिविमूर्द्धानन्दधिषे

स्वर्षाञ्जिह्व्वामग्ग्नेचकृषेहव्व्यवाहम्।।१५।। (१५-१) ध्रुवासि। धरुणास्त्तृताव्विश्श्व

कर्म्मणा।। मात्त्वासमुद्द्रऽउद्द्धीन्मासुपर्ण्णोव्व्यथमानापृथिवीन्दृ꣡ꣳहा।१६।। प्रजापतिष्ट्ट्वा।
सादयत्त्वपाम्पृष्ठ्ठेसमुद्द्रस्येमन्।। व्व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्व्यसि।।१७।। भूरसि।।
भूरसिभूमिरस्यदितिरसिव्विश्श्वधायाव्विश्श्वस्यभुवनस्यधर्त्री।। पृथिवीय्यच्छपृथिवीन्दृ꣡ꣳ
हपृथिवीम्माहिꣳसीः।।१८।। व्विश्श्वस्म्मैप्प्राणाय।। व्विश्श्वस्म्मैप्प्राणायापानायव्व्याना
योदानायप्प्रतिष्ठ्ठायैचरित्त्राय।। अग्ग्निष्ट्ट्वाभिपातुमह्यास्वस्त्याच्छर्द्दिषाशन्तमेनतयादेवतया
ङ्गिरस्वद्ध्रुवासीद।।१९।। काण्डात्त्काण्डात्त्प्ररोहन्ती।। काण्डात्त्काण्डात्त्प्ररोहन्तीपरुषꣳपरुषस्प्परि।।
एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच।।२०।। याशतेन। प्प्रतनोषिसहस्रेणव्विरोहसि।।
तस्यास्त्तेदेवीष्ट्टकेव्विधेमहविषाव्वयम्।।२१।। यास्त्ते।। यास्त्तेऽअग्ग्नेसूर्य्येरुचोदिवमातन्न्वन्ति
रश्म्मिभिः।। ताभिर्न्नोऽअद्द्यसर्व्वाभीरुचेजनायनस्कृधि।।२२।। यावः।। यावोदेवाꣳसूर्य्येरुचो
गोष्ष्वश्श्वेषुयारुचः।। इन्द्राग्ग्नीताभिꣳसर्व्वाभीरुचन्नोधत्तबृहस्प्पते।।२३।। व्विराड्ज्योतिः।।
व्विराड्ज्योतिरधारयत्त्स्वराड्ज्योतिरधारयत्।। प्रजापतिष्टट्वासादयतुपृष्ठ्ठेपृथिव्व्याज्ज्योतिष्म्म

तीम्।। व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानायव्विश्श्वञ्ज्योतिर्य्यच्छ।। अग्ग्निष्ट्टेधिपतिस्त्तया देवतयाङ्गिरस्वद्ध्रुवासीद।।२४।। मधुश्च्च।। मधुश्च्चमाधवश्च्चव्वासन्तिकावृतूऽअग्ग्नेरन्तः श्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्ग्नयःपृथङ्मज्ज्यैष्ठ्यायस व्व्रताः।। येऽअग्ग्नयःसमनसोन्तराद्यावापृथिवीऽइमे।। व्वासन्तिकावृतूऽअभिकल्प्पमानाऽइन्द्र मिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्।।२५।। अषाढासि।। अषाढासिसहमाना सहस्वारातीःसहस्वपृतनायतः।। सहस्रवीर्य्यासिसामाजिन्व।।२६।। (११–२) मधुव्वाताः।। मधुव्वाताऽऋतायतेमधुक्क्षरन्तिसिन्धवः।। माद्ध्वीर्न्नःसन्त्वोषधीः।।२७।।मधुनक्क्तम्।। मधुन क्क्तमुतोषसोमधुमत्त्पार्त्थिवꣳरजः।। मधुद्यौरस्त्तुनःपिता।।२८।। मधुमान्नः।। मधुमान्नो व्वनस्प्पतिर्म्मधुमाँ२।।ऽअस्त्तुसूर्य्यः।। माद्ध्वीर्ग्गावोभवन्तुनः।।२९।। अपाङ्गम्भन्। अपाङ्गम्भन्त्सीदमात्त्वासूर्य्योभिताप्प्सीन्माग्ग्निर्व्वैश्श्वानरः।। अच्छिन्नपत्त्राःप्प्रजाऽअनुवीक्क्ष स्वानुत्त्वादिव्व्याव्वृष्ट्टिःसचताम्।।३०।। त्रीन्त्समुद्द्रान्।। त्रीन्त्समुद्द्रान्त्समसृपत्त्स्वर्ग्गानपाम्पति

र्व्वृषभऽइष्टकानाम्।। पुरीषंव्वसानःसुकृतस्यलोकेतत्रगच्छयत्रपूर्व्वेपरेताः।।३१।। महीद्द्यौः।

पृथिवीचनऽइमँय्यज्ञम्मिमिक्षताम्।। पिपृतान्नोभरीमभिः।।३२।। व्विष्णोःकर्म्माणि।

पश्श्यतयतोव्व्रतानिपस्पशे।। इन्द्रस्ययुज्यःसखा।।३३।। ध्रुवासि।। धरुणेतोजज्ञेप्रथममेब्भ्यो

योनिब्भ्योऽअधिजातवेदाः।। सगायत्र्यात्रिष्टुभानुष्टुभाचदेवेब्भ्योहव्व्यंव्वहतुप्प्रजानन्।।३४।।

इषेराये। रमस्वसहसेद्द्युम्नऽऊर्ज्जेऽअपत्त्याय।। सम्म्राडसिस्वराडसिसारस्वतौत्त्वोत्सौप्प्रावताम्

।।३५।। अग्ग्नेयुक्क्ष्व।। अग्ग्नेयुक्क्ष्वाहियेतवाश्श्वासोदेवसाधवः।। अरंव्वहन्तिमन्न्यवे।।३६।।

युक्क्ष्वाहि। देवहूतमाँ२।।ऽअश्श्वाँ२।।ऽअग्ग्नेरथीरिव।। निहोतापूर्व्व्यःसदः।।३७।। (११-३)

सम्म्यक्स्रवन्ति। सरितोनधेनाऽअन्तर्हृदामनसापूयमानाः।। घृतस्यधाराऽअभिचाकशीमिहिरण्ण्य

योव्वेतसोमद्ध्येऽअग्ग्नेः।।३८।। ऋचेत्त्वा। रुचेत्त्वाभासेत्त्वाज्ज्योतिषेत्त्वा।। अभूदिदंव्विश्श्वस्य

भुवनस्यव्वाजिनमग्ग्नेर्व्वैश्श्वानरस्यच।।३९।। अग्ग्निर्ज्ज्योतिषा।। अग्ग्निर्ज्ज्योतिषा

ज्ज्योतिष्म्मान्रुक्क्मोव्वर्च्चसाव्वर्च्चस्वान्।। सहस्रदाऽअसिसहस्रायत्त्वा।।४०।। आदित्त्यङ्ग

र्ब्भम्।। आदित्त्यङ्गर्ब्भम्पयसासमङ्ग्धिसहस्रस्यप्प्रतिमांव्विश्श्वरूपम्।। परिवृङ्ग्धिहरसामाभिमꣳ
स्थाꣳशतायुषङ्कृणुहिचीयमानः।।४१।। व्वातस्यजूतिं। व्वरुणस्यनाभिमश्श्वञ्जज्ञानꣳसरिरस्य
मद्ध्ये।। शिशुन्नदीनाꣳहरिमद्द्रिबुद्ध्नमग्ग्नेमाहिꣳसीःपरमेव्व्योमन्।।४२।। अजस्रमिन्दुम्।।
अजस्रमिन्दुमरुषम्भुरण्ण्युमग्ग्निमीडेपूर्व्वचित्तिन्नमोभिः।। सपर्व्वभिर्ऋतुशःकल्प्पमानोगाम्माहिꣳ
सीरदितिंव्विराजम्।।४३।। व्वरूत्त्रीन्त्वष्टुः।। व्वरूत्त्रीन्त्वष्ट्टुर्व्वरुणस्यनाभिमविञ्जज्ञानाꣳ
रजसःपरस्म्मात्।। महीꣳसाहस्रीमसुरस्यमायामग्ग्नेमाहिꣳसीःपरमेव्व्योमन्।।४४।। योऽअग्ग्निः ।।
योऽअग्ग्निरग्ग्नेरद्ध्याजायतशोकात्पृथिव्व्याऽउतवादिवस्प्परि।। येनप्प्रजाव्विश्श्वकर्म्माजजानत
मग्ग्नेहेडःपरितेवृणक्क्तु।।४५।। चित्रन्देवानाम्।। चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्त्रस्य
व्वरुणस्याग्ग्नेः।। आप्प्राद्द्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्म्माजगतस्त्तस्त्थुषश्च्च।।४६।।
(९-४) इमम्मा। हिꣳसीर्द्विपादम्पशुꣳसहस्राक्षोमेधायचीयमानः।। मयुम्पशुम्मेधमग्ग्नेजुष
स्वतेनचिन्न्वानस्त्तन्न्वोनिषीद।। मयुन्तेशुगृच्छतुयन्द्द्विष्म्मस्त्तन्तेशुगृच्छतु।।४७।। इमम्मा।

हिँसीरेकशफम्पशुङ्कनिक्क्रदंव्वाजिनंव्वाजिनेषु।। गौरमारण्यमनुतेदिशामितेनचिन्न्वानस्त्तन्न्वो
निषीद।। गौरन्तेशुगृच्छतुयन्द्विष्ष्मस्त्तन्तेशुगृच्छतु।।४८।। इमँसाहस्रम्।। इमँसाहस्रँ
शतधारमुत्त्संव्व्यच्च्यमानँसरिरस्यमद्ध्ये।। घृतन्दुहानामदितिञ्जनायाग्नेमाहिँसीःपरमे
व्व्योमन्।। गवयमारण्यमनुतेदिशामितेनचिन्न्वानस्त्तन्न्वोनिषदिः।। गवयन्तेशुगृच्छतुयन्द्वि
ष्ष्मस्त्तन्तेशुगृच्छतु।।४९।। इममूर्णायुं। व्वरुणस्यनाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्प्पदाम्।।
त्वष्ट्टुःप्प्रजानाम्प्रथमञ्जनित्त्रमग्ग्नेमाहिँसीःपरमेव्व्योमन्।। उष्ट्ट्रमारण्यमनुतेदिशामितेन
चिन्न्वानस्त्तन्न्वोनिषीद।। उष्ट्ट्रन्तेशुगृच्छतुयन्द्विष्ष्मस्त्तन्तेशुगृच्छतु।।५०।। अजोहि।।
अजोह्यग्ग्नेरजनिष्ट्टशोकात्त्सोऽअपश्श्यज्जनितारमग्ग्रे।। तेनदेवादेवतामग्ग्रमायँस्त्तेनरोहमायन्नु
पमेद्ध्यासः।। शरभमारण्यमनुतेदिशामितेनचिन्न्वानस्त्तन्न्वोनिषीद।। शरभन्तेशुगृच्छतुयन्द्विष्ष्म
स्त्तन्तेशुगृच्छतु।।५१।। त्वँय्यविष्ठ। दाशुषोनॄँःपाहिशृणुधीगिरः।। रक्क्षातोकमुतत्क्मना।।५२।।
(६-५) अपान्त्वा। अपान्त्वेमन्त्सादयाम्म्यपान्त्वोद्द्मन्त्सादयाम्म्यपान्त्वाभस्म्मन्त्सादयाम्म्य

पान्त्वाज्ज्योतिंषिसादयाम्म्यपान्त्वायनेसादयाम्म्यर्ण्णवेत्त्वासदनेसादयामिसमुद्द्रेत्त्वासदनेसादया

मिसरिरेत्त्वासदनेसादयाम्म्यपान्त्वाक्क्षयेसादयाम्म्यपान्त्वासधिंषिसादयाम्म्यपान्त्वासदनेसाद

याम्म्यपान्त्वासधस्त्थेसादयाम्म्यपान्त्वायोनौसादयाम्म्यपान्त्वापुरीषेसादयाम्म्यपान्त्वापार्थसिसा

दयामिगायत्त्रेणत्त्वाच्छन्दसासादयामित्त्रैष्टुभेनत्त्वाच्छन्दसासादयामिजागतेनत्त्वाच्छन्दसासादयाम्

म्यानुष्टुभेनत्त्वाच्छन्दसासादयामिपाङ्क्तेनत्त्वाच्छन्दसासादयामि॥५३॥ (१-६)

अयम्पुरः॥ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तःप्प्राणायनोगायत्त्रीव्वासन्तीगायत्त्र्यै

गायत्त्रङ्गायत्त्रादुपाᳪशुरुपाᳪशोस्त्त्रिवृत्त्रिवृतोरथन्तरंव्वसिंष्ठऽऋषिंःप्प्रजापतिगृहीतयात्त्वया

प्प्राणङ्गृह्ण्णामिप्प्रजाब्भ्यः॥५४॥ अयन्दक्षिणा। व्विश्वकर्म्मातस्यमनोव्वैश्वकर्म्मण

ङ्ग्रीष्म्मोमानसस्त्त्रिष्टुब्ग्रैष्म्मीत्त्रिष्टुभःस्वारᳪस्वारादन्तर्य्यामोन्तर्य्यामात्त्पञ्चदशःपञ्चदशाद्बृहद्भर

द्द्वाजऽऋषिंःप्प्रजापतिगृहीतयात्त्वयामनोगृह्ण्णामिप्प्रजाब्भ्यः॥५५॥ अयम्पश्च्चात्॥ अय

म्पश्च्चाद्विश्श्वव्व्यचास्तस्यचक्क्षुर्व्वैश्श्वव्व्यचसंव्वर्षाश्च्चाक्क्षुष्य्योजगतीव्वार्षीजगत्त्याऽऋक

क्सम्मृक्क्सम्माच्छुक्क्रश्शुक्क्रात्त्सप्प्तदशस्सप्प्तदशाद्द्वैरूपञ्जमदग्ग्निर्ऋषिः प्प्रजापतिगृहीतया

त्त्वयाचक्षुर्गृह्णणामिप्प्रजाब्भ्यः।।५६।। इदमुत्तरात्त्।। इदमुत्तरात्त्स्वस्त्तस्यश्श्रोत्त्रꣳसौवꣳ

शरच्छ्रौत्र्यनुष्ट्टुप्प्शारद्द्यनुष्ट्टुभऽऐडमैडान्न्मन्थीमन्थिनऽएकविꣳशऽएकविꣳशाद्द्वैराजंव्विश्श्वा

मित्त्रऽऋषिः प्प्रजापतिगृहीतयात्त्वयाश्श्रोत्त्रङ्गृह्णणामिप्प्रजाब्भ्यः।।५७।। इयमुपरिमतिस्त्तस्यै

व्वाङ्मात्त्याहेमन्तोव्वाच्च्यश्पङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणा

त्त्रिणवत्त्रयस्त्रिꣳशौत्त्रिणवत्त्रयस्त्रिꣳशाब्भ्याꣳशाक्क्वररैवतेव्विश्श्वकर्म्मऽऋषिः प्प्रजापतिगृहीत

यात्त्वयाव्वाचङ्गृह्णणामिप्प्रजाब्भ्योलोकन्ताऽइन्द्रम्।।५८।। (५-७) इतिश्रीवाजसनेयसंहितायां

त्रयोदशोऽध्यायः।।१३।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। ध्रुवक्षितिर्षट्, सजूर्ऋतुभिर्द्विका,

मूर्द्ध्वाव्वयोद्विका, इन्द्राग्नीऽअव्यथमानाꣳषडा, युर्मेषडा, शुस्त्रिवृदेकाग्नेर्भागासिचतुष्कै,

कयाचतुष्का, ष्टाꣳकत्रिꣳशत् (अ. १४ मं. ३१ अनु. ८)।। हरिः ॐ।।

ध्रुवक्षितिर्द्ध्रुवयोनिः।। ध्रुवक्षितिर्द्ध्रुवयोनिर्द्ध्रुवासिद्ध्रुवँय्योनिमासीदसाधुया।। उक्ख्यस्यवेतु

म्प्रथमञ्जुषाणाश्शिवनाद्ध्वर्य्यूसादयतामिहत्त्वा।।१।। कुलायिनीघृतवती।। कुलायिनीघृतवती पुरन्धिस्योनेसीदसदनेपृथिव्व्याः।। अभित्त्वारुद्द्वाव्वसवोगृणन्त्विमाब्ब्रह्म्मपीपिहिसौभगाया श्शिवनाद्ध्वर्य्यूसादयतामिहत्त्वा।।२।। स्वैर्द्दक्क्षैः।। स्वैर्द्दक्क्षैर्द्दक्क्षपितेहसीददेवानाᳪसुम्म्नेबृहते रणाय।। पितेवैधिसूनवऽआसुशेवास्स्वावेशातन्न्वासंविशस्वाश्शिवनाद्ध्वर्य्यूसादयतामिहत्त्वा।।३।। पृथिव्व्याः पुरीषम्।। पृथिव्व्याः पुरीषमस्यप्प्सोनामतान्त्वाव्विश्श्वेऽअभिगृणन्तुदेवाः।। स्तोम पृष्ठाघृतवतीहसीदप्प्रजावदस्म्मेद्द्रविणायजस्वाश्शिवनाद्ध्वर्य्यूसादयतामिहत्त्वा।।४।। अदित्त्या स्त्त्वा। पष्ठेसादयाम्म्यन्तरिक्क्षस्यधत्र्त्रीव्विष्टम्भनीन्दिशामधिपत्क्नीम्भुवनानाम्।। ऊर्म्मिर्द्द्र प्प्सोऽअपामसिव्विश्श्वकर्म्मातऽऋषिरश्शिवनाद्ध्वर्य्यूसादयतामिहत्त्वा।।५।। शुक्क्रश्च्च।। शुक्क्रश्च्चशुचिश्च्चग्ग्रैष्म्मावृतूऽग्ग्नेरन्तश्श्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओष धयकल्प्पन्तामग्ग्नयपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः।। येऽअग्ग्नयसमनसोन्तराद्द्यावा पृथिवीऽइमे।। ग्ग्रैष्म्मावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रु

वेसीदतम् ।।६।। (६-१) सजूर्ऋतुभिः। सजूर्व्विधाभिःसजूर्देवैःसजूर्देवैर्व्वयोनाधैरग्ग्नयेत्त्वा व्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभिःसजूर्व्विधाभिःसजूर्व्वसुभिःसजूर्देवैर्व्वयो नाधैरग्ग्नयेत्त्वाव्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभिःसजूर्व्विधाभिःसजूरुद्रैःस जूर्देवै व्वयोनाधैरग्ग्नयेत्त्वाव्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभिःसजूर्व्विधाभिः सजूरादित्त्यैःसजूर्देवैर्व्वयोनाधैरग्ग्नयेत्त्वाव्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभिः सजूर्व्विधाभिःसजूर्व्विश्श्वैर्देवैःसजूर्देवैर्व्वयोनाधैरग्ग्नयेत्त्वाव्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादय तामिहत्त्वा।।७।। प्प्राणम्मे। पाह्यपानम्मेपाहिव्व्यानम्मेपाहिचक्क्षुर्म्मऽउर्व्व्याव्विभाहिश्श्रोत्त्रम्मे श्श्लोकय।। अपःपिन्वौषधीर्जिन्वद्द्विपादवचतुष्प्पात्त्पाहिदिवोव्वृष्ट्टिमेरय।।८।। (२-२) मूर्द्धाव्वयः। प्प्रजापतिश्च्छन्दःक्षत्त्रंव्वयोमयन्दञ्छन्दोव्विष्टम्भोव्वयोधिपतिश्च्छन्दोव्विश्श्व कर्म्मा व्वयःपरमेष्ठीच्छन्दोबस्त्तोव्वयोव्विवलञ्छन्दोव्वृष्णिर्व्वयोव्विशालञ्छन्दःपुरुषोव्वयस्त्त न्द्रञ्छन्दोव्व्याग्घ्रोव्वयोनाधृष्टञ्छन्दसिꣳहोव्वयश्च्छदिश्च्छन्दःपष्ठवाड्वयोबृहतीच्छन्दऽउक्क्षा

व्वयः॒ककुप्छन्दऽऋषभोव्वयः॒सतोबृहतीच्छन्दोनड्वान्वयः।।९।। अनड्वान्वयः। पङ्क्ति
श्च्छन्दोधेनुर्व्वयोजगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दोदित्त्यवाड्वयोव्विराट्छन्दꣳपञ्चाविर्व्वयो
गायत्रीच्छन्दस्त्रिवत्सोव्वयऽउष्णिक्क्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम्।।१०।।
(२-३) इन्द्राग्ग्नीऽअव्व्यथमानाम्।। इन्द्राग्ग्नीऽअव्व्यथमानामिष्टकान्दृꣳहतँय्युवम्।। पृष्ठेन
द्द्यावापृथिवीऽअन्तरिक्षञ्चव्विबाधसे ।।११।। व्विश्श्वकर्म्मात्त्वा। सादयत्त्वन्तरिक्षस्यपृष्ठेव्व्य
चस्वतीम्प्रथस्वतीमन्तरिक्षँय्यच्छान्तरिक्षन्दृꣳहान्तरिक्षम्माहिꣳसीः।। व्विश्श्वस्म्मैप्प्राणाया
पानायव्व्यानायोदानायप्प्रतिष्ठायैचरित्त्राय।। व्वायुष्ट्वाभिपातुमह्यास्वस्त्त्याच्छर्द्दिषाशन्तमेन
तयादेवतयाङ्गिरस्वद्ध्रुवासीद ।।१२।। शतम्।।७००।। राज्ञ्यसि।। राज्ञ्यसिप्प्राचीदिग्ग्विराडसि
दक्षिणादिक्क्सम्म्राडसिप्प्रतीचीदिक्क्स्वराडस्युदीचीदिगधिपत्न्क्यसिबृहतीदिक्।।१३।।
व्विश्श्वकर्म्मात्त्वा। सादयत्त्वन्तरिक्षस्यपृष्ठेज्ज्योतिष्म्मतीम्।। व्विश्श्वस्म्मैप्प्राणायापानायव्व्या
नायव्वायुष्ट्टेधिपतिस्त्तयादेवतयाङ्गिरस्वद्ध्रुवासीद।।१४।। नभश्श्च। नभस्यश्श्चव्वार्षिकावृतूऽ

अग्ग्नेरन्तःश्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्ग्नयःपृथङ्ङ्मम
ज्ज्यैष्ठ्यायसव्व्रताः।। येऽअग्ग्नयःसमनसोन्तराद्द्यावापृथिवीऽइमे।। व्वार्षिकावृतूऽअभिकल्प्प
मानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्।।१५।। इषश्च्च।।
इषश्च्चोर्ज्जश्च्चशारदावृतूऽअग्ग्नेरन्तःश्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयः
कल्प्पन्तामग्ग्नयःपृथङ्ङ्ममज्ज्यैष्ठ्यायसव्व्रताः।। येऽअग्ग्नयःसमनसोन्तराद्द्यावापृथिवीऽइमे।।
शारदावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्।।१६।।
(६-३) आयुर्म्मे। पाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्व्यानम्मेपाहिचक्क्षुर्म्मेपाहिश्श्रोत्रम्मेपाहि
व्वाचम्मेपिन्न्वमनोमेजिन्न्वात्त्मानम्मेपाहिज्ज्योतिर्म्मेयच्छ।।१७।। माच्छन्दः। प्प्रमाच्छन्दः
प्प्रतिमाच्छन्दोऽअस्स्रीवयश्च्छन्दःपङ्क्तिश्च्छन्दऽउष्ष्णिक्क्छन्दोबृहतीच्छन्दोनुष्टुप्प्छन्दोव्विराड्ढ
छन्दोगायत्रीच्छन्दस्त्रिष्टुप्प्छन्दोजगतीच्छन्दः।।१८।। पृथिवीच्छन्दः।। पृथिवीच्छन्दोन्त
रिक्क्षञ्छन्दोद्द्यौश्च्छन्दःसमाश्च्छन्दोनक्क्षत्त्राणिच्छन्दोव्वाक्क्छन्दोमनश्च्छन्दःकृषिश्च्छन्दोहिर

ण्ण्यञ्छन्दो गौश्छन्दो जाच्छन्दो शश्वश्छन्दः ।।१९।। अग्निर्देवता ।। अग्निर्देवताव्वातो देवता

सूर्य्यो देवता चन्द्रमा देवताव्वसवो देवता रुद्रा देवता दित्त्या देवता मरुतो देवताव्विश्श्वे देवा देवता बृहस्प्पति

र्देवतेन्द्रो देवताव्वरुणो देवता ।।२०।। मूर्द्धासि ।। मूर्द्धासिराड्ध्रुवासि धरुणा धर्त्त्र्यसि धरणी ।। आयु

षेत्त्वाव्वर्च्चसेत्त्वा कृष्यैत्त्वा क्षेमाय त्त्वा ।।२१।। यन्त्रीराट् ।। यन्त्रीराड्यन्त्र्यसि यमनी द्ध्रुवासि धरित्त्री ।।

इषेत्त्वोर्ज्जेत्त्वा रय्यैत्त्वा पोषाय त्त्वा लोकन्ताऽइन्द्रम् ।।२२।। (६-५)आशुस्त्रिवृत् ।। आशुस्त्रि

वृद्भान्तः पञ्चदशो व्व्योमा सप्प्तदशो धरुणऽएकविꣳशः प्प्रतूर्त्तिरष्ष्टादशस्त्तपो नवदशोभीवर्त्तः सविꣳ

शो व्वर्च्चो द्द्वाविꣳशः सम्भरणस्त्त्रयोविꣳशो योनिश्च्चतुर्व्विꣳशो गर्ब्भाः पञ्चविꣳशऽओजस्त्रिणवः

क्क्रतुरेकत्त्रिꣳशः प्प्रतिष्ष्ठा त्त्रयस्त्त्रिꣳशो ब्ब्रद्ध्नस्य व्विष्टपं चतुस्त्त्रिꣳशो नाकः षट्त्रिꣳशो व्विवर्त्तोष्ष्टा

चत्त्वारिꣳशो धर्त्त्रश्चतुष्ष्टोमः ।।२३।। (१-६) अग्ग्नेर्ब्भागः ।। अग्ग्नेर्ब्भागोसि दीक्षायाऽ

आधिपत्त्यम्ब्रह्म स्पृतन्त्रिवृत्स्तोमऽइन्द्रस्य भागोसि व्विष्णोराधिपत्त्यङ्क्षत्त्रꣳ स्पृतम्पञ्चदशस्त्तोमो नृ

चक्षसाम्भागोसि धातुराधिपत्त्यञ्जनित्त्रꣳ स्पृतꣳ सप्प्तदशस्त्तोमो मित्त्रस्य भागोसि व्वरुणस्याधिपत्त्य

न्दिवोव्वृष्ट्टिर्व्वातस्पृतऽएकविꣳशस्त्तोमोव्वसूनाम्भागः ।।२४।। व्वसूनाम्भागः।। व्वसूनाम्भागो
सिरुद्द्राणामाधिपत्त्यञ्चतुष्प्पात्स्पृतञ्चतुर्व्विꣳशस्त्तोमऽआदित्त्यानाम्भागोसिमरुतामाधिपत्त्यङ्गर्ब्भा
स्पृताःपञ्चविꣳशस्त्तोमोदित्त्यैभागोसिपूष्णऽआधिपत्त्यमोजस्पृतन्त्रिणवस्त्तोमोदेवस्यसवितुर्ब्भा
गोसिबृहस्प्पतेराधिपत्त्यꣳसमीचीर्द्दिशस्पृताश्च्चतुष्ट्टोमस्त्तोमोयवानाम्भागः।।२५।। यवानाम्भागः।।
यवानाम्भागोस्ययवानामाधिपत्त्यम्प्रजास्पृताश्च्चतुश्च्चत्त्वारिꣳशस्त्तोमऽऋभूणाम्भागोसिव्विश्श्वे
षान्देवानामाधिपत्त्यम्भूतꣳस्पृतन्त्रयस्त्रिꣳशस्त्तोमꣳसहश्च्च।।२६।। सहश्च्च। सहस्यश्च्चहैमन्ति
कावृतूऽअग्ग्नेरन्तꣳश्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयꣳकल्प्पन्तामग्ग्नयꣳ
पृथङ्ङ्मज्ज्यैष्ठ्यायसव्व्रताꣳ।। येऽअग्ग्नयꣳसमनसोन्तराद्द्यावापृथिवीऽइमे।। हैमन्तिका
वृतूऽअभिकल्प्पमानाऽइन्द्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्।।२७।।
(४–७) एकयास्त्तुवत। प्प्रजाऽअधीयन्तप्प्रजापतिरधिपतिरासीत्तिसृभिरस्त्तुवतब्ब्रह्म्मासृज्ज्यत
ब्ब्रह्म्मणस्प्पतिरधिपतिरासीत्त्पञ्चभिरस्त्तुवतभूतान्न्यसृज्ज्यन्तभूतानाम्पतिरधिपतिरासीत्त्सप्त्तभिर

स्त्तुवतसप्प्तऽऋषयोसृज्ज्यन्तधाताधिपतिरासीन्नवभिरस्त्तुवत।।२८।। नवभिरस्त्तुवत। पितरो
सृज्ज्यन्तादितिरधिपत्न्क्यासीदेकादशभिरस्त्तुवतऽऋतवोसृज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्रयोद
शभिरस्त्तुवतमासाऽअसृज्ज्यन्तसंवत्त्सरोधिपतिरासीत्त्पञ्चदशभिरस्त्तुवतक्क्षत्रमसृज्ज्यतेन्द्रोधिपतिरा
सीत्त्सप्प्तदशभिरस्त्तुवतग्ग्राम्म्याः पशवोसृज्ज्यन्तबृहस्प्पतिरधिपतिरासीन्नवदशभिरस्त्तुवत।।२९।।
नवदशभिरस्त्तुवत। शूद्द्रार्य्यावसृज्ज्येतामहोरात्त्रेऽअधिपत्न्कीऽआस्त्तामेकविꣳशत्त्यास्त्तुवतकशफाꣳ
पशवोसृज्ज्यन्तव्वरुणोधिपतिरासीत्त्त्रयोविꣳशत्त्यास्त्तुवतक्क्षुद्द्राः पशवोसृज्ज्यन्तपूषाधिपतिरासीत्त्पञ्च
विꣳशत्त्यास्त्तुवतारण्ण्याः पशवोसृज्ज्यन्तव्वायुरधिपतिरासीत्त्सप्प्तविꣳशत्त्यास्त्तुवतद्द्यावापृथिवी
व्व्यैताव्वसवोरुद्द्राऽआदित्त्याऽअनुव्व्यायँस्तऽएवाधिपतयऽआसन्नवविꣳशत्त्यास्त्तुवत।।३०।।
नवविꣳशत्त्यास्त्तुवत।। नवविꣳशत्त्यास्त्तुवतव्वनस्प्पतयोसृज्ज्यन्तसोमोधिपतिरासीदेकत्त्रिꣳशतास्त्तु
वतप्प्रजाऽअसृज्ज्यन्तयवाश्च्चायवाश्च्चाधिपतयऽआसँस्त्रयस्त्त्रिꣳशतास्त्तुवतभूतान्न्यशाम्म्यन्न्प्रजा
पतिꣳ परमेष्ठ्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम्।।३१।। (४-८) इतिश्रीवाजसनेयसंहितायां

चतुर्दशोऽध्यायः।।१४।। श्रीवेदपुरुषायनमः।। अनुवाक सूत्रम्।। अग्नेजातान्पञ्च, रश्मिनासत्यायचतस्रो, राज्ञ्यसिपञ्चा, यंपुरः पञ्चा, ग्निर्मूर्द्धैकोनत्रिꣳश, द्येनऽऋषयोष्टौ, तपश्च्चनव, सप्त पञ्चषष्टिः।। (अ. १५ मं. ६५ अनु. ७)।। हरिः ॐ।।

अग्ग्नेजातान्।। अग्ग्नेजातान्प्रणुदानꣳसपत्न्कान्प्रत्त्यजातान्नुदजातवेदः।। अधिनोब्ब्रूहिसुमनाऽअहेडँस्तवस्यामशर्म्मँस्त्रिवरूथऽउद्भौ।।१।। सहसाजातान्।। सहसाजातान्प्रणुदानꣳसपत्न्कान्प्रत्त्यजाताञ्जातवेदोनुदस्व।। अधिनोब्ब्रूहिसुमनस्यमानोव्वयꣳस्यामप्प्रणुदानꣳसपत्न्कान्।।२।। षोडशीस्त्तोमः।। षोडशीस्त्तोमऽओजोद्द्रविणञ्चतुश्च्चत्त्वारिꣳशस्त्तोमोव्वर्च्चोद्द्रविणम्।। अग्ग्नेः पुरीषमस्यप्प्सोनामतान्त्वाव्विश्श्वेऽअभिगृणन्तुदेवाः।। स्तोमपृष्ठाघृतवतीहसीदप्प्रजावदस्म्मेद्द्रविणायजस्व।।३।। एव श्च्छन्दः।। एवश्च्छन्दोव्वरिवश्च्छन्दः शम्भूश्च्छन्दः परिभूश्च्छन्दऽआच्छच्छन्दोमनश्च्छन्दोव्व्यचश्च्छन्दꣳसिन्धुश्च्छन्दः समुद्रश्च्छन्दः सरिरञ्छन्दः ककुप्प्छन्दस्त्रिककुप्प्छन्दः काव्व्यञ्छन्दोऽअङ्कुपञ्छन्दोक्षरपङ्क्तिश्च्छन्दः पदपङ्क्तिश्च्छन्दोव्विष्टारपङ्क्तिश्च्छन्दः

क्षुरोभ्रजश्च्छन्दऽआच्छच्छन्दः प्प्रच्छच्छन्दः ।।४।। आच्छच्छन्दः प्प्रच्छच्छन्दः। सँय्यच्छन्दो
व्वियच्छन्दोबृहच्छन्दोरथन्तरञ्छन्दोनिकायश्च्छन्दोव्विवधश्च्छन्दोगिरश्च्छन्दोभ्रजश्च्छन्दः सꣳ
स्तुप्प्छन्दोनुष्टुप्प्छन्दऽएवश्च्छन्दोव्वरिवश्च्छन्दोव्वयश्च्छन्दोव्वयस्कृच्छन्दोव्विष्प्पर्द्धाश्च्छन्दो
व्विशालञ्छन्दश्च्छदिश्च्छन्दोदूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्काङ्कञ्छन्दः ।।५।। (५-१)
रश्मिना सत्याय। सत्यञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्वान्न्वित्यादिवादिवञ्जिन्वसन्धिनान्त
रिक्षेणान्तरिक्षञ्जिन्वप्प्रतिधिनापृथिव्व्यापृथिवीञ्जिन्वव्विष्टम्भेनव्वृष्ट्याव्वृष्टिञ्जिन्वप्प्र
वयान्हाहर्ज्जिन्वानुयारात्त्र्यारात्रीञ्जिन्वोशिजाव्वसुभ्योव्वसूञ्जिन्वप्प्रकेतेनादित्त्येभ्यऽआदि
त्त्याञ्जिन्वतन्तुनारायः ।।६।। तन्तुनारायः ।। तन्तुनारायस्प्पोषेणरायस्प्पोषञ्जिन्वसꣳसर्प्पेण
श्श्रुतायश्श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्ज्जिन्वोत्तमेनतनूभिस्तनूर्ज्जिन्वव्वयोधसाधीतेनाधीतञ्जिन्वा
भिजितातेजसातेजोजिन्व।।७।। प्रतिपदसि। प्प्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसिसम्पदेत्वा
तेजोसितेजसेत्वात्त्रिवृदसि।।८।। त्रिवृदसि। त्त्रिवृतेत्वाप्प्रवृदसिप्प्रवृतेत्वाव्विवृदसिव्विवृतेत्वास

वृदसिसवृतेत्त्वाक्क्रमोस्याक्क्रमायत्त्वासङ्क्रमोसिसङ्क्रमायत्त्वोत्त्क्रमोस्युत्त्क्रमायत्त्वोत्त्क्रान्तिरस्यु

त्त्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्न्व।।९।। (४–२)

राज्ञ्यसि।। राज्ञ्यसिप्प्राचीदिग्ग्वसवस्त्तेदेवाऽअधिपतयोग्ग्निर्हेतीनाम्प्रतिधर्त्तात्त्रिवृत्तवास्त्तोम÷

पृथिव्व्याꣳश्रयत्त्वाज्ज्यमुक्क्थमव्व्यथायैस्त्तब्भ्नातुरथन्तरꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषय

स्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्च्चतेत्त्वासर्व्वेसंविदा

नानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु।।१०।। व्विराडसि।। व्विराडसिदक्क्षिणादिग्ग्रुद्द्रा

स्त्तेदेवाऽअधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्त्तोम÷पृथिव्व्याꣳश्रयतुप्प्रऽउगमुक्क्थम

व्व्यथायैस्त्तब्भ्नातुबृहत्त्सामप्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरि

म्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्च्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसाद

यन्तु।।११।। सम्म्राडसि। प्प्रतीचीदिगादित्त्यास्त्तेदेवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्ता

सप्प्तदशस्त्वास्त्तोम÷पृथिव्व्याꣳश्रयतुमरुत्त्वतीयमुक्क्थमव्व्यथायैस्त्तब्भ्नातुव्वैरूपꣳसामप्प्रति

ष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधि
पतिश्च्चतेत्त्वासव्वैसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु।।१२।। स्वराडसि।।
स्वराडस्युदीचीदिङ्म्मरुतस्त्तेदेवाऽअधिपतयᳪसोमोहेतीनाम्प्रतिधर्त्तैकविᳪशस्त्वास्त्तोमः पृथि
व्व्याᳶश्रयतुनिष्क्केवल्ल्यमुक्क्थमव्व्यथायैस्त्तब्भ्नातुव्वैराजᳪसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋष
यस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्च्चतेत्त्वासव्वैसंवि
दानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु।।१३।। अधिपत्क्यसि। बृहतीदिग्गिवश्श्वेते
देवाऽअधिपतयोबृहस्प्पतिर्हेतीनाम्प्रतिधर्त्तात्त्रिणवत्त्रयस्त्रिᳪशौत्त्वास्त्तोमौपृथिव्व्याᳶश्रयतांव्वै
श्श्वदेवाग्ग्निमारुतेऽउक्क्थेऽअव्व्यथायैस्त्तब्भ्नीताᳶशाक्क्वररैवतेसामनीप्प्रतिष्ठित्त्याऽअन्तरिक्ष
ऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्च्चतेत्त्वासव्वैसं
वदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु।।१४।। (५-३) अयम्पुरः।।
अयम्पुरोहरिकेशᳪसूर्य्यरश्मिस्त्तस्यरथगृत्त्सश्च्चरथौजाश्च्चसेनानीग्ग्रामण्ण्यौ।। पुञ्जिक

स्त्थलाचक्क्रतुस्त्थलाचाप्प्सरसौदङ्क्ष्णवः पशवोहेतिः पौरुषेयोव्वधः प्प्रहेतिस्त्तेब्भ्योनमोऽअस्त्तु तेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।१५।। अयन्दक्षिणा। व्विश्श्वकर्म्मातस्यरथस्वनश्च्चरथेचित्रश्च्चसेनानीग्ग्रामण्ण्यौ। मेनकाचसहजन्न्याचाप्प्सरयौ यातुधानाहेतीरक्षाꣳसिप्प्रहेतिस्त्तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनोद्द्वे ष्ट्टितमेषाञ्जम्भेदद्ध्मः।।१६।। अयम्पश्च्चात्।। अयम्पश्च्चाद्द्विश्श्वव्व्यचास्त्तस्यरथ प्प्रोतश्च्चासमरथश्च्चसेनानीग्ग्रामण्ण्यौ।। प्रम्म्लोचन्तीचानुम्म्लोचन्तीचाप्प्सरसौव्व्याग्घ्रा हेतिः सर्प्पाः प्प्रहेतिस्त्तेब्भ्योनमोअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्ज म्भेदद्ध्मः।।१७।। अयमुत्तरात्।। अयमुत्तरात्त्सँय्यद्द्वसुस्त्तस्यताक्ष्यर्श्च्चारिष्टनेमिश्च्चसेनानी ग्ग्रामण्ण्यौ।। व्विश्श्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्त्तेब्भ्योनमोऽअस्त्तुतेनो वन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।१८।। अयमुपरि। अयमुपर्य्यर्व्वाग्ग्वसुस्त्तस्यसेनजिच्चसुषेणश्च्चसेनानीग्ग्रामण्ण्यौ।। उर्व्वशीचपूर्व्वचित्तिश्च्चा

प्पसरसांववस्फूर्ज्जह्रेतिर्व्विदद्युत्त्प्रहेतिस्त्तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनो
द्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।१९।। (५-४) अग्ग्निर्म्मूर्द्धा। दिवःककुत्त्पतिःपृथिव्व्याऽअयम्।।
अपाᳫरेताᳫसिजिन्न्वति।।२०।। अयमग्ग्निः।। संहस्रिणोव्वाजस्य्यशतिनस्प्पतिः।। मूर्द्धाकवीरं
यीणाम्।।२१।। त्वामग्ग्ने।। त्वामग्ग्नेपुष्क्करादद्ध्यथर्व्वानिरमन्थत।। मूद्ध्नोव्विश्श्वस्य
व्वाघतः ।।२२।। भुवोयज्ञस्य।। भुवोयज्ञस्यरजसश्च्चनेतायत्त्रानियुद्भिःसचसेशिवाभिः।।
दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्व्वामग्ग्नेचकृषेहव्व्यवाहम्।।२३।। अबोद्ध्यग्ग्निः। समिधाजनाना
म्प्रतिधेनुमिवायतीमुषासम्।। यह्व्वाऽइवप्प्रवयामुज्जिहानाःप्प्रभानवःसिस्रतेनाकमच्छ।।२४।।
अवोचामकवये।।अवोचामकवयेमेद्ध्यायव्वचोव्वन्दारुव्वृषभायव्वृष्ण्णे।। गविष्ठिरोनमसा
स्त्तोममग्ग्नौदिवीवरुक्क्ममुरुव्व्यञ्चमश्श्रेत्।।२५।। अयमिह। प्प्रथमोधायिधातृभिर्होतायजिष्ठो
ऽअद्ध्वरेष्ष्वीड्यः।। यमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्त्रंव्विभ्भ्वंव्विशेविशे।।२६।। जनस्य
गोपाः।। जनस्यगोपाऽअजनिष्टजागृविरग्ग्निःसुदक्षःसुवितायनव्व्यसे।। घृतप्प्रतीकोबृहता

दिविस्पृशाद्द्युमद्द्विभातिभरतेब्भ्यःशुचिः।।२७।। त्वामग्ग्ने।। त्वामग्ग्नेऽअङ्गिरसोगुहाहित

मन्न्वविन्दञ्छिश्श्रियाणंवन्नेवने।। सजायसेमत्थ्यमानःसहोमहत्त्वामाहुःसहसस्प्पुत्रमङ्गिरः

।।२८।। सखायःसम्।। सखायःसंवःसम्म्यञ्चमिषꣳस्तोमञ्चाग्ग्नये।। व्वर्षिष्ठायायक्षितीना

मूर्ज्जोनप्प्त्रेसहस्वते।।२९।। सꣳसमित्।। सꣳसमिद्युवसेव्वृषन्नग्ग्नेव्विश्श्वान्न्यर्य्यऽआ।।

इडस्प्पदेसमिद्ध्यसेसनोव्वसून्याभर।।३०।। त्वाञ्चित्रश्श्रवस्तम।। त्वाञ्चित्रश्श्रवस्तमहवन्ते

व्विक्षुजन्तवः।। शोचिष्क्केशम्पुरुप्प्रियाग्ग्नेहव्व्यायव्वोढवे।।३१।। एनावः।। एना

वोऽअग्ग्निन्नमसोर्ज्जोनपातमाहुवे।। प्रियञ्चेतिष्ठमरतिꣳस्वद्ध्वरंव्विश्श्वस्यदूतममृतम्।।३२।।

व्विश्श्वस्यदूतम्।। व्विश्श्वस्यदूतममृतंव्विश्श्वस्यदूतममृतम्।। सयोजतेऽअरुषाव्विश्श्व

भोजसासदुद्द्रवत्स्वाहुतः।।३३।। सदुद्द्रवत्।। सदुद्द्रवत्स्वाहुतःसदुद्द्रवत्स्वाहुतः।। सुब्ब्रह्म्मायज्ञः

सुशमीव्वसूनान्देवꣳराधोजनानाम्।।३४।। अग्ग्नेव्वाजस्य।। अग्ग्नेव्वाजस्यगोमतईशानः

सहसोयहो।। अस्म्मेधेहिजातवेदोमहिश्श्रवः।।३५।। सऽइधानः।। सऽइधानोव्वसुष्क्कविरग्ग्नि

रीडेन्न्योगिरा।। रेवदस्म्मब्भ्यम्पुर्व्वणीकदीदिहि।।३६।। क्षपोराजन्।। क्षपोराजन्नुतत्क्मनाग्ग्ने
व्वस्त्तोरुतोषसः।। सतिग्ग्मजम्भरक्क्षसोदहप्प्रति।।३७।। भद्द्रोनः।। भद्द्रोनोऽअग्ग्निराहुतोभद्द्रा
रातिःसुभगभद्द्रोऽअद्ध्वरः।। भद्द्राऽउतप्प्रशस्त्तयः।।३८।। भद्द्राऽउत। प्प्रशस्त्तयोभद्द्रम्मनःकृणुष्ष्व
व्वृत्रतूर्य्ये।। येनासमत्त्सुसासहः।।३९।। येनासमत्त्सु। सासहोवस्त्थिरातनुहिभूरिशर्द्धताम्।।
व्वनेमातेऽअभिष्ष्टिभिः।।४०।। अग्ग्निन्तम्।। अग्ग्निन्तम्मन्न्येयोव्वसुरस्त्तँय्यँय्यन्तिधेनवः।।
अस्त्तमर्व्वन्तऽ आशवोस्त्तन्नित्त्यासोव्वाजिनऽइषँस्तोतृब्भ्यऽआभर।।४१।। सोऽअग्ग्निः।।
सोऽअग्ग्निर्य्यो व्वसुर्ग्गृणेसँय्यमायन्तिधेनवः।। समर्व्वन्तोरघुद्द्रुवःसःसुजातासःसूरयऽइषँस्तोतृ
ब्भ्यऽआभर ।।४२।। उभेसुश्च्चन्द्र। सर्प्पिषोदर्व्वीश्श्रीणीषऽआसनि।। उतोनऽउत्त्पुपूर्य्याऽउक्क्थे
षुशवसस्प्पतइषँस्तोतृब्भ्यऽआभर।।४३।। अग्ग्नेतम्।। अग्ग्नेतमद्द्याश्श्वन्नस्त्तोमैःक्क्रतुन्नभद्द्रः
हृदिस्प्पृशम्।। ऋद्ध्यामातऽओहैः।।४४।। अधाहि।। अधाह्य्यग्ग्नेक्क्रतोर्ब्भद्द्रस्यदक्क्षस्यसाधोः।।
रथीऽर्ऋतस्य्यबृहतोबभूथ।।४५।। एभिर्न्नः।। एभिर्न्नोऽअर्क्कैर्ब्भवानोऽअर्व्वाङ्स्वर्ण्णज्ज्योतिः।।

अग्ग्नेव्विश्श्वेभिः सुमनाऽअनीकैः।।४६।। अग्ग्निꣳहोतारम्।। अग्ग्निꣳहोतारम्मन्न्येदास्वन्तंव्वसुꣳ
सूनुꣳसहसोजातवेदसंव्विप्प्रन्नजातवेदसम्।। यऽऊर्द्ध्वयास्वद्ध्वरोदेवोदेवाच्च्याकृपा।। घृतस्य
व्विभ्भ्राष्ट्टिमनुवष्ट्टिशोचिषाजुह्व्वानस्यसर्प्पिषः।।४७।। अग्ग्नेत्त्वम्।। अग्ग्नेत्त्वन्नोऽअन्तमऽ
उतत्त्राताशिवोभवाव्वरूत्थ्यः।। व्वसुरग्ग्निर्व्वसुश्श्रवाऽअच्छानक्क्षिद्द्युमत्तमꣳरयिन्दाः।।
तन्त्वाशोचिष्ठदीदिवः सुम्म्नायनूनमीमहेसखिब्भ्यः।।४८।। (२९-५) येनऽऋषयः।। येनऽऋषय
स्त्तपसासत्रमायन्निन्धानाऽअग्ग्निꣳस्वराभरन्तः।। तस्मिन्नहन्निदधेनाकेऽअग्ग्निंय्यमाहुर्म्मनवस्त्ती
र्णबर्हिषम्।।४९।। तम्पत्नीभिः।। तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्ब्भ्रातृभिरुतवाहिरण्ण्यैः।।
नाकङ्गृब्भ्णानाः सुकृतस्यलोकेतृतीयेपृष्ट्ठेऽअधिरोचनेदिवः।।५०।। आवाचः।। आवाचोमद्ध्य
मरुहद्द्भुरण्ण्युरयमग्ग्निः सत्त्पतिश्च्चेकितानः।। पृष्ट्ठेपृथिव्व्यानिहितोदविद्द्युतदस्प्पदङ्कृणुताँय्ये
पृतन्न्यवः।।५१।। अयमग्ग्निः।। अयमग्ग्निर्व्वीरतमोव्वयोधाः सहस्स्रियोद्द्योततामप्प्रयुच्छन्।।
व्विभ्भ्राजमानः सरिरस्यमद्ध्यऽउपप्प्रयाहिदिव्व्यानिधाम।।५२।। सम्प्रच्च्यवद्ध्वमुप।

सप्प्रयाताग्ग्नेपथोदेवयानान्कृणुद्ध्वम्।। पुनः कृण्ण्वानापितरायुवानान्न्वाताँसीत्त्वयितन्तुमेतम्
।।५३।। उद्द्बुद्ध्यस्व।। उद्द्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्ट्टापूर्त्तेसःसृजेथामयञ्च।।
अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्न्विश्श्वेदेवायजमानश्च्चसीदत।।५४।। येनव्वहंसि। सहस्रँय्ये
नाग्ग्नेसर्व्ववेदसम्।। तेनेमँय्यज्ञन्नोनयस्वर्द्देवेषुगन्तवे।।५५।। अयन्ते।। अयन्तेयोनिर्ऋत्त्वियो
यतोजातोऽअरोचथाः।। तञ्जानन्नग्ग्नऽआरोहाथानोव्वर्द्धयारयिम्।।५६।। (८-६) तपश्च्च।।
तपश्च्चतपस्य्श्च्चशैशिरावृतूऽअग्ग्नेरन्तःश्श्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषध
यःकल्प्पन्तामग्ग्नयःपृथङ्ङ्मज्ज्यैष्ठ्याायसव्व्रताः।। येऽअग्ग्नयःसमनसोन्तराद्द्यावापृथिवीऽइमे
।। शैशिरावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्
।।५७।। परमेष्ठ्ठीत्त्वा। सादयतुदिवस्पृष्ठ्ठेज्ज्योतिष्म्मतीम्।। व्विश्श्वस्म्मैप्प्राणायापानाय
व्व्यानायव्विश्श्वञ्ज्योतिर्य्यच्छ।। सूर्य्यस्त्तेधिपतिस्त्तयादेवतयाङ्गिरस्वद्ध्रुवासीद।।५८।।
लोकम्पृण। च्छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम्।। इन्द्राग्ग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनावसीषदन्

।।५९।। ताऽअस्य।। ताऽअस्यसूददोहसःसोमꣳश्रीणन्तिपृश्नयः।। जन्मन्देवानांव्विशस्त्रिष्ष्वा रोचनेदिवः।।६०।। इन्द्रंव्विश्श्वाः।। इन्द्रंव्विश्श्वाऽअवीवृधन्त्समुद्द्रव्व्यचसङ्गिरः।। रथीतमꣳ रथीनांव्वाजानाꣳसत्त्पतिम्पतिम्।।६१।। प्रोथदश्श्वः।। प्रोथदश्श्वोनयवसेविष्ष्यन्न्यदामहः संवरणाद्द्वास्त्थात्।। आदस्यव्वातोऽअनुवातिशोचिरधस्म्मतेव्व्रजनङ्कृष्ण्णमस्त्ति।।६२।। आयो ष्ट्ट्वा।। आयोष्ट्ट्वासदनेसादयाम्म्यवतश्छ्छायायाꣳसमुद्द्रस्यहृदये।। रश्म्मीवतीम्भास्वतीमाया द्द्याम्भास्यापृथिवीमोर्व्वन्तरिक्षम्।।६३।। परमेष्ठ्ठीत्त्वा।। सादयतुदिवस्पृष्ठ्ठेव्व्यचस्वती म्प्रथस्वतीन्दिवँय्यच्छदिवन्दृꣳहदिवम्माहिꣳसीः।। व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानायोदानाय प्प्रतिष्ठ्ठायैचरित्त्राय।। सूर्य्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्द्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवेसी दतम्।।६४।। सहस्रस्यप्प्रमासि। सहस्रस्यप्प्रतिमासिसहस्रस्योन्न्मासिसाहस्रोसिसहस्रायत्त्वा ।।६५।। (९–७) इतिश्रीवाजसनेयसंहितायांपञ्चदशोऽध्यायः।।१५।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। नमस्तेषोडश, हिरण्ण्यबाहव, ऽउष्णीषिणे, तक्क्षभ्यो, ज्येष्ठायपञ्चकाः,

स्तुत्यायचतस्रः, शंभवायैका, पार्य्यायपञ्च, द्रापेऽअंधसोविꣳशति, र्नवषट्षष्टिः (अ. १६ मं. ६६ अनु. ९)।। हरिः ॐ।। नमस्ते।। नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः।। बाहुब्भ्यामुततेनमः ।।१।।
याते। रुद्रशिवातनूरघोरापापकाशिनी।। तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ।।२।।
यामिषुम्।। यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे।। शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत्।।३।। शिवेनव्वचसा। त्त्वागिरिशाच्छाव्वदामसि।। यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्।।४।। अद्ध्यवोचत्।। अद्ध्यवोचदधिवक्क्ताप्प्रथमोदैव्व्योभिषक्।। अहींश्च्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्च्चयातुधान्न्योधराचीःपरासुव।।५।। असौयः।। असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गलः।। येचैनꣳरुद्राऽअभितोदिक्क्षुश्श्रिताःसहस्रशोवैषाꣳहेडऽईमहे।।६।। असौयः।
असौयोवसर्प्पतिनीलग्ग्रीवोव्विलोहितः।। उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यःसदृष्टोमृडयातिनः।।७।। नमोस्तु।। नमोस्तुनीलग्ग्रीवायसहस्राक्क्षायमीढुषे।। अथोयेऽअस्यसत्त्वानोहन्तेब्भ्योकरन्नमः।।८।। प्रमुञ्च।। प्रमुञ्चधन्न्वनस्त्वमुभयोरात्न्कर्योर्ज्ज्याम्।। याश्च्चतेहस्तऽइषवः

पराताभगवोव्वप।।९।। व्विज्ज्यन्धनुःकपर्द्दिनोव्विशल्ल्योबाणवाँ२।।ऽउत।। अनेशन्नस्ययाऽइषव
ऽआभुरस्यनिषङ्गधिः।।१०।। याते। हेतिम्मीढुष्टमहस्तेबभूवतेधनुः।। तयास्म्मान्व्विश्श्वतस्त्व
मयक्ष्मयापरिभुज।।११।। परिते।। परितेधन्न्वनोहेतिरस्म्मान्वृणक्क्तुव्विश्श्वतः।। अथोयऽ
इषुधिस्त्तवारेऽअस्म्मन्निधेहितम्।।१२।। अवतत्त्यधनुः।। अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ।।
निशीर्य्यशल्ल्यानाम्मुखाशिवोनःसुमनाभव।।१३।। नमस्ते।। नमस्तेऽआयुधायानातताय
धृष्णवे।। उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने।।१४।। मानः।। मानोमहान्तमुतमानो
ऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्।। मानोव्वधीःपितरम्मोतमातरम्मानःप्प्रियास्त्तन्वो
रुद्द्ररीरिषः।।१५।। मानस्तोके। तनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः।। मानोव्वीरा
न्रुद्द्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे।।१६।। (१६-१) शतम्।।८००।। नमोहिरण्ण्य
बाहवे।। सेनान्न्येदिशाञ्चपतयेनमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्ज
रायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशाय।।१७।।न

मोबभ्लुशाय। व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्त्यैजगताम्पतयेनमोनमोरुद्रायाततायिने
क्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय।।१८।। नमोरोहिताय।
स्त्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजा
यकक्क्षाणाम्पतयेनमोनमऽउच्चैर्ग्घोषायाक्क्र न्दयतेपत्तीनाम्पतयेनमोनमः कृत्स्नायतया।।१९।।
नमः कृत्स्नायतया। धावतेसत्त्वनाम्पतयेनमोनमꣳसहमानायनिव्व्याधिनऽआव्व्याधिनीनाम्पतयेन
मोनमोनिषङ्गिणेककुभायस्त्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्ण्यानाम्पतयेनमोनमोवञ्चते।।
२०।। नमोव्वञ्चते। परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्क्कराणाम्पतयेन
मोनमः सृकायिभ्भ्योजिघांꣳसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्क्तञ्चरद्भ्योव्वि
कृन्तानाम्पतयेनमः।।२१।। (५-२) नमऽउष्णीषिणे। गिरिचराय कुलुञ्चानाम्पतयेनमोनमऽइषु
मद्भ्योधन्न्वायिभ्भ्यश्च्चवोनमोनमऽआतन्न्वानेभ्भ्यः प्प्रतिदधानेभ्भ्यश्च्चवोनमोनमऽआयच्छ
द्भ्योस्यद्भ्यश्च्चवोनमोनमोव्विसृजद्भ्यः।।२२।। नमोव्विसृजद्भ्यो। व्विद्ध्यद्भ्यश्च्च

वोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठ्द्भ्योधावद्भ्यश्चवोनमोनमः सभाभ्यः ।।२३।। नमः सभाभ्यः। सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योव्विविद्ध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृहतीभ्यश्चवोनमोनमोगणेभ्यः ।।२४।। नमोगणेभ्यो। गणपतिभ्यश्चवोनमोनमोव्व्रातेभ्योव्व्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोव्विरूपेभ्योव्विश्श्वरूपेभ्यश्चवोनमोनमः सेनाभ्यः ।।२५।। नमः सेनाभ्यः। सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ।।२६।। (५-३) नमस्तक्षभ्यो। रथकारेभ्यश्चवोनमोनमः कुलालेभ्यः कर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यः पुञ्जिष्ठेभ्यश्चवोनमोनमः श्श्वनिभ्योमृगयुभ्यश्चवोनमोनमः श्श्वभ्यः ।।२७।। नमः श्श्वभ्यः। श्श्वपतिभ्यश्चवोनमोनमोभवायचरुद्द्रायचनमः शर्व्वायचपशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायचनमः कपर्द्दिने ।।२८।।

नमःकपर्द्दिने। च्व्युप्तकेशायचनमःसहस्राक्षायचशतधन्न्वनेचनमोगिरिशयायचशि

पिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय।।२९।। नमोह्रस्वाय। चव्वामनायचनमोबृहते

चव्वर्षीयसेचनमोव्वृद्ध्वायचवृधेचनमोग्ग्र्यायचप्प्रथमायचनमऽआशवे।।३०।। नमऽआशवे।

चाजिरायचनमꣳशीग्घ्र्यायचशीब्भ्यायचनमऽऊर्म्म्यायचावस्वन्न्यायचनमोनादेयायचद्द्वीप्प्यायच

।।३१।। (५-४) नमोज्ज्येष्ठाय। चकनिष्ठायचनमःपूर्व्वजायचापरजायचनमोमद्ध्यमाय

चापगल्भायचनमोजघन्न्यायचबुद्ध्न्यायचनमꣳसोभ्भ्याय।।३२।। नमꣳसोभ्भ्याय। चप्प्रति

सर्य्यायचनमोयाम्म्यायचक्षेम्म्यायचनमꣳश्श्लोक्क्यायचावसान्न्यायचनमऽउर्व्वर्य्यायचख

ल्ल्यायचनमोव्वन्न्याय।।३३।। नमोव्वन्न्याय। चकक्ष्यायचनमःश्श्रवायचप्प्रतिश्श्रवाय

चनमऽआशुषेणायचाशुरथायचनमꣳशूरायचावभेदिनेचनमोबिल्म्मिने।।३४।। नमोबिल्म्मिने।

चकवचिनेचनमोव्वर्म्मिणेचव्वरूथिनेचनमःश्श्रुतायचश्श्रुतसेनायचनमोदुन्दुब्भ्यायचाहनन्न्यायच

नमोधृष्ष्णवे।।३५।। नमोधृष्ष्णवे। चप्प्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेष

वेचायुधिनेचनमःस्वायुधायचसुधन्वनेच।।३६।। (५-५) नमःस्स्रुत्त्याय। चपत्थ्यायचनमःका

ट्ट्यायचनीप्प्यायचनमःकुल्यायचसरस्यायचनमोनादेयायचव्वैशन्तायचनमःकूप्प्याय ।।३७।।

नमःकूप्प्याय। चावट्ट्यायचनमोव्वीद्ध्र्यायचातप्प्यायचनमोमेग्घ्यायचव्विद्द्युत्त्यायचनमोव्वर्ष्या

यचावर्ष्यायचनमोव्वात्त्याय।।३८।। नमोव्वात्त्याय। चरेष्म्म्यायचनमोव्वास्तव्व्यायचव्वास्तु

पायचनमःसोमायचरुद्द्रायचनमस्ताम्म्रायचारुणायचनमःशङ्गवे।।३९।। नमःशङ्गवे। चपशुपत

येचनमऽउग्ग्रायचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमोव्वृक्षेब्भ्योहरिकेशे

ब्भ्योनमस्ताराय।।४०।। (४-६) नमःशम्भवाय। चमयोभवायचनमःशङ्करायचमयस्क्कराय

चनमःशिवायचशिवतरायच।।४१।। (१-७) नमःपार्य्याय। चावार्य्यायचनमःप्प्रतरणाय

चोत्तरणायचनमस्तीर्त्थ्यायचकूल्ल्यायचयमःशष्प्प्यायचफेन्न्यायचयमःसिकत्त्याय।।४२।। नमः

सिकत्त्याय। चप्रवाह्यायचनमःकिꣳशिलायचक्षयणायचनमःकपर्द्दिनेचपुलस्तयेचनमऽइरिण्ण्या

यचप्प्रपत्थ्यायचनमोव्व्रज्ज्याय।।४३।। नमोव्व्रज्ज्याय। चगोष्ठ्यायचनमस्तल्प्प्यायचगेह्यायचन

मोहृद्य्यायचनिवेष्प्यायचनमꣳकाट्यायचगह्वरेष्ठायचनमꣳशुष्क्याय।।४४।। नमꣳशुष्क्याय।
चहरित्त्यायचनमःपाꣳसव्व्यायचरजस्यायचनमोलोप्प्यायचोलप्प्यायचनमऽऊर्व्व्यायचसूर्व्व्याय
चनमःपर्ण्णाय।।४५।। नमःपर्ण्णाय। चपर्ण्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽ
आखिदतेचप्प्रखिदतेचनमऽइषुकृद्ब्भ्योधनुष्कृद्ब्भ्यश्च्चवोनमोनमोवꣳ किरिकेब्भ्योदेवानाꣳ
हृदयब्भ्योनमोव्विचिन्वत्त्केब्भ्योनमोव्विक्षिणत्त्केब्भ्योनमऽआनिर्हतेब्भ्यः।।४६।। (५-८)
द्रापेऽअन्धसꣳ।। द्रापेऽअन्धसस्प्पतेदरिद्रनीललोहित।। आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मो
चनꣳकिञ्चनाममत्।।४७।। इमारुद्राय। तवसेकपर्द्दिनेक्क्षयद्द्वीरायप्प्रभरामहेमतीः।। यथाशम
सद्द्विपदेचतुष्प्पदेव्विश्श्वम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम्।।४८।। याते। रुद्रशिवातनूःशिवाव्विश्श्वा
हाभेषजी।। शिवारुतस्यभेषजीतयानोमृडजीवसे।।४९।। परिनꣳ।। परिनोरुद्रस्यहेतिर्व्वृणक्त्तु
परित्त्वेषस्यदुर्म्मतिरघायोः।। अवस्त्थिरामघवद्भ्यस्त्तनुष्ष्वमीढ्वस्त्तोकायतनयायमृड।।५०।।
मीढुष्टमशिवतम। शिवोनःसुमनाभव।। परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाकम्बि

बभ्रदागहि।।५१।। व्विकिरिद्द्रव्विलोहित।। व्विकिरिद्द्रव्विलोहितनमस्त्तेऽअस्त्तुभगवः।।
यास्त्तेसहस्रहेतयोन्न्यमस्म्मन्निवपन्तुताः।।५२।। सहस्राणिसहस्रशः।। सहस्राणिसहस्रशोबाह्
व्वोस्त्तवहेतयः।। तासामीशानोभगवःपराचीनामुखाकृधि।।५३।। असङ्ख्यातासहस्राणि।।
असङ्ख्यातासहस्राणियेरुद्द्राऽअधिभूम्म्याम्।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।५४।।
अस्म्मिन्न्महति। अस्म्मिन्नमहत्त्यर्ण्णवेन्तरिक्षेभवाऽअधि।। तेषाꣳसहस्रयोजनेवधन्न्वा
नितन्न्मसि।।५५।। नीलग्ग्रीवाःशितिकण्ठाः।। नीलग्ग्रीवाःशितिकण्ठादिवꣳरुद्द्राऽउपश्श्रिताः।।
तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।५६।। नीलग्ग्रीवाःशितिकण्ठाः। शर्व्वाऽअधःक्षमाचराः
।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।५७।। येव्वृक्षेषु। शष्प्पिञ्जरानीलग्ग्रीवाव्विलोहिताः
।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।५८।। येभूतानाम्।। येभूतानामधिपतयोव्विशिखासः
कपर्द्दिनः।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।५९।। येपथाम्।। येपथाम्पथिरक्षयऽऐल
बृदाऽआयुर्य्युधः।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि।।६०।। येतीर्त्थानि। प्प्रचरन्तिसृका

हस्तानिषङ्गिणः।। तेषां सहस्रयोजनेवधन्वानितन्मसि।।६१।। येन्नेषु। व्विविद्ध्यन्तिपात्त्रेषु पिबतोजनान्।। तेषां सहस्रयोजनेवधन्नवानितन्मसि।।६२।। यऽएतावन्तः।। यऽएतावन्तश्च्च भूयां सश्च्चदिशोरुद्द्राव्वितस्त्थिरे।। तेषां सहस्रयोजनेवधन्वानितन्मसि।।६३।। नमोस्तु। रुद्द्रेब्भ्योयेदिवियेषांव्वर्षमिषवः।। तेब्भ्योदशप्प्राचीर्द्दशदक्क्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्र्वाः।। तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।६४।।
नमोस्तु। रुद्द्रेब्भ्योयेन्तरिक्क्षेयेषांव्वातऽइषवः।। तेब्भ्योदशप्प्राचीर्द्दशदक्क्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्र्वाः।। तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।६५।। नमोस्तु। रुद्द्रेब्भ्योयेपृथिव्व्यांय्येषामन्नमिषवः।। तेब्भ्योदशप्प्राचीर्द्दशदक्क्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्र्वाः।। तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः।।६६।। (२०-९) इतिश्रीवजसनेयसंहितायांषोडशोऽध्यायः।।१६।।
श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। अश्मन्नूर्ज्जंदश, नमस्तेपञ्चा, ग्निस्तिग्मेननव,

चक्षुषःपिताष्टा, वाशुःशिशानःसप्तदशो, देनंक्रमध्वमग्निनापञ्चदशकौ, शुक्र ज्योतिश्च्चसप्ते, म७स्तनंत्रयोदश, नवैकोनशतं (मं. ९९ अ. १७ अनु. ९)।। हरिः ॐ।।

अश्म्मन्नूर्ज्जम्।। अश्म्मन्नूर्ज्जम्पर्व्वतेशिश्रियाणामद्भ्यऽओषधीब्भ्योव्वनस्प्पतिब्भ्योऽअधि सम्भृतम्पयः।। तान्नऽइषमूर्ज्जन्धत्तमरुतःसꣳरराणाऽअश्म्मँस्तेक्षुन्मयितऽऊर्ग्यन्द्विष्म्मस्तन्तेशुगृच्छतु।।१।। इमामे। ऽअग्नऽइष्टकाधेनवःसन्त्वेकाचदशचदशचशतञ्चशतञ्चसहस्रञ्चसहस्रञ्चायतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्प्रयुतञ्चार्ब्बुदञ्चन्न्यर्ब्बुदञ्चसमुद्रश्च्चमद्ध्यञ्चान्तश्च्चपरार्द्धश्च्चैतामेऽअग्नऽइष्टकाधेनवःसन्त्वमुत्रामुष्मिँल्लोके।।२।। ऋतवस्त्थ। ऽऋतावृधऽऋतुष्ठास्त्थऽऋतावृधः।। घृतश्च्चुतोमधुश्च्चुतोव्विराजोनामकामदुघाऽअक्षीयमाणाः।।३।। समुद्रस्यत्त्वा।। समुद्रस्यत्त्वावकयाग्नेपरिव्व्ययामसि।। पावकोऽअस्म्मब्भ्यꣳशिवोभव।।४।। हिमस्यत्त्वा। जरायुणाग्नेपरिव्व्ययामसि।। पावकोऽअस्म्मब्भ्यꣳशिवोभव।।५।। उपज्ज्मन्।। उपज्ज्मन्नुपवेतसेवतरनदीष्ष्वा।। अग्नेपित्तमपामसिमण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्ण्णꣳशिवङ्कृधि ।।६।।

अपामिदम्।। अपामिदन्न्ययनꣳसमुद्द्रस्यनिवेशनम्।। अन्न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअ
स्म्मब्भ्यꣳशिवोभव।।७।। अग्ग्नेपावक। रोचिषामन्द्रयादेवजिह्व्वया।। आदेवान्न्वक्षियक्षिच
।।८।। सनःपावकदीदिवोग्ग्नेदेवाँ।।२।। इहावह।। उपयज्ञꣳहविश्च्चनः।।९।। पावकयायः।।
पावकयायश्च्चितयन्त्याकृपाक्क्षामन्रुरुचऽउषसोनभानुना।। तूर्व्वन्नयामन्नेतशस्यनूरणऽआयो
घृणेनततृषाणोऽअजरः।।१०।। (१०-१) नमस्त्ते।। नमस्त्तेहरसेशोचिषेनमस्त्तेऽअस्त्त्वर्च्चिषे।।
अन्न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअस्म्मब्भ्यꣳशिवोभव।।११।। नृषदेव्वेट्।। नृषदेव्वेडप्प
सुषदेव्वेड्डुबर्हिषदेव्वेड्डुवनसदेव्वेट्ट्स्वर्व्विदेव्वेट्।।१२।। येदेवाः।। येदेवादेवानाँय्यज्ञियायज्ञि
यानाꣳसंवत्त्सरीणमुपभागमासते।। अहुतादोहविषोयज्ञेऽअस्म्मिन्त्स्वयम्पिबन्तुमधुनोघृतस्य
।।१३।। येदेवाः।। येदेवादेवेष्ष्वधिदेवत्त्वमायन्न्येब्ब्रह्म्मणःपुरऽएतारोऽअस्य।। येब्भ्योनऽऋते
पवतेधामकिञ्चननतेदिवोनपृथिव्व्याऽअधिस्न्नुषु।।१४।। प्राणदाऽअपानदाः।। प्राणदाऽअपानदा
व्व्यानदाव्वर्च्चोदाव्वरिवोदाः।। अन्न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअस्म्मब्भ्यꣳशिवोभव

।।१५।। (५-२) अग्निस्तिग्मेन। शोचिषायासद्द्विश्श्वन्न्यत्त्रिणम्।। अग्निन्नोँव्वनतेरयिम्
।।१६।। यऽइमा। व्विश्श्वाभुवनानिजुह्व्वदृषिर्होतान्न्यसीदत्त्पितानः।। सऽआशिषाद्द्रविण
मिच्छमानःप्प्रथमच्छदवराँ२।।ऽआविवेश।।१७।। किꣳस्वित्।। किꣳस्विदासीदधिष्ठानमार
म्भणङ्कतमत्त्स्वित्त्कथासीत्।। यतोभूमिञ्जनयन्न्विश्श्वकर्म्माव्विद्द्यामौर्ण्णोन्महिनाव्विश्श्व
चक्षाः।।१८।। व्विश्श्वतश्च्चक्षुरुत। व्विश्श्वतोमुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्प्पात्।।
सम्बाहुब्भ्यान्धमतिसम्पतत्त्रैर्द्यावाभूमीजनयन्देवऽएकः।।१९।। किꣳस्वित्।। किꣳस्विद्वनङ्क
ऽउसव्वृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः।। मनीषिणोमनसापृच्छतेदुतद्यदद्ध्यतिष्ठ
द्भुवनानिधारयन्।।२०।। याते।। यातेधामानिपरमाणियावमायामद्ध्यमाव्विश्श्वकर्म्मन्नुतेमा।।
शिक्षासखिब्भ्योहविषिस्वधावःस्वयँय्यजस्वतन्वंव्वृधानः।।२१।। व्विश्श्वकर्म्मन्हविषा।
व्वावृधानःस्वयँय्यजस्वपृथिवीमुतद्याम्।। मुह्यन्त्वन्न्येऽअभितःसपत्न्काऽइहास्म्माकम्मघवा
सूरिरस्तु।।२२।। व्वाचस्प्पतिम्।। व्वाचस्प्पतिँव्विश्श्वकर्म्माणमूतयेमनोजुवंव्वाजेऽअद्द्याहुवेम ।।

सनोव्विश्श्वानिहवनानिजोषद्विश्श्वशम्भूरवसेसाधुकर्म्मा॥२३॥ व्विश्श्वकर्म्मन्न्हविषा॥
व्विश्श्वकर्म्मन्न्हविषाव्वर्द्धनेनत्त्रतारमिन्द्रमकृणोरवद्ध्यम्॥ तस्म्मैव्विशसमनमन्तपूर्व्वीरयमुग्ग्रो
व्विहव्योयथासत्॥२४॥ (९-३) चक्क्षुषपिता। मनसाहिधीराघृतमेनेऽअजनन्नम्म्नमाने॥
यदेदन्ताऽअददृहन्तपूर्व्वऽआदिद्द्यावापृथिवीऽअप्प्रथेताम्॥२५॥ व्विश्श्वकर्म्माव्विमना॥
व्विश्श्वकर्म्माव्विमनाऽआद्विहायाधाताव्विधातापरमोतसन्दृक्॥ तेषामिष्ष्टानिसमिषामदन्ति
यत्त्रासप्तऽऋषीन्न्परऽएकमाहुः॥२६॥

योनः। पिताजनितायोव्विधाताधामानिव्वेदभुवनानिव्विश्श्वा॥ योदेवानान्नामधाऽएकऽएवत
सम्प्प्रश्नम्भुवनायन्त्यन्न्या॥२७॥ तऽआयजन्तद्द्रविणसमस्म्माऽऋषयपूर्व्वेजरितारोनभूना॥
असूर्त्तेसूर्त्तेरजसिनिषत्तेयेभूतानिसमकृण्ण्वन्निमानि॥२८॥ परोदिवा। परऽएनापृथिव्व्यापरोदेवे
भिरसुरैर्य्यदस्त्ति॥ कस्विद्गर्ब्भम्प्रथमन्दद्ध्रऽआपोयत्त्रदेवाःसमपश्श्यन्तपूर्व्वे॥२९॥ तमित्॥
तामिद्गर्ब्भम्प्रथमन्दद्ध्रऽआपोयत्त्रदेवाःसमगच्छन्तव्विश्श्वे॥ अजस्य्नाभावद्ध्येकमर्प्पितय्य

स्मिन्विश्श्वानिभुवनानितस्त्थुः।।३०।। नतम्।। नतंव्विदाथयऽइमाजजानान्न्यद्युष्म्मा कमन्तरम्बभूव।। नीहारेणप्प्रावृताजल्प्प्याचासुतृपऽउक्क्थशासश्च्चरन्ति।।३१।। व्विश्श्व कर्म्मोहि।। व्विश्श्वकर्म्माह्यजनिष्ट्टदेवऽआदिद्द्गन्धर्व्वोऽअभवद्द्वितीयः।। तृतीयःपिताजनि तौषधीनामपाङ्गर्भंव्व्यदधात्त्पुरुत्त्रा।।३२।। (८-४) आशुःशिशानः।। आशुःशिशानोव्वृषभोन भीमोघनाघनःक्षोभणश्च्चर्षणीनाम्।। सङ्क्रन्दनोनिमिषऽएकवीरःशतᳬसेनाऽअजयत्त्साकमिन्द्रः ।।३३ ।। सङ्क्रन्दनेनानिमिषेण। जिष्ण्णुनायुत्त्कारेणदुश्च्च्यवनेनधृष्ण्णुना।। तदिन्द्रेणजयततत्त्सह द्ध्वँय्युधोनरऽइषुहस्त्तेनव्वृष्ण्णा।।३४।। सऽइषुहस्त्तैः।। सऽइषुहस्त्तैःसनिषङ्गिभिर्व्वशीसᳬस्त्रष्ट्टास युधऽइन्द्रोगणेन।। सᳬसृष्ट्टजित्त्सोमपाबाहुशद्ध्र्यूग्ग्रधन्न्वा प्प्रतिहिताभिरस्त्ता।।३५।। बृहस्प्पतेपरि। दीयारथेनरक्क्षोहामित्त्राँ२।।ऽअपबाधमानः।। प्रभञ्जन्त्सेनाःप्प्रमृणोयुधाजयन्नस्म्माकमेद्ध्यवि तारथानाम्।।३६।। बलविज्ञायस्त्थविरः।। बलविज्ञायस्त्थविरःप्प्रवीरःसहस्वान्वाजीसहमान ऽउग्ग्रः।। अभिवीरोऽअभिसत्त्वासहोजाजैत्त्रमिन्द्ररथमा तिष्ठ्ठगोवित्।।३७।। गोत्त्रभिदङ्गोविदम्।।

गोत्रभिदङ्गोविदंव्वज्ज्रबाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा।। इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳ
सखायोऽअनुसꣳरभद्ध्वम्।।३८।। अभिगोत्राणि।। अभिगोत्राणिसहसागाहमानोदयोव्वीरः
शतमन्न्युरिन्द्रः।। दुश्च्च्यवनःपृतनाषाडयुद्ध्योस्म्माकꣳ सेनाऽअवतुप्प्रयुत्त्सु।।३९।। इन्द्रऽआसाम्
।। इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्क्षिणायज्ञःपुरऽएतुसोमः।। देवसेनानामभिभञ्जतीनाञ्जयन्तीना
म्मरुतोयन्त्वग्ग्रम्।।४०।। इन्द्रस्यव्वृष्ण्णः।। इन्द्रस्यव्वृष्ण्णोव्वरुणस्यराज्ञऽआदित्त्यानाम्मरुताꣳ
शर्द्धऽउग्ग्रम्।। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्त्थात्।।४१।। उद्धर्षय।
मघवन्नायुधान्न्युत्त्सत्त्वनाम्मामकानाम्मनाꣳसि।। उद्वृत्रहन्व्वाजिनांव्वाजिनान्न्युद्रथानाञ्ज
यताँय्यन्तुघोषाः।।४२।। अस्म्माकमिन्द्रः।। अस्म्माकमिन्द्रꣳसमृतेषुद्ध्वजेष्ष्वस्म्माकँय्याऽइषवस्त्ता
जयन्तु।। अस्म्माकंव्वीराऽउत्तरेभवन्त्वस्म्माँ२।।ऽउदेवाऽअवताहवेषु।।४३।। अमीषाञ्चित्तम्।।
अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्न्यप्प्वेपरेहि।। अभिप्प्रेहिनिर्द्दहहृत्त्सुशोकैरन्धेनामित्त्रास्त्तम
सासचन्ताम्।।४४।। अवसृष्टापरा। पतशरव्व्येब्ब्रह्म्मसꣳशिते।। गच्छामित्त्रान्प्रपद्द्यस्व

मामीषाङ्कञ्चनोच्छिषः।।४५।। प्रेत।। प्रेताजयतानरइन्द्रोवःशर्म्मयच्छतु।। उग्रावःसन्तुबाहवोना
धृष्ष्यायथासथ।।४६।। असौया। सेनामरुतःपरेषामब्भ्यैतिनओजसास्प्पर्द्धमाना।। ताङ्गूहतत
मसापव्व्रतेनयथामीऽअन्न्योऽअन्न्यन्नजानन्।।४७।।
यत्रबाणाः। सम्पतन्तिकुमाराव्विशिखाऽइव।। तन्नऽइन्द्रोबृहस्प्पतिरदितिःशर्म्मयच्छतुव्विश्श्वा
हाशर्म्मयच्छतु।।४८।। मर्म्माणिते।। मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्त्वाराजामृतेनानुव
स्त्ताम्।। उरोर्व्वरीयोव्वरुणस्त्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु।।४९।। (१७–५) उदेनम्।।
उदेनमुत्तरान्नयाग्ग्नेघृतेनाहुत।। रायस्प्पोषेणसःसृजप्प्रजयाचबहुङ्कृधि।।५०।। शतम्।।९००।।
इन्द्रेमम्।। इन्द्रेमम्प्रतरान्नयसजातानामसद्द्वशी।। समेनंव्वर्च्चसासृजदेवानाम्भागदाऽअसत्
।।५१।। यस्यंकुर्म्मः।। यस्यंकुर्म्मोगृहेहविस्त्तमग्ग्नेव्वर्द्धयात्त्वम्।। तस्म्मैदेवाऽअधिब्ब्रवन्नयञ्च
ब्ब्रह्म्मणस्प्पतिः।।५२।। उदुत्त्वा।। उदुत्त्वाव्विश्श्वेदेवाऽअग्ग्नेभरन्तुचित्तिभिः।। सनोभवशिव
स्त्त्वःसुप्प्रतीकोव्विभावसुः।।५३।। पञ्चदिशः।। पञ्चदिशोदैवीर्य्यज्ञमवन्तुदेवीरपामतिन्दुर्म्मतिम्बा

धमानाꣳ।। रायस्प्पोषेयज्ञपतिमाभजन्तीरायस्प्पोषेऽअधियज्ञोऽअस्त्थात्।।५४।। समिद्धेऽअग्ग्नौ
।। समिद्धेऽअग्ग्नावधिमामहानऽउक्क्थपत्त्रऽईड्ड्योगृभीतः।। तप्प्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यद्य
ज्ञमयजन्तदेवाः।।५५।। दैव्व्यायधर्त्त्रे। जोष्ट्ट्रेदेवश्श्रीःश्रीमनाꣳशतपयाꣳ।। परिगृह्यदेवायज्ञ
मायन्देवादेवेब्भ्योऽअद्ध्वर्य्यन्तोऽअस्त्थुꣳ।।५६।। व्वीतꣳहविः। शमितꣳशमितायजद्ध्यैतुरीयोयज्ञो
यत्त्रहव्व्यमेति।। ततोव्वाकाऽआशिषोनोजुषन्ताम्।।५७।। सूर्य्यरश्म्मिर्हरिकेशꣳ। पुरस्त्तात्त्सविता
ज्ज्योतिरुदयाँ२।।ऽअजस्स्रम्।। तस्यपूषाप्प्रसवेयातिव्विद्द्वान्त्सम्पश्श्यन्न्विश्श्वाभुवनानिगोपाः
।।५८।। व्विमानऽएषः।। व्विमानऽएषदिवोमद्ध्यऽआस्त्तऽआपप्प्रिवान्न्रोदसीऽअन्तरिक्षम्।।
सव्विश्श्वाचीरभिचष्ट्टेघृताचीरन्तरापूर्व्वमपरञ्चकेतुम्।।५९।। उक्क्षासमुद्रः।। उक्क्षासमुद्द्रोऽ
अरुणःसुपर्ण्णःपूर्व्वस्स्ययोनिम्पितुराविवेश।। मद्ध्येदिवोनिहितꣳपृश्निरश्म्माव्विचक्क्रमेरजस
स्प्पात्त्यन्तौ।।६०।। इन्द्रंव्विश्श्वाः।। इन्द्रंव्विश्श्वाऽअवीवृधन्त्समुद्द्रव्व्यचसङ्गिरः।। रथीतमꣳ
रथीनांव्वाजानाꣳसत्त्पतिम्पतिम्।।६१।। देवहूर्य्यज्ञः।। देवहूर्य्यज्ञऽआचव्वक्षत्त्सुम्म्नहूर्य्यज्ञ

ऽआचव्वक्क्षत्।। यक्क्षदग्ग्निर्द्देवोदेवाँ२।।ऽआचव्वक्क्षत्।।६२।। व्वाजस्यमा। प्प्रसवऽउदद्ग्रा

भेणोदग्ग्रभीत्।। अधासपत्त्कानिन्द्रोमेनिग्ग्राभेणाधराँ२।।ऽअकः।।६३।। उदद्ग्राभञ्च। निग्ग्राभञ्च

ब्ब्रह्म्मदेवाऽअवीवृधन्।। अधासपत्न्कानिन्द्राग्ग्नीमेव्विषूचीनान्व्व्यस्यताम्।।६४।। (१५–६)

क्रमद्ध्वमग्ग्निना।। क्रमद्ध्वमग्ग्निनानाकमुक्ख्यꣳहस्त्तेषुबिब्भ्रतः।। दिवस्पृष्ठꣳस्वर्ग्गत्त्वामिश्श्रा

देवेभिराद्ध्वम्।।६५।। प्राचीमनु। प्प्रदिशम्प्रेहिव्विद्द्वानग्ग्नेरग्ग्नेपुरोऽअग्ग्निर्ब्भवेह।। व्विश्श्वाऽ

आशादीद्द्यानोव्विभाह्यूर्ज्जन्नोधेहिद्द्विपदेचतुष्प्पदे।।६६।। पृथिव्व्याऽअहम्।। पृथिव्व्याऽअह

मुदन्तरिक्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम्।। दिवोनाकस्यपृष्ठात्स्वर्ज्ज्योतिरगामहम्।।६७।।

स्वर्य्यन्तः।। स्वर्य्यन्तोनापेक्क्षन्तऽआद्द्याꣳरोहन्तिरोदसी।। यज्ञँय्येव्विश्श्वतोधारꣳसुविद्द्वाꣳ

सोव्वितेनिरे।।६८।। अग्ग्नेप्प्र।। अग्ग्नेप्प्रेहिप्प्रथमोदेवयताञ्चक्क्षुर्द्देवानामुतमर्त्त्यानाम्।। इयक्क्ष

माणाभृगुभिꣳसजोषाꣳस्वर्य्यन्तुयजमानाꣳस्वस्ति।।६९।। नक्क्तोषासा।। नक्क्तोषासासमन

साव्विरूपेधापयेतेशिशुमेकꣳसमीची।। द्यावाक्क्षामारुक्क्मोऽअन्तर्व्विभातिदेवाऽअग्ग्निन्धारयन्द्र

विणोदाः।।७०।। अग्ग्नेसहस्राक्क्ष। शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्व्यानाः।। त्वꣳसाहस्रस्यराय
ऽईशिषेतस्म्मैतेव्विधेमव्वाजायस्वाहा।।७१।। सुपण्र्णोसि। गरुत्क्मान्पृष्ठेपृथिव्व्याःसीद।।
भासान्तरिक्क्षमापृणज्ज्योतिषादिवमुत्तभानतेजसादिशऽउद्दृꣳह।।७२।।
आजुह्व्वानꣳसुप्प्रतीकꣳ।। पुरस्त्तादग्ग्नेस्वँय्योनिमासीदसाधुया।। अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मि
न्व्विश्श्वेदेवायजमानश्च्चसीदत।।७३।। ताꣳसवितुः।। ताꣳसवितुर्व्वरेण्ण्यस्यचित्रामाहंव्वृणे
सुमतिंव्विश्श्वजन्न्याम्।। यामस्यकण्ण्वोऽअदुहत्त्रपीनाꣳसहस्रधाराम्पयसामहीङ्गाम्।।७४।।
व्विधेमते।। परमेजन्मन्नग्ग्नेव्विधेमस्त्तोमैरवरेसधस्त्थे।। यस्म्माद्द्योनेरुदारिथायजेतम्प्रत्त्वेहवीꣳ
षिजुहुरेसमिद्धे।।७५।। प्रेद्धोऽअग्ग्ने।। प्रेद्धोऽअग्ग्नेदीदिहिपुरोनोजस्रयासूम्र्म्यायविष्ठ।। त्वाꣳश
श्श्वन्तऽउपयन्तिव्वाजाः।।७६।। अग्ग्नेतम्।। अग्ग्नेतमद्द्याश्श्वन्नस्त्तोमैꣳक्क्रतुन्नभद्द्रꣳहृदिस्पृशम्
।। ऋद्ध्यामातऽओहैः।।७७।। चित्तिञ्जुहोमि।। चित्तिञ्जुहोमिमनसाघृतेनयथादेवाऽइहागमन्व्वीति
होत्राऽऋतावृधः।। पत्त्येव्विश्श्वस्स्यभूमनोजुहोमिव्विश्श्वकर्म्मणेव्विश्श्वाहादाब्भ्यꣳहविः ।।७८।।

सप्प्तते। ऽअग्ग्नेसमिधः सप्प्तजिह्वाःसप्प्तऽऋषयःसप्प्तधामप्प्रियाणि।। सप्प्तहोत्त्राःसप्प्तधा त्त्वायजन्तिसप्प्तयोनीरापृणस्वघृतेनस्वाहा।।७९।। (१५–७) शुक्क्रज्ज्योतिश्च्च।। चित्रज्ज्योतिश्च्च सत्त्यज्ज्योतिश्च्चज्ज्योतिष्माँश्च्च।। शुक्क्रश्च्चऽऋतपाश्च्चात्त्यꣳहाः।।८०।। ईदृङ्ङ्च।। ईदृङ्ङ् चान्न्यादृङ्ङ्चसदृङ्ङ्चप्प्रतिसदृङ्ङ्च।। मितश्च्चसम्मितश्च्चसभराः।।८१।। ऋतश्च्चसत्त्य श्च्चद्ध्रुवश्च्चधरुणश्च्च।। धर्त्ताचव्विधर्त्ताचव्विधारयः।।८२।। ऋतजिच्च। सत्त्यजिच्चसेन जिच्चसुषेणश्च्च।। अन्तिमित्त्रश्च्चदूरेऽअमित्त्रश्च्चगणः।।८३।। ईदृक्क्षासऽएतादृक्क्षासः।। ईदृक्क्षासऽएतादृक्क्षासऽऊषुणः सदृक्क्षासःप्प्रतिसदृक्क्षासऽएतन।। मितासश्च्चसम्मितासोनो ऽअद्द्यसभरसोमरुतोयज्ञेऽअस्म्मिन्।।८४।। स्वतवाँश्च्च। प्प्रघासीचसान्तपनश्च्चगृहमेधीच।। क्क्रीडीचशाकीचोज्जेषी।।८५।। इन्द्रन्दैवीः।। इन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्क्मानोभवन्न्यथेन्द्रन्दैवी र्व्विशोमरुतोनुवर्त्क्मानोभवन्।। एवमिमँय्यजमानन्दैवीश्च्चव्विशोमानुषीश्च्चानुवर्त्क्मानोभवन्तु ।।८६।। (७–८) इमꣳस्तनम्।। इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ग्नेसरिरस्यमद्ध्ये।।

उत्त्संञ्जुषस्वमधुंमन्तमर्व्वन्त्समुद्द्रियꣳसदंनमाविंशस्व।।८७।। घृतम्मिमिक्क्षे। घृतमंस्ययोनिंर्घृते

शि्श्रतोघृतंवंस्यधामं।। अनुष्ष्वधमावंहमादयंस्वस्वाहांकृतंव्वृषभव्वक्क्षिहव्व्यम्।।८८।। समुद्द्रा

दूर्म्मिः।। समुद्द्रादूर्म्मिर्म्मधुंमाँ२।।ऽउदांरदुपाꣳशुनासमंमृतत्त्वमांनट्।। घृतस्यनामगुह्यँय्यदस्ति

जिह्व्वादेवानांममृतंस्यनाभिः।।८९।। व्वयन्नामं।। व्वयन्नामप्प्रब्ब्रंवामाघृतस्यास्म्मिन्न्यज्ञेधांर

यामानमोंभिः।। उपंब्ब्रह्म्माश्श्रृंणवच्छस्यमांनञ्चतुःशृङ्गोवमीद्गौरऽएतत्।।९०।। चत्त्वारिंशृङ्गा ।।

चत्त्वारिंशृङ्गात्त्रयोंऽअस्यपादाद्द्वेशीर्षेसप्प्तहस्त्तांसोऽअस्य।। त्रिधांबद्धोव्वृंषभोरोंरवीतिमहोदेवो

मर्त्त्यांर।।ऽआविंवेश।।९१।। त्रिधांहितम्।। त्रिधांहितम्पणिभिंर्ग्गुह्यमांनङ्गविंदेवासोंघृतमन्न्वं

विन्दन्।। इन्द्रऽएकꣳसूर्य्यऽएकंञ्जजानव्वेनादेकꣳस्वधयानिष्ट्टंतक्क्षुः।।९२।। एताऽअंर्षन्ति।।

एताऽअंर्षन्तिहृद्द्यांत्त्समुद्द्रच्छतव्व्रंजारिपुणानावचक्क्षें।। घृतस्यधारांऽअभिचांकशीमिहिरण्ण्ययो

व्वेतसोमद्ध्यंऽआसाम्।।९३।। सम्म्यक्क्स्रंवन्ति। सरितोनधेनांऽअन्तर्हृदामनंसापूयमांनाः।।

एतेऽअंर्षन्त्यूर्म्मयोंघृतस्यंमृगाऽइंवक्क्षिपणोरीषंमाणाः।।९४।। सिन्धोंरिवप्प्राद्ध्वने। शूंघनासोवातं

प्प्रमियꣳपतयन्तियह्व्वाः।। घृतस्यधाराऽअरुषोनव्वाजीकाष्ठाभिन्दन्नूर्म्मिभिꣳपिन्न्वमानꣳ
।।९५।। अभिप्प्रवन्त।। अभिप्प्रवन्तसमनेवयोषाꣳकल्ल्याण्ण्यः स्मयमानासोऽअग्निम्।। घृतस्य
धाराꣳसमिधोनसन्तताजुषाणोहर्य्यतिजातवेदाꣳ।।९६।। कन्न्याऽइवव्वहतुम्।। कन्न्याऽइवव्वहतु
मेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि।। यत्रसोमः सूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्त्पवन्ते
।।९७।। अब्भ्यर्षत। सुष्टुतिङ्गव्व्यमाजिमस्म्मासुभद्द्राद्द्रविणानिधत्त।। इमँय्यज्ञन्नयतदेवतानो
घृतस्य धारामधुमत्त्पवन्ते।।९८।। धामन्ते।। धामन्तेव्विश्श्वम्भुवनमधिश्श्रितमन्तःसमुद्द्रे
हृद्द्यन्तरायुषि।। अपामनीकेसमिथेयऽआभृतस्त्तमश्श्याममधुमन्तन्तऽऊर्म्मिम्।।९९।। (१३-९)
इतिश्रीवाजसनेयसंहितायांसप्तदशोऽध्यायः।।१७।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।।
वाजः, सत्त्य, मूर्क्कच्चतुष्का, अश्म्मा, ऽग्गिनस्त्रिका, वꣳशुः पञ्चै, काचतस्रो, व्वाजायद्वे,
व्वाजस्यन्वष्टा, ऽऋताषाट्त्रयोदशा, ग्ग्निंयुनज्मिसप्त, यदाकूता, द्वात्र्रहत्त्यायदशकौ,
त्रयोदशसप्तसप्ततिः।। (अ. १८ मं. ७७ अनु. १३) हरिः ॐ।। व्वाजश्च्च। मेप्प्रसवश्च्चमे

प्प्रयतिश्च्चमेप्प्रसितिश्च्चमेधीतिश्च्चमेक्क्रतुश्च्चमेस्वरश्च्चमेश्श्लोकश्च्चमेश्श्रवश्च्चमेश्श्रुति

श्च्चमेज्ज्योतिश्च्चमेस्वश्च्चमेयज्ञेनकल्प्पन्ताम्।।१।। प्राणश्च्च। मेपानश्च्चमेव्व्यानश्च्चमेसु

श्च्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्क्चमेमनश्च्चमेचक्षुश्च्चमेश्श्रोत्रञ्चमेदक्षश्च्चमेबलञ्चमेयज्ञे

नकल्प्पन्ताम्।।२।। ओजश्च्च। मेसहश्च्चमऽआत्त्माचमेतनूश्च्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिच

मेस्त्थीनिचमेपरूᳮषिचमेशरीराणिचमऽआयुश्च्चमेजराचमेयज्ञेनकल्प्पन्ताम्।।३।। ज्यैष्ठ्यञ्च।

मऽआधिपत्त्यञ्चमेमन्न्युश्च्चमेभामश्च्चमेमश्च्चमेम्भश्च्चमेजेमाचमेमहिमाचमेव्वरिमाचमेप्प्र

थिमाचमेव्वर्षिमाचमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्च्चमेयज्ञेनकल्प्पन्ताम्।।४।। (४-१)

सत्त्यञ्च। मेश्श्रद्धाचमेजगच्चमेधनञ्चमेव्विश्श्वञ्चमेमहश्च्चमेक्क्रीडाचमेमोदश्च्चमेजातञ्चमेज

निष्ष्यमाणञ्चमेसूक्क्तञ्चमेसुकृतञ्चमेयज्ञेनकल्प्पन्ताम्।।५।। ऋतञ्च। मेमृतञ्चमेयक्ष्मञ्चमेनामयच्च

मेजीवातुश्च्चमेदीर्ग्घायुत्त्वञ्चमेनमित्त्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्च्चमेसुदिनञ्चमेयज्ञेनकल

प्पन्ताम्।।६।। यन्ताच। मेधर्त्ताचमेक्षेमश्च्चमेधृतिश्च्चमेव्विश्श्वञ्चमेमहश्च्चमेसंविच्चमेज्ञा

त्रञ्च मेसूश्च्चमेप्प्रसूश्च्चमेसीरञ्चमेलयश्च्चमेयज्ञेनकल्प्पन्ताम्।।७।। शञ्च। मेमयश्च्च
मेप्प्रियञ्जमेनुकामश्च्चमेकामश्च्चमेसौमनसश्च्चमेभगश्च्चमेद्द्रविणञ्चमेभद्द्रञ्चमेश्श्रेयश्च्चमे॰
वसीयश्च्चमेयशश्च्चमेयज्ञेनकल्प्पन्ताम्।।८।। (४-२) ऊर्क्कच।। ऊर्क्कचमेसूनृताचमेपय
श्च्चमेरसश्च्चमेघृतञ्चमेमधुचमेसग्ग्धिश्च्चमेसपीतिश्च्चमेकृषिश्च्चमेव्वृष्ट्टिश्च्चमेजैत्त्रञ्चमऽ
औद्द्भिद्द्यञ्चमेयज्ञेनकल्प्पन्ताम्।।९।। रयिश्च्च। मेरायश्च्चमेपुष्ट्टञ्चमेपुष्ट्टिश्च्चमेव्विभुचमे
प्प्रभुचमेपूर्ण्णञ्चमेपूर्ण्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्क्षुच्चमेयज्ञेनकल्प्पन्ताम्।।१०।।
व्वित्तञ्च। मेव्वेद्द्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमेसुपत्थ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्च्चमेक्लृप्प्तञ्च
मेक्लृप्प्तिश्च्चमेमतिश्च्चमेसुमतिश्च्चमेयज्ञेनकल्प्पन्ताम्।।११।। व्व्रीहयश्च्च। मेयवाश्च्चमेमाषा
श्च्चमेतिलाश्च्चमेमुद्द्गाश्च्चमेखल्ल्वाश्च्चमेप्प्रियङ्गवश्च्चमेणवश्च्चमेश्श्यामाकाश्च्चमेनी
वाराश्च्चमेगोधूमाश्च्चमेमसूराश्च्चमेयज्ञेनकल्प्पन्ताम्।।१२।। (४-३) अश्म्माच। मेमृत्तिका
चमेगिरयश्च्चमेपर्व्वताश्च्चमेसिकताश्च्चमेव्वनस्प्पतयश्च्चमेहिरण्ण्यञ्चमेयश्च्चमेश्श्यामञ्चमे

लोहश्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम्।।१३।। अग्निश्च। मऽआपश्चमेव्वीरुधश्चच मऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्चमेग्राम्याश्चमेपशवऽआरण्याश्चमे व्वित्तञ्चमेव्वित्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्प्पन्ताम्।।१४।। व्वसुच। मेव्वसतिश्चमे कर्म्मच।। मेशक्क्तिश्चमेर्थश्चमएमश्चमऽइत्याचमेगतिश्चमेयज्ञेनकल्प्पन्ताम्।।१५।। (३-४) अग्निश्च। मइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीच मऽइन्द्रश्च मेपूषाचमऽइन्द्रश्चमेबृहस्प्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम्।।१६।। मित्र श्च। मऽइन्द्रश्चमेव्वरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्रश्चमेत्त्वष्टाचमऽइन्द्रश्चमेमरुत श्चमऽइन्द्रश्चमेव्विश्श्वेचमेदेवाऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम्।।१७।। पृथिवीच। मऽइन्द्रश्च मेन्तरिक्षञ्चमुऽइन्द्रश्चमेद्यौश्चमऽइन्द्रश्चमेसमाश्चमऽइन्द्रश्चमेनक्षत्राणिचमऽइन्द्रश्च मेदिशश्चमऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम्।।१८।। (३-५) अꣳशुश्च। मेरश्मिश्चमेदाब्भ्य श्चमेधिपतिश्चमऽउपाꣳशुश्चमेन्तर्य्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआश्विव

नश्च्चमेप्प्रतिप्प्रस्त्थानश्च्चमेशुक्क्रश्च्चमेमन्थीचमेयज्ञेनकल्प्पन्ताम्।।१९।। आग्ग्रयणश्च्च।
मेव्वैश्श्वदेवश्च्चमेद्ध्ध्रुवश्च्चमेव्वैश्श्वानरश्च्चमऽऐन्द्राग्ग्नश्च्चमेमहावैश्श्वदेवश्च्चमेमरुत्त्वतीया
श्च्चमेनिष्क्केवल्ल्यश्च्चमेसावित्त्रश्च्चमेसारस्वतश्च्चमेपात्क्नीवतश्च्चमेहारियोजनश्च्चमेयज्ञेन
कल्प्पन्ताम्।।२०।। स्त्रुचश्च्च। मेचमसाश्च्चमेव्वायव्व्यानिचमेद्द्रोणकलशश्च्चमेग्ग्रावाण
श्च्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्च्चमेव्वेदिश्च्चमेबर्हिश्च्चमेवभृथश्च्चमेस्वगाकार
श्च्चमेयज्ञेनकल्प्पन्ताम्।।२१।। अग्ग्निश्च्च। मेघर्म्मश्च्चमेर्क्कश्च्चमेसूर्य्यश्च्चमेप्प्राणश्च्च
मेश्श्वमेधश्च्चमेपृथिवीचमेदितिश्च्चमेदितिश्च्चमेद्द्यौश्च्चमेङ्गुलयꣳशक्क्वरयोदिशश्च्चमेयज्ञेन
कल्प्पन्ताम् ।।२२ ।। व्व्रतञ्च । मऽऋतवश्च्चमेतपश्च्चमेतपश्च्चमेसंवत्त्सरश्च्चमेहोरात्त्रेऽऊर्व्वष्ठ्ठी
वेबृहद्द्रथन्तरेचमेयज्ञेनकल्प्पन्ताम्।।२३।। (५-६) एकाच। मेतिस्स्रश्च्चमेतिस्स्रश्च्चमेपञ्चचमे
पञ्चचमेसप्प्तचमेसप्प्तचमेनवचमेनवचमऽएकादशचमऽएकादशचमेत्त्रयोदशचमेत्त्रयोदशचमेपञ्च
दशचमेपञ्चदशचमेसप्प्तदशचमेसप्प्तदशचमेनवदशचमेनवदशचमऽएकविꣳशतिश्च्चमऽएकविꣳ

शतिश्च्चमेत्त्रयोविꣳशतिश्च्चमेत्त्रयोविꣳशतिश्च्चमेपञ्चविꣳशतिश्च्चमेपञ्चविꣳशतिश्च्चमेसप्प्त

विꣳशतिश्च्चमेसप्प्तविꣳशतिश्च्चमेनवविꣳशतिश्च्चमेनवविꣳशतिश्च्चमऽएकत्त्रिꣳशच्चमऽएक

त्त्रिꣳशच्चमेत्त्रयस्त्रिꣳशच्चमेयज्ञेनकल्प्पन्ताम्।।२४।। चतस्स्रश्च्च। मेष्ट्टौचमेष्ट्टौचमेद्द्वादश

चमेद्द्वादशचमेषोडशचमेषोडशचमेव्विꣳशतिश्च्चमेव्विꣳशतिश्च्चमेचतुर्व्विꣳशतिश्च्चमेचतुर्व्विꣳ

शतिश्च्चमेष्ट्टाविꣳशतिश्च्चमेष्ट्टाविꣳशतिश्च्चमेद्द्वात्त्रिꣳशच्चमेद्द्वात्त्रिꣳशच्चमेषट्ट्त्रिꣳशच्चमे

षट्ट्त्रिꣳशच्चमेचत्त्वारिꣳशच्चमेचत्त्वारिꣳशच्चमेचतुश्च्चत्त्वारिꣳशच्चमेचतुश्च्चत्त्वारिꣳशच्चमेष्ट्टा

चत्त्वारिꣳशच्चमेयज्ञेनकल्प्पन्ताम्।।२५।। त्र्यविश्च्च। मेत्त्र्यवीचमेदित्त्यवाट्ट्चमेदित्त्यौहीचमेपञ्चा

विश्च्चमेपञ्चावीचमेत्त्रिवत्त्सश्च्चमेत्त्रिवत्त्साचमेतुर्य्यवाट्ट्चमेतुर्य्यौहीचमेयज्ञेनकल्प्पन्ताम्

।।२६।। षष्ठ्ठवाट्ट्च।। षष्ठ्ठवाट्ट्चमेषष्ठ्ठौहीचमऽउक्क्षा चमेव्वशाचमऽऋषभश्च्चमेव्वेहच्चमेन

ड्ड्वाँश्च्चमेधेनुश्च्चमेयज्ञेनकल्प्पन्ताम्।।२७।। (४-७)

व्वाजायस्वाहा। प्प्रसवायस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहाहन्ने

मुग्धायस्वाहामुग्धायंव्वैनꣳशिनायस्वाहाव्विनꣳशिनंऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वा
हाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा।। इयन्तेराण्णिमत्त्रायंयन्तासियमनऽऊर्ज्जे
त्वाव्वृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्त्याय।।२८।। आयुर्य्यज्ञेन। कल्प्पताम्प्राणोयज्ञेनकल्प्पताञ्च
क्क्षुर्य्यज्ञेनकल्प्पताꣳश्रोत्त्रंय्यज्ञेनकल्प्पतांव्वाग्ग्यज्ञेनकल्प्पताम्मनोयज्ञेनकल्प्पतामात्त्मायज्ञेन
कल्प्पताम्ब्रह्म्मायज्ञेनकल्प्पताञ्ज्योतिर्य्यज्ञेनकल्प्पताꣳस्वर्य्यज्ञेनकल्प्पताम्पृष्ट्ठँय्यज्ञेनकल्प्पताँ
यज्ञोयज्ञेनकलप्पताम्। स्तोमश्च्चयजुश्च्चऽऋक्च्चसामचबृह च्चरथन्तरञ्च।। स्वर्द्देवाऽअगन्म्मा
मृताऽअभूमप्प्रजापतेꣳप्प्रजाऽअभूमव्वेट्ट्स्वाहा।।२९।। (२-८)

व्वाजस्यनु। प्प्रसवेमातरम्महीमदितिन्नामव्वचसाकरामहे। यस्यामिदंव्विश्श्वम्भुवनमाविवेशत
स्यान्नोदेवःसविताधर्म्मसाविषत्।।३०।। व्विश्श्वेऽअद्द्य। मरुतोव्विश्श्वऽऊतीव्विश्श्वेभवन्त्व
ग्नयꣳसमिद्धाः।। व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्वमस्त्तुद्द्रविणंव्वाजोऽअस्म्मे।।३१।।
व्वाजोनः।। सप्प्तप्प्रदिशश्च्चतस्स्रोवापरावतः।। व्वाजोनोव्विश्श्वैर्द्देवैर्द्धनसाताविहावतु।।३२।।

व्वाजोनः।। व्वाजोनोऽअद्यप्प्रसुवातिदानंव्वाजोदेवाँ२।।ऽऋतुभिः कल्प्पयाति।। व्वाजोहिमा सर्व्वीरञ्जजानव्विश्श्वाऽआशाव्वाजपतिर्ज्जयेयम्।।३३।। व्वाजः पुरस्तात्।। व्वाजः पुरस्ता दुतमद्ध्यतोनोव्वाजोदेवान्हविषाव्वर्द्धयाति।। व्वाजोहिमासर्व्वीरञ्चकारसर्व्वाऽआशाव्वाजपति र्ब्भवेयम्।।३४।। सम्मा। सृजामिपयसापृथिव्व्याःसम्मासृजाम्म्यद्भिरोषधीभिः। सोहंव्वाजः सनेयमग्ग्ने।।३५।। पयः पृथिव्व्याम्।। पयः पृथिव्व्याम्पयऽओषधीषुपयोदिव्व्युन्तरिक्षेपयोधाः।। पयस्वतीःप्प्रदिशः सन्तुमह्यम्।।३६।। देवस्यत्त्वा। सवितुःप्प्रसवेश्शिवनोर्ब्बाहुब्भ्याम्पूष्णोहस्ता ब्भ्याम्।। सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्ग्नेःसाम्राज्ज्येनाभिषिञ्चामि।।३७।। (८-९) ऋताषाड्ऋत धामा।। ऋताषाड्ऋतधामाग्ग्निर्गन्धर्व्वस्तस्यौषधयोप्सरसोमुदोनाम।। सनऽइदम्ब्रह्मक्षत्रम्पातुत स्म्मैस्वाहाव्वाट्ताब्भ्यःस्वाहा।।३८।। सꣳहितोव्विश्श्वसामा। सꣳहितोव्विश्श्वसामा सूर्य्योगन्धर्व्वस्तस्यमरीचयोप्सरसऽआयुवोनाम।। सनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहावाट्ता ब्भ्यःस्वाहा।।३९।। सुषुम्म्णःसूर्य्यरश्मिमः।। सुषुम्म्णःसूर्य्यरश्मिमश्चचन्द्रमागन्धर्व्वस्तस्य नक्षत्रा

ण्णयप्प्सरसोभेकुरयोनाम।। सनऽइदम्ब्रह्म्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्ट्ताब्भ्यꣳस्वाहा।।४०।। इषिरोव्विश्श्वव्व्यचाः।। इषिरोव्विश्श्वव्व्यचाव्वातोगन्धर्व्वस्तस्यापोऽअप्प्सरसऽऊर्ज्जोनाम।। सनऽइदम्ब्रह्म्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्ट्ताब्भ्यꣳस्वाहा।।४१।। भुज्ज्युःसुपर्ण्णः।। भुज्ज्युः सुपर्ण्णोयज्ञोगन्धर्व्वस्तस्यदक्षिणाऽअप्प्सरसस्तावानाम।। सनऽइदम्ब्रह्म्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्ट्ताब्भ्यꣳस्वाहा।।४२।। प्रजापतिर्व्विश्श्वकर्म्मा। प्रजापतिर्व्विश्श्वकर्म्मामनोगन्धर्व्वस्तस्यऽऋक्क्सामान्यप्प्सरसऽएष्ट्टयोनाम।। सनऽइदम्ब्रह्म्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्ट्ताब्भ्यꣳस्वाहा।।४३।। सनः।। सनोभुवनस्यपतेप्प्रजापतेयस्यतऽउपरिगृहायस्यवेह।। अस्म्मैब्ब्रह्म्मणेस्म्मैक्षत्रायमहिशर्म्मयच्छस्वाहा।।४४।। समुद्द्रोसि।। समुद्द्रोसिनभस्वानार्द्रदानुꣳशम्भूर्म्मयोभूरभिमाव्वाहिस्वाहामारुतोसिमरुताङ्गणःशम्भूर्म्मयोभूरभिमाव्वाहिस्वाहावस्यूरसिदुवस्वाञ्छम्भूर्म्मयोभूरभिमाव्वाहिस्वाहा।।४५।। यास्ते।। यास्तेऽअग्ग्नेसूर्य्येरुचोदिवमातन्न्वन्तिरश्म्मिभिः।। ताभिर्न्नोऽअद्द्यसर्व्वाभीरुचेजनायनस्कृधि।।४६।। यावः।। यावोदेवाꣳसूर्य्येरुचोगोष्ष्वश्श्वेषुया

रुचः।। इन्द्राग्ग्नीताभिःसर्व्वाभीरुचन्नोधत्तबृहस्प्पते।।४७।। रुचन्नः।। रुचन्नोधेहिब्ब्राह्म्मणे
षुरुचꣳराजसुनस्कृधि।। रुचंव्विश्श्येषुशूद्द्रेषुमयिधेहिरुचारुचम्।।४८।। तत्त्वा। यामिब्ब्रह्म्मणा
व्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः।। अहेडमानोव्वारुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः
।।४९।। स्वर्ण्ण।। स्वर्ण्णघर्म्मःस्वाहास्वर्ण्णार्क्कःस्वाहास्वर्ण्णशुक्क्रःस्वाहास्वर्ण्णज्ज्योतिः
स्वाहास्वर्ण्णसूर्य्यःस्वाहा।।५०।। (१३-१०) अग्ग्निँय्युनज्मि।। अग्ग्निँय्युनज्मिशवसाघृतेन
दिव्यꣳसुपर्ण्णंव्वयसाबृहन्तम्।। तेनव्वयङ्गमेमब्ब्रध्नस्यव्विष्टपꣳस्वोरुहाणाऽअधिनाकमुत्तमम्
।।५१।। शतम्।।१०००।। इमौते। पक्षावजरौपतत्त्रिणौयाब्भ्याꣳरक्षाꣳस्यपहꣳ स्यग्ग्ने।।
ताब्भ्याम्पतेमसुकृतामुलोकँय्यत्रऽऋषयोजग्ग्मुःप्प्रथमजाःपुराणाः।।५२।। इन्दुर्द्दक्षः। श्येनऽऋ
तावाहिरण्ण्यपक्षःशकुनोभुरण्युः।। महान्त्सधस्त्थेद्ध्रुवऽआनिषत्तोनमस्त्तेऽअस्तुमामाहिꣳसीः
।।५३।। दिवोमूर्द्धा। सिपृथिव्व्यानाभिरूर्ग्गपामोषधीनाम्।। व्विश्श्वायुःशर्म्मसप्प्रथानमस्प्पथे
।।५४।। व्विश्श्वस्यमूर्द्धन्।। व्विश्श्वस्यमूर्द्धन्नधितिष्ठसिश्श्रितःसमुद्द्रेतेहृदयमप्प्स्वायुरपोदत्तो

दधिम्भिन्त।। दिवस्प्पर्ज्जन्न्यादन्तरिक्क्षात्त्पृथिव्व्यास्त्ततोनोव्वृष्ष्ट्याव।।५५।। इष्ष्टोयज्ञः।। इष्ष्टो यज्ञोभृगुभिराशीर्द्दाव्वसुभिः।। तस्यनऽइष्ष्टस्यप्प्रीतस्यद्द्रविणेहागमेः।।५६।। इष्ष्टोऽअग्ग्निः।। इष्ष्टोऽअग्ग्निराहुतःपिपर्त्तुनऽइष्ष्टꣳहविः।। स्वगेदन्देवेब्भ्योनमः।।५७।। (७-११) यदाकूतात्।। यदाकूतात्त्समसुस्स्रोद्धृदोवामनसोवासम्भृतञ्चक्क्षुषोवा।। तदनुप्प्रेतसुकृतामुलोकँय्यत्रऽऋषयोजग्ग्मुः प्प्रथमजाःपुराणाः।।५८।। एतꣳसधस्त्थ।। एतꣳसधस्त्थपरितेददामियमावहाच्छेवधिञ्जातवेदाः।। अन्न्वागन्तायज्ञपतिर्वोऽअत्त्रतꣳस्म्मजानीतपरमेव्व्योमन्।।५९।। एतञ्जानाथ। परमेव्व्यो मन्देवाःसधस्त्थाव्विदरूपमस्य।। यदागच्छात्त्पथिभिर्द्देवयानैरिष्ष्टापूर्त्तेकृणवाथाविरस्म्मै ।।६०।। उद्द्बुद्ध्यस्व।। उद्द्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्ष्टापूर्त्तेसꣳसृजेथामयञ्च।। अस्म्मिन्तसधस्त्थे ऽअद्ध्युत्तरस्म्मिन्न्विश्श्वेदेवायजमानश्च्चसीदत।।६१।। येनव्वहसि। सहस्स्रँय्येनाग्ग्नेसर्व्ववेदसम् ।। तेनेमँय्यज्ञन्नोनयस्स्वर्द्देवेषुगन्तवे।।६२।। प्रस्त्तरेणपरिधिना। स्स्रुचाव्वेद्द्याचबर्हिषा।। ऋचेमँय्य ज्ञन्नोनयस्स्वर्द्देवेषुगन्तवे।।६३।। यद्दत्तम्।। यद्दत्तँय्यत्त्परादानँय्यत्त्पूर्त्तँय्याश्च्चदक्क्षिणाः।। तदग्ग्नि

व्वैश्शवकर्म्मणः स्वर्द्देवेषुनोदधत्।।६४।। यत्रधाराः।। यत्रधाराऽअनपेतामधोर्ग्घृतस्यचयाः।। तदग्गिनव्वैश्शवकर्म्मणः स्वर्द्देवेषुनोदधत्।।६५।। अग्गिनरस्मिम।। अग्गिनरस्मिमजन्म्मनाजातवेदाघृत म्मेचक्क्षुरमृतम्मऽआसन्।। अर्क्कस्त्रिधातूरजसोव्विमानोजस्रोघर्म्मोहविरस्मिमनाम।।६६।। ऋचोनाम।। ऋचोनामास्मिमयजूषिनामास्मिमसामानिनामास्मिम।। येऽअग्गनयःपाञ्चजन्न्या ऽअस्याम्पृथिव्व्यामधि।। तेषामसित्त्वमुत्तमःप्प्रनोजीवातवेसुव।।६७।। (१०-१२) व्वार्त्रहत्त्या यशवसे पृतनाषाह्यायच।। इन्द्रत्त्वावर्त्तयामसि।।६८।। सहदानुम्पुरुहूत। क्षियन्तमहस्त मिन्द्रसम्पिणक्कुणारुम्।। अभिवृत्रंव्वर्द्धमानम्पियारुमपादमिन्द्रतवसाजघन्थ।।६९।। व्विन।। व्विनऽइन्द्रमृधोजहिनीचायच्छपृतन्न्यतः।। योऽअस्म्माँ२।।ऽअभिदासत्त्यधरङ्गमयातमः।।७०।। मृगोन। भीमःकुचरोगिरिष्ठाःपरावतऽआजगन्थापरस्याः।। सृकसशायपविमिन्द्रतिग्ग्मव्वि शत्रून्ताढिव्विमृधोनुदस्व।।७१।। व्वैश्श्वानरोनः।। व्वैश्श्वानरोनऽऊतयऽआप्प्रयातुपरावतः।। अग्गिनर्न्नःसुष्टुतीरुप।।७२।। पृष्ट्टोदिवि। पृष्ट्टोऽअग्गिनःपृथिव्व्याम्पृष्ट्टोव्विश्श्वाऽओषधीरा

विवेश।। व्वैश्श्वानरः सहसापृष्ट्टोऽअग्निः सनोदिवासरिषस्प्पातुनक्क्तम्।।७३।। अश्श्यामतम्।।
अश्श्यामतङ्कामंमग्ग्नेतवोतीऽअश्श्यामरयिँरयिवः सुवीरम्।। अश्श्यामव्वाजमभिवाजयन्तो
श्श्यामद्द्युम्म्नमजराजरन्ते।।७४।। व्वयन्ते।। व्वयन्तेऽअद्द्यररिमाहिकाममुत्तानहस्त्तानमसोप
सद्द्य।। यजिष्ठ्ठेनमनसायक्षिदेवानस्स्रेधतामन्म्मनाव्विप्प्रोऽअग्ग्ने।।७५।। धामच्छदग्ग्निः।।
धामच्छदग्ग्निरिन्द्रोब्ब्रह्म्मादेवोबृहस्प्पतिः।। सचेतसोव्विश्श्वेदेवायज्ञम्प्रावन्तुनः शुभे।।७६।।
त्वँय्य्यविष्ठु। दाशुषोनॄँः पाहिशृणुधीगिरः।। रक्क्षातोकमुतत्क्मना।।७७।। (१०–१३)
इतिश्रीवाजसनेयसंहितायामष्टादशोऽध्यायः१८।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।।
स्वाद्द्वीन्त्वैकादश, देवायज्ञंविँशतिः, सुरावन्तँसप्तदशो, दीरतान्त्रयोदशा, च्याजानुर्दश,
सोमोराजाष्टौ, सीसेनतन्त्रँषोडश, सप्त पञ्चनवतिः।। (अ. १९ मं. ९५ अनु. ७) हरिः ॐ।।
स्वाद्द्वीन्त्वा। स्वादुनातीव्व्रान्तीव्व्रेणामृताममृतेन।। मधुमतीम्मधुमतासृजामिसँसोमेन।।
सोमोस्यश्श्विभ्भ्याम्पच्च्यस्वासरस्वत्त्यैपच्च्यस्वेन्द्रायसुत्राम्म्णेपच्च्यस्व।।१।। परीतः।।

परीतोषिञ्चतासुतꣳसोमोयऽउत्तमꣳहविः।। दधन्वायोनर्य्योऽअप्स्वन्तरासुषावसोममद्रिभिः।।२।।
व्वायोःपूतः। पवित्त्रेणप्प्रत्त्यङ्क्सोमोऽअतिद्रुतः।। इन्द्रस्ययुज्ज्यःसखा।। व्वायोःपूतःपवित्त्रेण
प्प्राङ्क्सोमोऽअतिद्रुतः।। इन्द्रस्ययुज्ज्यःसखा।।३।। पुनातिते। परिस्रुतꣳसोमꣳसूर्य्यस्यदुहिता।।
व्वारेणशश्श्वतातना।।४।। ब्रह्मक्षत्त्रम्।। ब्रह्मक्षत्त्रम्पवतेतेजऽइन्द्रियꣳसुरयासोमः
सुतऽआसुतोमदाय।। शुक्क्रेणदेवदेवताःपिपृग्ग्धिरसेनान्नँय्यजमानायधेहि।।५।।
कुविदङ्ग। यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंव्वियूय।। इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनम
ऽउक्क्तिँय्यजन्ति।। उपयामगृहीतोस्यश्श्विभ्यान्त्वासरस्वत्त्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णऽएषतेयो
निस्तेजसेत्त्वाव्वीर्य्यायत्त्वाबलायत्त्वा।।६।। नानाहि। वान्देवहितꣳसदस्कृतम्मासꣳसृक्षाथाम्परमे
व्व्योमन्।। सुरात्त्वमसिशुष्म्मिणीसोमऽएषमामाहिꣳसीःस्वाँय्योनिमाविशन्ती।।७।।
उपयामगृहीतोसि।। उपयामगृहीतोस्याश्श्विनन्तेजःसारस्वतंव्वीर्य्यमैन्द्रम्बलम्।। एषतेयोनिर्म्मो
दायत्त्वानन्दायत्त्वामहसेत्त्वा।।८।। तेजोसि।। तेजोसितेजोमयिधेहिव्वीर्य्यमसिव्वीर्य्यम्मयिधेहि

बलमसिबलम्मयिधेह्योजोस्योजोमयिधेहिमन्न्युरसिमन्न्युम्मयिधेहिसहोसिसहोमयिधेहि।।९।।
याव्व्याग्घ्रम्।। याव्व्याग्घ्रंव्विषूचिकोभौवृकञ्चरक्षति।। श्येनम्पतत्त्रिणꣳसिꣳहꣳ
सेमम्पात्त्वꣳहंसः।।१०।। यदापिपेष। मातरम्पुत्त्रःप्प्रमुदितोधयन्।। एतत्तदग्ग्नेऽअनृणोभवाम्म्यहं
तौपितरौमया।। सम्पृचस्त्थसम्माभद्द्रेणपृङ्क्तव्विपृचस्त्थव्विमापाप्प्मनापृङ्क्त।।११।। (११-
१) देवायज्ञम्।। देवायज्ञमतन्न्वतभेषजम्भिषजाश्श्विना।। व्वाचासरस्वतीभिषगिन्द्रायेन्द्रिया
णिदधतः।।१२।। दीक्क्षायैरूपम्।। दीक्क्षायैरूपꣳशष्प्पाणिप्प्रायणीयस्स्यतोक्क्मानि।।
क्रयस्स्यरूपꣳसोमस्स्यलाजाःसोमाꣳशवोमधु।।१३।। आतित्थ्यरूपम्मासरम्।। आतितथ्यरूपम्मा
सरम्महावीरस्स्यनग्ग्नहुः।। रूपमुपसदामेतत्तिस्स्रोरात्त्रीःसुरासुता।।१४।। सोमस्स्यरूपम्।।
सोमस्स्यरूपङ्क्रीतस्स्यपरिस्स्रुत्त्परिषिच्च्यते।। अश्श्विबभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳसरस्स्वात्त्या
।।१५।। आसन्दीरूपम्।। आसन्दीरूपꣳराजासन्द्यैव्वेद्द्यैकुम्भीसुराधानी।। अन्तरऽउत्तरवेद्द्या
रूपङ्कारोतरोभिषक्।।१६।। व्वेद्द्याव्वेदिः।। व्वेद्द्याव्वेदिꣳसमाप्प्यतेबर्हिषाबर्हिरिन्द्रियम्।।

यूपेनयूपऽआप्प्यतेप्प्रणीतोऽअग्निरग्निना।।१७।। हविर्द्धानँय्यत्।। हविर्द्धानँय्यदश्श्विनाग्ग्नी
द्ध्रँय्यत्सरस्वती।। इन्द्रायैन्द्रꣳसदस्कृतम्पत्न्कीशालङ्गार्हपत्त्यꣳ।।१८।। प्रैषेभिःप्प्रैषान्।।
प्रैषेभिःप्प्रैषानाप्प्नोत्त्याप्प्रीभिराप्प्रीर्य्यज्ञस्य।। प्रयाजेभिरनुयाजान्न्वषट्ट्कारेभिराहुतीꣳ।।१९।।
पशुभिःपशून्।। पशुभिःपशूनाप्प्नोतिपुरोडाशैर्हवीꣳष्या।। छन्दोभिꣳसामिधेनीर्य्याज्ज्याभि
र्व्वषट्ट्कारान्।।२०।। धानाꣳकरम्भः। सक्क्तवꣳपरीवापꣳपयोदधि।। सोमस्यरूपꣳहविषऽ
आमिक्क्षाव्वाजिनम्मधु।।२१।। धानानाꣳरूपम्।। धानानाꣳरूपङ्कुवलम्परीवापस्यगोधूमाꣳ।।
सक्क्तूनाꣳरूपम्बदरमुपवाकाꣳकरम्भस्य।।२२।। पयसोरूपम्।। पयसोरूपँय्यद्द्यवादध्नो
रूपङ्कर्क्कन्धूनि।। सोमस्यरूपंव्वाजिनꣳसौम्म्यस्यरूपमामिक्क्षा।।२३।। आश्श्रावय।।
आश्श्रावयेतिस्त्तोत्त्रियाꣳप्प्रत्त्याश्श्रावोऽअनुरूपꣳ।। यजेतिधाय्यारूपम्प्रगाथायेयजामहाः ।।२४।।
अर्द्धऽऋचैरुक्क्थानाम्।। अर्द्धऽऋचैरुक्क्थानाꣳरूपम्पदैराप्प्नोतिनिविदः।। प्रणवैः
शस्त्राणाꣳरूपम्पयसासोमऽआप्प्यते।।२५।। अश्श्विभ्भ्याम्प्रातꣳसवनम्।। अश्श्विभ्भ्याम्प्रातꣳ

सवनमिन्द्रेणैन्द्रम्माद्ध्यन्दिनम्।। व्वैश्श्वदेवꣳसरस्वत्यातृतीयमाप्प्तꣳसवनम्।।२६।। व्वायव्व्यै
व्वायव्व्यानि।। व्वायव्व्यैव्वायव्व्यान्न्याप्प्नोतिसतेनद्द्रोणकलशम्।। कुम्भीब्भ्यामम्भृणौसुते
स्त्थालीभिस्त्थालीराप्प्नोति।।२७।। यजुर्ब्भिराप्प्यन्ते।। यजुर्ब्भिराप्प्यन्तेग्ग्रहाग्ग्रहैस्त्तोमाश्श्च
व्विष्ट्टुतीः।। छन्दोभिरुक्क्थाशस्त्राणिसाम्म्नावभृथऽआप्प्यते।।२८।। इडाभिर्ब्भक्क्षान्।
इडाभिर्ब्भक्क्षानाप्प्नोतिसूक्क्तवाकेनाशिषः।। शँय्युनापत्त्नीसँय्याजान्त्समिष्ट्टयजुषासꣳ
स्त्थाम्।।२९।। व्व्रतेनदीक्क्षाम्।। व्व्रतेनदीक्क्षामाप्प्नोतिदीक्क्षयाप्प्नोतिदक्क्षिणाम्।। दक्क्षिणा
श्श्रद्धामाप्प्नोतिश्श्रद्धयासत्त्यमाप्प्यते।।३०।। एतावद्द्रूपम्।। एतावद्द्रूपँय्यज्ञस्ययद्देवैर्ब्ब्रह्म्म
णाकृतम्।। तदेतत्त्सर्व्वमाप्प्नोतियज्ञेसौत्त्रामणीसुते।।३१।। (२०-२) सुरावन्तम्बर्हिषदम्।।
सुरावन्तम्बर्हिषदꣳसुवीरँय्यज्ञꣳहिन्न्वन्तिमहिषानमोभिः।। दधानाःसोमन्दिविदेवतासुमदेमेन्द्रँय्य
जमानाःस्वर्क्काः।।३२।। यस्ते।। यस्तेरसःसम्भृतऽओषधीषुसोमस्यशुष्म्मःसुरयासुतस्य।।
तेनजिन्न्वयजमानम्मदेनसरस्वतीमश्श्विनाविन्द्रमग्ग्निम्।।३३।। यमश्श्विना।। यमश्श्विनानमुचे

रासुरादधिसरस्वात्त्यसुनोदिन्द्रियाय।। इमन्तꣳशुक्क्रम्मधुमन्तमिन्दुꣳसोमꣳराजानमिहभक्षयामि
।।३४।। यदत्त्र। रिप्प्तꣳरसिनः सुतस्ययदिन्द्रोऽअपिबच्छचीभिः।। अहन्तदस्यमनसाशिवेनसोमꣳ
राजानमिहभक्षयामि।।३५।। पितृब्भ्यः स्वधायिब्भ्यः। स्वधानमः पितामहेब्भ्यः स्वधायि
ब्भ्यः स्वधानमः प्प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधानमः।। अक्क्षन्न्पितरोमीमदन्तपितरोतीतृप
न्तपितरः पितरः शुन्धद्ध्वम्।।३६।। पुनन्तुमा। पितरः सोम्म्यासः पुनन्तुमापितामहाः पुनन्तु
प्प्रपितामहाः।। पवित्त्रेणशतायुषा।। पुनन्तुमापितामहाः पुनन्तुप्प्रपितामहाः।। पवित्त्रेणशतायु
षाव्विश्श्वमायुर्व्व्यश्नवै।।३७।। अग्ग्नऽआयूꣳषि। पवसऽआसुवोर्ज्जमिषञ्चनः।। आरेबाधस्व
दुच्छुनाम्।।३८।। पुनन्तुमा। देवजनाः पुनन्तुमनसाधियः।। पुनन्तुव्विश्श्वाभूतानिजातवेदः
पुनीहिमा।।३९।। पवित्त्रेणपुनीहि। माशुक्क्रेणदेवदीद्द्यत्। अग्ग्नेक्क्रत्त्वाक्क्रतूँ१।।ऽरनु।।४०।।
यत्ते। पवित्त्रमर्च्चिष्ष्यग्ग्नेव्विततमन्तरा।। ब्रह्म्मतेनपुनातुमा।।४१।। पवमानःसः।। पवमानः
सोऽअद्द्यनः पवित्त्रेणव्विचर्षणिः।। यः पोतासपुनातुमा।।४२।। उभाब्भ्यान्देव। सवितः पवि

त्त्रेणसवेनच।। माम्पुनीहिव्विश्श्वतः।।४३।। व्वैश्श्वदेवीपुनती। देव्व्यागाद्यस्यामिमाबह्व्वस्त्तन्न्वोव्वीतपृष्ठाः।। तयामदन्तःसधमादेषुव्वयस्यामपतयोरयीणाम्।।४४।। येसमानाः। समनसःपितरोयमराज्ज्ये।। तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुकल्प्पताम्।।४५।। येसमानाः। समनसोजीवाजीवेषुमामकाः।। तेषाश्रीर्म्मयिकल्प्पतामस्मिँल्लोकेशतःसमाः।।४६।। द्वेसृती।। द्वेसृतीऽअशृणवम्पितॄणामहन्देवानामुतमर्त्यानाम्।। ताब्भ्यामिदंव्विश्श्वमेजत्त्समेतियदन्तरापितरम्मातरञ्च।।४७।। इदःहविः।। इदःहविःप्प्रजननम्मेऽअस्तुदशवीरःसर्व्वगणस्वस्त्तये।। आत्त्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि।। अग्निःप्प्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्त।।४८।। (१७-३) उदीरताम्।। उदीरतामवरऽउत्त्परासऽउन्न्मद्ध्यमाःपितरः सोम्म्यासः।। असुँय्यऽईयुरव्वृकाऽऋतज्ञास्त्तेनोवन्तुपितरोहवेषु।।४९।। अङ्गिरसोनः। पितरोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्म्यासः।। तेषांव्वयःसुमतौयज्ञियानामपिभद्द्रेसौमनसेस्याम।।५०।। येनः।। येनःपूर्व्वेपितरःसोम्म्यासोनूहिरेसोमपीथव्वसिष्ठाः।। तेभिर्य्यमःसःरराणो

हवीꣳष्युशन्नुशद्भिः प्प्रतिकाममत्तु।।५१।। त्वꣳसोम।। त्वꣳसोमप्प्रचिकितोमनीषात्त्वꣳरजिष्ठ

मनुनेषिपन्थाम्।। तवप्प्रणीतीपितरोनऽइन्दोदेवेषुरत्न्कमभजन्तधीराः।।५२।। त्वयाहि।।

त्वयाहिनः पितरः सोमपूर्व्वेकर्म्माणिचक्क्रुःपवमानधीराः।। व्वन्न्वन्नवातःपरिधींꣳ१।। रपोर्ण्णु

व्वीरेभिरश्श्वैर्म्मघवाभवानः।।५३।। त्वꣳसोम। पितृभिः संविदानोनुद्द्यावापृथिवीऽआततन्थ।।

तस्म्मैतऽइन्दोहविषाव्विधेमव्वयꣳस्यामपतयोरयीणाम्।।५४।। बर्हिषदःपितरः।। बर्हिषदः

पितरऽऊत्त्यर्व्वागिमावोहव्व्याचकृमाजुषद्ध्वम्।। तऽआगतावसाशन्तमेनाथानःशँय्योररपोदधात

।।५५।। आहम्।। आहम्पितॄन्त्सुविदत्राँ२।।ऽअवित्त्सिनपातञ्चव्विक्क्रमणञ्चव्विष्णणोः।।

बर्हिषदोयेस्वधयासुतस्यभजन्तपित्त्वस्तऽइहागमिष्ठाः।।५६।। उपहूताःपितरः। सोम्म्या

सोबर्हिष्ष्येषुनिधिषुप्प्रियेषु।। तऽआगमन्तुतऽइहश्श्रुवन्त्वधिब्ब्रुवन्तुतेवन्त्वस्म्मान्।।५७।।

आयन्तु। नःपितरः सोम्म्यासोग्ग्निष्ष्वात्ताःपथिभिर्द्देवयानैः।। अस्म्मिन्न्यज्ञेस्वधयामदन्तोधि

ब्ब्रुवन्तुतेवन्त्वस्म्मान्।।५८।। अग्ग्निष्ष्वात्ताःपितरः।। अग्ग्निष्ष्वात्ताःपितरऽएहगच्छतसदः

सदꣳसदतसुप्प्रणीतयः।। अत्ताहवीꣳषिप्प्रयतानिबर्हिष्ष्यथारयिꣳसर्व्ववीरन्दधातन।।५९।।
येऽअग्निष्ष्वात्ताः।। येऽअग्निष्ष्वात्तायेऽअनग्निष्ष्वात्तामद्ध्येदिवः स्वधयामादयन्ते।। तेब्भ्यः
स्वराडसुनीतिमेताँय्यथावशन्तन्न्वङ्कल्प्पयाति।।६०।। अग्निष्ष्वात्तानृतुमतः।। अग्निष्ष्वात्ता
नृतुमतोहवामहेनाराशꣳसेसोमपीथँय्यऽआशुः।। तेनोव्विप्प्रासꣳसुहवाभावन्तुव्वयꣳस्यामपतयो
रयीणाम्।।६१।। (१३–४) आच्च्याजानु। दक्षिणतोनिषद्द्येमँय्यज्ञमभिगृणीतव्विश्श्वे।।
माहिꣳसिष्टपितरꣳकेनचिन्नोयद्द्वऽआगः पुरुषताकराम।।६२।। आसीनासोऽअरुणीनाम्।।
आसीनासोऽअरुणीनामुपस्त्थेरयिन्धत्तदाशुषेमर्त्त्याय।। पुत्त्रेब्भ्यःपितरस्तस्यव्वस्वःप्प्रयच्छतत
ऽइहोर्ज्जन्दधात।।६३।। यमग्ग्ने। कव्व्यवाहनत्त्वञ्चिन्न्मन्न्यसेरयिम्।। तन्नोगीर्ब्भिःश्रवाय्यन्देव
त्त्रापनयायुजम्।।६४।। योऽअग्निः। कव्व्यवाहनꣳपितृन्न्यक्षदृतावृधः।। प्रेदुहव्व्यानिव्वो
चतिदेवेब्भ्यश्च्चपितृब्भ्यऽआ।।६५।। त्वमग्ग्ने।। त्वमग्ग्नऽईडितःकव्व्यवाहनावाड्ढव्व्यानिसुर
भीणिकृत्त्वी।। प्रादाꣳपितृब्भ्यःस्वधयातेऽअक्षन्नद्धित्त्वन्देवप्प्रयताहवीꣳषि।।६६।। येच।।

येचेहपितरोयेचनेहयाँश्च्चंव्विद्द्मयाँ२।।ऽउंचनप्प्रंविद्द्म।। त्वंव्वेत्थयतितेजातवेदःस्वधाभिर्य्य
ज्ञःसुकृतञ्जुषस्व।।६७।। इदम्पितृब्भ्यः।। इदम्पितृब्भ्योनमोऽअस्त्वद्द्ययेपूर्व्वांसोयऽउपरास
ऽईयुः।। येपार्त्थिवेरजस्यानिषत्तायेवानूनःसुवृजनासुव्विक्षु।।६८।। आधायथा। नःपितरः
परासःप्प्रत्नासोऽअग्नऽऋतमाशुषाणाः।। शुचीदयन्दीधितिमुक्क्थशासःक्षामाभिन्दन्तोऽ
अरुणीरपव्व्रन्।।६९।। उशन्तस्त्वा।। उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि।। उशन्नुशतऽ
आवहपितॄन्हविषेऽत्तवे।।७०।। अपाम्फेनेन।। अपाम्फेनेननमुचेःशिरऽइन्द्रोदवर्त्तयः।।
व्विश्वायदजयस्पृधः।।७१।। (१०-५) सोमोराजा।। सोमोराजामृतःसुतऽऋजीषेणा
जहान्मृत्युम्।। ऋतेनसत्त्यमिन्द्रियंव्विपानःशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।।७२।।
अद्भ्यःक्षीरम्।। अद्भ्यःक्षीरंव्व्यपिबत्क्रुङ्ङाङ्गिरसोधिया।। ऋतेनसत्त्यमिन्द्रियंव्विपानः
शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।।७३।। सोममद्भ्यः।। सोममद्भ्योव्व्यपिबच्छन्द
साहःसःशुचिषत्।। ऋतेनसत्त्यमिन्द्रियंव्विपानःशुक्क्रमन्धसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु

।।७४।। शतम्।।११००।। अन्नात्परिस्रुतः।। अन्नात्परिस्रुतोरसम्ब्रह्म्मणाव्व्यपिबत्क्षत्रम्पयꣳ सोमम्प्रजापतिः।। ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्स्येन्द्रियमिदम्पयोमृतम्मधु ।।७५।। रेतोमूत्त्रम्।। रेतोमूत्त्रंव्विजहातियोनिम्प्रविशदिन्द्रियम्।। गब्भोजरायुणावृतऽउल्ल्बञ्ज हातिजन्म्मना।। ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसइन्द्रस्स्येन्द्रियमिदम्पयोमृतम्मधु।।७६।। दृष्ट्वारूपे। व्व्याकरोत्सत्त्यानृतेप्प्रजापतिः।। अश्श्रद्धामनृतेदधाच्छ्रद्धाꣳसत्त्येप्प्रजापतिः।। ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्स्येन्द्रियमिदम्पयोमृतम्मधु।।७७।। व्वेदेनरूपे।। व्व्यपिबत्सुतासुतौप्प्रजापतिः।। ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्स्येन्द्रियमिदम्पयो मृतम्मधु।।७८।। दृष्ट्वापरितस्रुतः।। दृष्ट्वापरितस्रुतोरसꣳशुक्क्रेणशुक्क्रंव्व्यपिबत्पयꣳ सोमम्प्रजापतिः।। ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्स्येन्द्रियमिदम्पयोमृतम्मधु ।।७९।। (८–६) सीसेनतन्त्रम्।। सीसेनतन्त्रम्मनसामनीषिणऽऊर्ण्णासूत्त्रेणकवयोव्वयन्ति।। अश्श्विनायज्ञꣳसवितासरस्वतीन्द्रस्स्यरूपंव्वरुणोभिषज्ज्यन्।।८०।। तदस्य। रूपममृतꣳशची

भिस्त्तिस्म्रोदंधुर्द्देवतांᳩसद्दरराणाः।। लोमांनिशष्प्पैर्ब्बहुधानतोक्क्मंभिस्त्त्वगंस्यमाᳪसमंभवन्नलाजाः
।।८१।। तदश्शिवनां। भिषजांरुद्ववंर्त्तनीसरंस्वतीव्वयतिपेशोऽअन्तंरम्।। अस्त्थिमज्जानम्मासंरैः
कारोतरेणदधंतोगवांन्त्वचि।।८२।। सरंस्वतीमनंसा। पेशलंव्वसुनासंत्त्याब्भ्यांव्वयतिदर्शतंव्वपुः
।। रसंम्परिस्रुतानरोहिंतन्नग्नहुर्द्धीरस्त्तसंरन्नवेमं।।८३।। पयंसाशुक्क्रम्।। पयंसाशुक्क्रममृतंञ्ज
नित्त्रᳩसुरंयामूत्त्राँज्जनयन्तरेतंः।। अपामंतिन्दुर्म्मतिम्बाधंमानाऽऊवंद्ध्यंव्वातंᳩसर्व्वन्तदारात्
।।८४।। इन्द्रंःसुत्त्रामां।। इन्द्रंःसुत्त्रामाहृदंयेनसत्त्यम्पुंरोडाशेंनसविताजंजान।। यकृंत्त्क्लोमानं
व्वरुंणोभिषज्ज्यन्मतंस्न्नेव्वायव्व्यैर्न्नमिंनातिपित्तम्।।८५।। आन्त्राणिंस्त्थालीः।। आन्त्राणिं
स्त्थालीर्म्मधुपिन्न्वंमानागुदाᳩपात्त्राणिसुदुघानधेनुः।। श्येनस्यपत्त्रन्नप्प्लीहाशचीभिंरासन्दीना
भिंरुदरन्नमाता।।८६।। कुम्भोव्वंनिष्ठुः।। कुम्भोव्वंनिष्ठुर्ज्जनिताशचीभिंर्य्यस्म्मिन्नग्ग्रेयोन्न्याङ्ग
ब्भोंऽअन्तः।। प्लाशिव्व्यंक्क्तᳩशतधांरऽउत्त्सोंदुहेनकुम्भीस्वधाम्पितृब्भ्यंः।।८७।। मुखᳩसत्।।
मुखᳩसदंस्यशिरऽइत्त्सतेंनजिह्व्वापवित्त्रंमश्शिवनासन्त्सरंस्वती।। चप्प्न्नपायुर्ब्भिषगंस्यव्वा

लोव्वस्त्तिर्न्नशेपोहरसातरस्वी।।८८।। अश्विवब्भ्याञ्चक्क्षुः। अश्विवब्भ्याञ्चक्क्षुरमृतङ्ग्रहा

बभ्याञ्छागेनतेजोहविषाशृतेन।। पक्क्ष्माणिगोधूमैःकुवलैरुतानिपेशोनशुक्क्रमसितंव्वसाते।।८९।।

अविर्न्न। मेषोनसिव्वीर्य्यायप्प्राणस्यपन्थाऽअमृतोग्ग्रहाब्भ्याम्।। सरस्वत्त्युपवाकैव्र्व्यानन्न

स्यानिबर्हिर्ब्बदरैर्ज्जजान।।९०।। इन्द्रस्यरूपम्।। इन्द्रस्यरूपमृषभोबलायकर्ण्णाब्भ्याᳪश्रोत्त्रम

मृतङ्ग्रहाब्भ्याम्।। यवानबर्हिर्ब्भ्रुविकेसराणिकर्क्कन्धुजज्ञेमधुसारघम्मुखात्।।९१।। आत्क्मन्नु

पस्त्थे।। आत्क्मन्नुपस्त्थेनव्वृकस्यलोममुखेश्मश्श्रूणिनव्व्याग्घ्रलोम।। केशानशीर्षन्न्यशसेश्श्रि

यैशिखासिᳫहस्यलोमत्त्विषिरिन्द्रियाणि।।९२।। अङ्गान्न्यात्क्मन्।। अङ्गान्न्यात्क्मन्न्भिषजातद

श्विवनात्क्मानमङ्गैःसमधात्त्सरस्वती।। इन्द्रस्यरूपᳫशतमानमायुश्च्चन्द्रेणज्ज्योतिरमृतन्दधाना

।।९३।। सरस्वतीयोन्न्याम्।। सरस्वतीयोन्न्याङ्गर्ब्भमन्तरश्श्विवब्भ्याम्पत्क्नीसुकृतम्बिभर्त्ति।।

अपाᳪरसेनव्वरुणोनसाम्म्नेन्द्रᳪश्रियैजनयन्नप्प्सुराजा।।९४।। तेजःपशूनाम्।। तेजःपशूनाᳪ

हविरिन्द्रियावत्त्परिस्रुतापयसासारघम्मधु।। अश्विवब्भ्यान्दुग्धम्भिषजासरस्वत्त्यासुतासुताब्भ्या

ममृतꣳसोमऽइन्दुं॑॥९५॥ (१६-७) इतिश्रीवाजसनेयसंहितायामेकोनविंशतितमोऽध्यायः ॥१९॥ श्रीवेदपुरुषायनमः॥ अनुवाकसूत्रम्॥ क्षत्रस्ययोनिस्त्रयोदश, यद्देवादशा, भ्यादधाम्यष्टौ, योभूतानाञ्चतस्रः, समिद्धऽइन्द्रऽएकादश, ऽआयात्वष्टौ, समिद्धोऽग्निर्द्वादशा, श्श्विनाहविस्त्रयोदशा, श्श्विनातेजसैकादश, नव नवतिः॥ (अ. २० मं. ९० अ. ९) हरिः ॐ॥ क्षत्रस्ययोनिं॑॥ क्षत्रस्ययोनिंरसिक्षत्रस्यनाभिंरसि॥ मात्त्वांहिꣳसीन्मामांहिꣳसीः॥१॥ निषंसाद। धृतव्व्रंतोव्वरुंणꣳपस्त्त्यास्वा॥ साम्म्रांज्ज्यायसुक्क्रतुं॥ मृत्त्योः॑पांहिव्विद्द्योत्त्पांहि ॥२॥ देवस्यंत्त्वा। सवितुः॑प्प्रंसवेश्श्विनोंर्ब्बाहुब्भ्यांम्पूष्ण्णोहस्त्तांब्भ्याम्॥ अश्श्विनोर्ब्भैषंज्ज्ये नतेजंसेब्ब्रह्म्मवर्च्चसायाभिषिंञ्चामिसरंस्वत्त्यैभैषंज्ज्येनव्वीर्य्यायान्नाद्द्यांयाभिषिंञ्चामीन्द्रंस्येन्द्रिये णबलांयाश्श्रियैयशंसेभिषिञ्चामि॥३॥ कोंसि। कतमोसिकस्म्मैत्त्वाकायंत्त्वा॥ सुश्श्लोंक सुमंङ्गलसत्त्यंराजन्॥४॥ शिरोंमे॥ शिरोंमेश्श्रीर्य्यशोमुखन्त्विषिꣳकेशांश्च्चश्म्मश्श्रूंणि॥ राजांमेप्प्राणोऽअमृतꣳसम्म्राट्ट्चक्षुंर्व्विराट्ट्श्रोत्त्रंम्॥५॥ जिह्व्वामें। भद्द्रंव्वाङ्भहोमनों

मन्न्युःस्वराट्ट्भामः।। मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्त्रम्मेसहः।।६।। बाहूमे।। बाहूमेबल मिन्द्रियःहस्तौमेकर्म्मव्वीर्य्यम्।। आत्क्माक्षत्रमुरोमम।।७।। पृष्ट्टीर्म्मे। राष्ट्ट्रमुदरमःसौग्ग्रीवा श्श्चश्श्रोणी। उरूऽअरत्न्कीजानुनीव्विशोमेङ्गानिसर्व्वतः।।८।। नाभिर्म्मे। चित्तंव्विज्ञानम्पा युर्म्मेपचितिर्ब्भसत्।। आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्पसः।। जङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्म्मि व्विशिराजाप्प्रतिष्ठितः।।९।। प्रतिक्षत्रे। प्प्रतितिष्ठामिराष्ट्ट्रेप्प्रत्त्यश्श्वेषुप्प्रतितिष्ठामिगोषु प्रत्त्यङ्गेषुप्प्रतितिष्ठाम्म्यात्क्मन्प्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्ट्टेप्प्रतिद्द्यावापृथिव्व्योःप्प्रतितिष्ठा मियज्ञे।।१०।। त्र्यादेवाः।। त्र्यादेवाऽएकादशत्त्रयस्त्रिःशाःसुराधसः।। बृहस्प्पतिपुरोहितादेवस्य सवितुःसवे।। देवादेवैरवन्तुमा।।११।। प्रथमाद्द्वितीयैः।। प्रथमाद्द्वितीयैर्द्द्वितीयास्तृतीयै स्तृतीयाःसत्त्येनसत्त्यँय्यज्ञेनयज्ञोयजुर्ब्भिर्य्यजूꣳषिसामभिःसामान्न्यृग्भिरृर्चःपुरोनुवाक्क्याभिःपुर ोनुवाक्क्यायाज्ज्याभिर्य्याज्ज्याव्वषट्ट्कारैर्व्वषट्ट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धय न्तुभूःस्वाहा।।१२।। लोमानिप्प्रयतिः।। लोमानिप्प्रयतिर्म्ममत्त्वङ्ङ्गऽआनतिरागतिः।। माꣳसम्म

ऽउपनतिर्व्वस्वस्तिथमज्जामऽआनतिं।।१३।। (१३-१) यद्देवा।। यद्देवादेवहेडनन्देवासश्च्च
कृमाव्वयम्अग्निर्म्मातस्म्मादेनसोव्विश्श्वान्मुञ्चत्त्वहंस।।१४।। यदिदिवा।। यदिदिवाय
दिनक्क्तमेनांसिचकृमाव्वयम्।। व्वायुर्म्मातस्म्मादेनसोव्विश्श्वान्मुञ्चत्त्वहंस।।१५।। यदि
जाग्ग्रत्।। यदिजाग्ग्रद्द्यदिस्वप्प्नऽएनांसिचकृमावयम्।। सूर्य्योमातस्म्मादेनसोव्विश्श्वान्मुञ्च
त्त्वहंस।।१६।। यद्ग्ग्रामे।। यद्ग्ग्रामेयदरण्ण्येयत्त्सभायाँय्यदिन्द्रिये।। यच्छूद्द्रेयदर्य्येयदेनश्च्च
कृमाव्वयँय्यदेकस्याधिधर्म्मणितस्यावयजनमसि।।१७।। यदापः।। यदापोऽअग्घ्न्याऽइतिव्व
रुणेतिशपामहेततोव्वरुणनोमुञ्च।। अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः।। अवदेवैर्द्देवकृत
मेनोयक्क्ष्यवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्ण्णोदेवरिषस्प्पाहि।।१८।। समुद्द्रेते।। समुद्द्रेतेहृदयमप्प्स्वन्तः
सन्त्वाव्विशन्त्वोषधीरुतापः।। सुमित्त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्त्तस्म्मैसन्तु
योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः।।१९।। द्रुपदादिवमुमुचानः। स्विन्नःस्न्नातोमलादिव।। पूतम्प
वित्त्रेणेवाज्ज्यमापःशुन्धन्तुमैनस।।२०।। उदुद्द्वयम्।। उदुद्द्वयन्तमसस्प्परिस्वःपश्श्यन्तऽउत्तरम्।।

देवन्देवत्त्रासूर्य्यमगन्न्मज्ज्योतिरुत्तमम्।।२१।। अपोऽअद्द्य।। अपोऽअद्द्यान्न्वचारिषꣳरसेनसम सृक्क्ष्महि।। पयस्वानग्ग्नऽआगमन्तम्मासꣳसृजव्वर्च्चसाप्प्रजयाचधनेनच।।२२।। एधोसि।। एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि।। समाववर्त्तिपृथिवीसमुषाꣳसमुसूर्य्यः।। समुव्विश्श्वमिदञ्जगत्।। व्वैश्श्वानरज्ज्योतिर्ब्भूयासंव्विभून्कामान्व्व्यश्नवैभूःस्वाहा।।२३।। (१०-२) अब्भ्यादधामि। समिधमग्ग्नेव्व्रतपतेत्त्वयि।। व्व्रतञ्चश्श्रद्धाञ्चोपैमीन्धेत्त्वादीक्क्षितोऽ अहम् ।।२४।। यत्रब्ब्रह्म्म। चक्क्षत्रञ्चसम्म्यञ्चौचरतꣳसह।। तँल्लोकम्पुण्ण्यम्प्रज्ञेषँय्यत्रदेवाः सहाग्ग्निना।।२५।। यत्रेन्द्रः।। यत्रेन्द्रश्च्चव्वायुश्चसम्म्यञ्चौचरतꣳसह।। तँल्लोकम्पुण्ण्यम्प्रज्ञेषँ य्यत्रसेदिर्न्नव्विद्द्यते।।२६।। अꣳशुनाते।। अꣳशुनातेऽअꣳशुःपृच्च्यताम्परुषापरुः।। गन्धस्ते सोममवतुमदायरसोऽअच्च्युतः।।२७।। सिञ्चन्तिपरि। षिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच।। सुरायै बब्भ्रवैमदेकिन्त्वोव्वदतिकिन्त्वः।।२८।। धानावन्तङ्करम्भिणम्।। धानावन्तङ्करम्भिणमपूपवन्त मुक्क्थिनम्।। इन्द्रप्प्रातर्ज्जुषस्वनः।।२९।। बृहदिन्द्राय। गायतमरुतोव्वृत्रहन्तमम्।।

येनज्ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि।।३०।। अद्ध्वर्य्योऽअद्रिभिः। सुतꣳसोमम्पवित्त्रऽ आनय।। पुनाहीन्द्रायपातवे।।३१।। (८-३)योभूतानाम्।। योभूतानामधिपतिर्य्यस्मिँल्लोकाऽ अधिश्श्रिताः।। यऽईशेमहतोमहाँस्तेनगृह्णामित्त्वामहम्मयिगृह्णामित्त्वामहम्।।३२।। उपयाम गृहीतोसि।। उपयामगृहीतोस्यश्श्विब्भ्यान्त्वासरस्वत्त्यैत्त्वेन्द्रायत्त्वासुत्त्राम्म्णऽएषतेयोनिरश्श्वि ब्भ्यान्त्वासरस्वत्त्यैत्त्वेन्द्रायत्त्वासुत्त्राम्म्णे।।३३।। प्राणपामे।। प्राणपामेऽअपानपाश्च्चक्क्षुष्पाः श्श्रोत्त्रपाश्च्चमे।। व्वाचोमेव्विश्श्वभेषजोमनसोसिव्विलायकः।।३४।। अश्श्विनकृतस्यते।। अश्श्विनकृतस्यतेसरस्वतिकृतस्येन्द्रेणसुत्त्राम्म्णाकृतस्य।। उपहूतऽउपहूतस्यभक्क्षयामि।।३५।। (४-४) समिद्धऽइन्द्रः।। समिद्धऽइन्द्रऽउषसामनीकेपुरोरुचापूर्व्वकृद्द्वावृधानः।। त्रिभिर्द्देवैस्त्रिꣳ शताव्वज्ज्रबाहुर्ज्जघानव्वृत्त्रंव्विदुरोव्ववार।।३६।। नराशꣳसः प्प्रति।। नराशꣳसः प्प्रतिशूरोमिमान स्त्तनूनपात्प्रतियज्ञस्यधाम।। गोभिर्व्वपावान्मधुनासमञ्जन्हिरण्ण्यैश्च्चन्द्रीयजतिप्प्रचेताः ।।३७।। ईडितोदेवैः।। ईडितोदेवैर्हरिवाँ२।।ऽअभिष्ट्टिराजुह्व्वानोहविषाशर्द्धमानः।। पुरन्दरो

गोत्रभिद्द्वज्रबाहुरायातुयज्ञमुपनोजुषाणः।।३८।। जुषाणोबर्हिः।। जुषाणोबर्हिर्हरिवान्नऽइन्द्रः
प्प्राचीनं सीदत्प्रदिशापृथिव्व्याः।। उरुप्प्रथाः प्प्रथमानꣳस्योनमादित्यैरक्क्तंव्वसुभिः सजोषाः
।।३९।। इन्द्रन्दुरः। कवष्ष्योधावमानाव्वृषाणँय्यन्तुजनयः सुपत्न्कीः।। द्वारोदेवीरभितोव्विश्श्रं
यन्ताꣳसुवीराव्वीरम्प्रथमानामहोभिः।।४०।। उषासानक्क्ता। बृहतीबृहन्तम्पयस्वतीसुदुघे
शूरमिन्द्रम्।। तन्तुन्ततम्पेशसासंवयन्तीदेवानान्देवँय्यजतः सुरुक्क्मे।।४१।। दैव्व्यामिमाना।।
दैव्व्यामिमानामनुषः पुरुत्राहोताराविन्द्रप्प्रथमासुवाचा।। मूर्द्धन्न्यज्ञस्यमधुनादधानाप्प्राचीन
ञ्ज्योतिर्हविषाव्वृधातः।।४२।। तिस्रोदेवीः।। तिस्रोदेवीर्हविषाव्वर्द्धमानाऽइन्द्रञ्जुषाणाजनयोन
पत्न्कीः।। अच्छिन्नन्तन्तुम्पयसासरस्वतीडादेवीभारतीव्विश्श्वतूर्त्तिः।।४३।। त्वष्टादधत्।।
त्वष्टादधच्छुष्ष्ममिन्द्रायव्वृष्ष्णेपाकोचिष्ट्टुर्य्यशसेपुरूणि।। वृषायजन्व्वृषणम्भूरिरेतामूर्द्धन्न्य
ज्ञस्यसमनक्क्तुदेवान्।।४४।। व्वनस्प्पतिरवसृष्टः।। व्वनस्प्पतिरवसृष्टोनपाशैस्त्मन्न्यासमञ्ज
ञ्छमितानदेवः।। इन्द्रस्यहव्व्यैर्ज्जठरम्पृणानःस्वदातियज्ञम्मधुनाघृतेन।।४५।। स्तोकानामिन्दुम्।।

स्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोव्वृषायमाणोव्वृषभस्तुराषाट्।। घृतप्प्रुषामनसामोदमानाःस्वाहा

देवाऽअमृतामादयन्ताम्।।४६।। (११–५) आयातु।। आयात्त्विन्द्रोवसऽउपनऽइहस्तुतः

सधमादस्तुशूरः।। व्वावृधानस्तविषीर्य्यस्यपूर्व्वीद्द्यौर्न्नक्षत्रमभिभूतिपुष्यात्।।४७।। आनः।।

आनऽइन्द्रोदूरादानऽआसादभिष्टिकृदवसेयासदुग्रः।। ओजिष्ठेभिर्न्नृपतिर्व्वज्रबाहुःसङ्गेसमत्त्सुतु

र्व्वणिःपृतन्न्यून्।।४८।। आनः।। आनऽइन्द्रोहरिभिर्य्यात्त्वच्छार्व्वाचीनोवसेराधसेच।। तिष्ठाति

व्वज्रीमघवाव्विरप्पशीमँय्यज्ञमनुनोव्वाजसातौ।।४९।। त्रातारमिन्द्रम्।। त्रतारमिन्द्रमवितारमिन्द्रꣳ

हवेहवेसुहवꣳशूरमिन्द्रम्।। ह्व्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः।।५०।।

इन्द्रःसुत्रामा।। इन्द्रःसुत्रामास्ववाँ२।। ऽअवोभिःसुमृडीकोभवतुव्विश्श्ववेदाः।। बाधतान्द्वेषोऽ

अभयङ्कृणोतुसुवीर्य्यस्यपतयःस्याम।।५१।। तस्यव्वयम्।। तस्यव्वयꣳसुमतौयज्ञियस्यापिभद्द्रे

सौमनसेस्याम।। ससुत्रामास्ववाँऽइन्द्रोऽअस्म्मेऽआराच्चिद्द्वेषःसनुतर्य्युयोतु।।५२।। आमन्द्रैः।।

आमन्द्रैरिन्द्रहरिभिर्य्याहिमयूररोमभिः।। मात्त्वाकेचिन्नियमन्न्विन्नपाशिनोतिधन्न्वेवताँ२।।ऽइहि

।।५३।। एवेत्।। एवेदिन्द्रंव्वृषणंव्वज्ज्रबाहुंव्वसिंष्ठासोऽअब्भ्यर्च्चन्त्यर्क्कैः।। सनंस्तुतोव्वीरवंद्धातु गोमंद्द्यूयम्पांतस्वस्तिभिःसदांनः।।५४।। (८-६) समिंद्धोऽअग्निः।। समिंद्धोऽअग्निरंश्श्विनात प्तोघर्म्मोव्विराट्सुतः।। दुहेधेनुःसरंस्वतीसोमंशुक्क्रमिहेन्द्रियम्।।५५।। तनूपाभिषजां। सुतेश्विनोभासरंस्वती।। मद्ध्वारजांसीन्द्रियमिन्द्रांयपथिभिंर्व्वहान्।।५६।। इन्द्रायेन्दुम्।। इन्द्रायेन्दुसरंस्वतीनराशंसेनननग्नहुंम्।। अधांतामश्श्विनामधुंभेषजम्भिषजांसुते।।५७।। आजु ह्व्वांनासरंस्वती।। आजुह्व्वांनासरंस्वतीन्द्रांयेन्द्रियाणिंव्वीर्य्यम्।। इडांभिरश्श्विनाविषसमूर्ज्ज सरयिन्दंधु।।५८।। अश्श्विनानमुंचेः। सुतसोमंशुक्क्रम्पंरिस्रुतां।। सरंस्वतीतमाभंरद्द्बर्हिषेन्द्रां यपातंवे।।५९।। कवष्ष्योन। व्व्यचंस्वतीरश्श्विब्भ्यान्नदुरोदिशंः।। इन्द्रोनरोदंसीऽउभेदुहेका मान्त्सरंस्वती।।६०।। उषासानक्क्तंम्।। उषासानक्क्तमश्श्विनादिवेन्द्रंसायमिंन्द्रियैः।। सञ्जा नानेसुपेशंसासमंञ्जातेसरंस्वत्त्या।।६१।। पातन्नंः।। पातन्नोंऽअश्श्विनादिवांपाहिनक्क्तं सरस्वति।। दैव्व्यांहोताराभिषजापातमिन्द्रंसचांसुते।।६२।। तिस्रस्त्रेधा। सरंस्वत्त्यश्श्विना भारतीडां

।। तीव्रम्पंरिस्रुतासोममिन्द्रांयसुषुवुर्म्मदंम्।।६३।। अश्विनांभेषजम्।। अश्विनांभेषजम्मधुंभेषजन्नःसरंस्वती।। इन्द्रेत्त्वष्टायशःश्रियंरूपꣳरूपमधुःसुते।।६४।। ऋतुथेन्द्रः।। ऋतुथेन्द्रो व्वनस्प्पतिःशशमानꣳपरिस्रुतां।। कीलालमश्विभ्याम्मधुंदुहेधेनुःसरंस्वती।।६५।। गोभिर्न्न। सोमंमश्विनामासरेणपरिस्रुतां।। समंधातꣳसरंस्वत्त्यास्वाहेन्द्रेसुतम्मधुं।।६६।। (१२-७)

अश्विनांहविः।। अश्विनांहविरिन्द्रियन्नमुंचेर्द्धियासरंस्वती।। आशुक्क्रमांसुराद्वसुंमघमिन्द्रांयजभ्भ्रिरे।।६७।। यमश्विनां।। यमश्विनासरंस्वतीहविषेन्द्रमवंर्द्धयन्।। सबिंभेदव्वलम्मघन्नमुंचावासुरेसचां।।६८।। तमिन्द्रंम्।। तमिन्द्रंम्पशवःसचाश्विनोभासरंस्वती।। दधांनाऽअभ्यनूषत हविषांयज्ञऽइंन्द्रियैः।।६९।। यऽइन्द्रें।। यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुंणोभगंः।। ससुत्त्रामांहविष्प्पतिर्य्यजंमानायसश्च्चत।।७०।। सविताव्वरुंणः।। सविताव्वरुंणोदधद्द्यजंमानायदाशुषें।। आदंत्तनमुंचेर्व्वसुंसुत्त्रामाबलंमिन्द्रियम्।।७१।। व्वरुंणःक्क्षत्रम्।। व्वरुंणःक्क्षत्रमिंन्द्रियम्भगेंनसविताश्रियंम्।। सुत्त्रामायशंसाबलन्दधांनायज्ञमांशत।।७२।। अश्विनागोभिंः।।

अश्विनागोभिरिन्द्रियमश्श्वेभिर्व्वीर्य्यम्बलम्।। हविषेन्द्रꣳसरस्वतीयजमानमवर्द्धयन्।।७३।।
तानासत्त्या। सुपेशसाहिरण्ण्यवर्त्तनीनरा।। सरस्वतीहविष्म्मतीन्द्रकर्म्मसुनोवत।।७४।। ताभिषजा।
सुकर्म्मणासासुदुघासरस्वती।। सर्व्वृत्रहाशतक्क्रतुरिन्द्रायदधुरिन्द्रियम्।।७५।। युवꣳसुरामम्।।
युवꣳसुराममश्विनानमुचावासुरेसचा।। व्विपिपानाःसरस्वतीन्द्रङ्कर्म्मस्वावत।।७६।। पुत्रमिव
पितरौ।। पुत्रमिवपितरावश्विनोभेन्द्रावथुःकाव्व्यैर्दꣳसनाभिः।। यत्सुरामंव्व्यपिबःशचीभिः
सरस्वतीत्त्वामघवन्नभिष्णक्।।७७।। यस्मिन्नश्श्वासः।। यस्मिन्नश्श्वासऽऋषभासऽउक्षणो
व्वशामेषाऽअवसृष्टासऽआहुताः।। कीलालपेसोमपृष्ठायव्वेधसेहृदामतिञ्जनयचारुमग्ग्नये
।।७८।। अहाव्व्यग्ग्ने। हविरास्येतेस्रुचीवघृतञ्चम्म्वीवसोमः।। व्वाजसनिꣳरयिमस्म्मेसुवीर
म्प्रशस्त्तन्धेहियशसम्बृहन्तम्।।७९।। (१३-८) शतम् १२००।। अश्विनातेजसा।।
अश्विनातेजसाचक्षुःप्प्राणेनसरस्वतीव्वीर्य्यम्।। व्वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम्।।८०।।
गोमदूषुणासत्त्या।। गोमदूषुणासत्त्याश्श्वावद्द्यातमश्विना।। व्वर्त्तीरुद्द्रानृपाय्य्यम्।।८१।। नयत्।।
नयत्त्परोनान्तरऽआदधर्षद्द्वृषण्ण्वसू।। दुःशꣳसोमत्त्योरिपुः।।८२।। तानः।।

तानऽआवोढमश्श्विनारयिम्पिशङ्गसन्दृशम्।। धिष्ण्याव्वरिवोविदम्।।८३।। पावकानः।।
पावकानस्सरस्वतीव्वाजेभिर्व्वाजिनीवती।। यज्ञंव्वष्टुधियावसु।।८४।। चोदयित्त्रीसूनृतानम्।।
चोदयित्त्रीसूनृतानाञ्चेतन्तीसुमतीनाम्।। यज्ञन्दधेसरस्वती।।८५।। महोऽअर्ण्णः।। महोऽअर्ण्ण
सरस्वतीप्प्रचेतयतिकेतुना।। धियोव्विश्श्वाव्विराजति।।८६।। इन्द्रायाहि। चित्रभानोसुताऽ
इमेत्त्वायवः।। अण्वीभिस्त्नापूतासः।।८७।। इन्द्रायाहि। धियेषितोव्विप्प्रजूतस्सुतावतः।।
उपब्ब्रह्म्माणिव्वाघतः।।८८।। इन्द्रायाहि।। इन्द्रायाहितूतुजानऽउपब्ब्रह्म्माणिहरिवः।।
सुतेदधिष्ष्वनश्च्चनः।।८९।। अश्श्विनापिबताम्।। अश्श्विनापिबताम्मधुसरस्वत्त्यासजोषसा।।
इन्द्रःसुत्त्रामाव्वृत्त्रहाजुषताᳫसोम्म्यम्मधु।।९०।। (११-९) इतिश्रीवाजसनेयसंहितायां विंशतित
मोऽध्यायः ।।२०।। पूर्वविंशतौ मंत्रसंख्या १२११।।

इति श्रीवाजसनेयसंहितायां पूर्वविंशतिः समाप्ता।।

# अथ श्रीवाजसनेयसंहितोत्तरविंशतिप्रारम्भः

।।श्रीगणेशायनमः।। अनुवाकसूत्रम्।। इमम्मे, समिद्धोऽअग्निरेकादशकौ, व्वसन्तेनऽऋतुना षड्,
होतायक्षत्त्समिधाग्निन्द्वादशा, श्शिवनौछागस्य सप्त, देवम्बर्हिश्च्चतुर्द्दश, षडेक षष्टिः (अ. २१
मं. ६१ अनु. ६)।। हरिः ॐ।। इमम्मे। व्वरुणश्श्रुधीहवमद्द्याचमृडय।। त्वामवस्युराचके।।१।।
तत्त्वा। यामिब्ब्रह्म्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः।। अहेडमानोव्वरुणेहबोद्ध्युरुशꣳ
समानऽआयुःप्रमोषीः।।२।। त्वन्नः।। त्वन्नोऽअग्ग्नेव्वरुणस्यव्विद्द्वान्देवस्यहेडोऽअवयासि
सीष्ठाः।। यजिष्ठोव्वह्निन्तमःशोशुचानोव्विश्श्वाद्द्वेषाꣳसिप्प्रमुमुग्ध्यस्म्मत्।।३।। सत्त्वम्।।
सत्त्वन्नोऽअग्ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्ट्टौ।। अवयक्क्ष्वनोव्वरुणꣳरराणोव्वीहि
मृडीकꣳसुहवोनऽएधि।।४।। महीमूषु। मातरꣳसुव्व्रतानामृतस्यपत्न्कीमवसेहुवेम।। तुविक्क्षत्राम
जरन्तीमुरूचीꣳसुशर्म्माणमदितिꣳसुप्प्रणीतिम्।।५।। सुत्त्रामाणम्पृथिवीम्।। सुत्त्रामाणम्पृथिवी
न्द्यामनेहसꣳसुशर्म्माणमदितिꣳसुप्प्रणीतिम्।। दैवीन्नावꣳस्वरित्त्रामनागसमस्स्रवन्तीमारुहेमास्व

स्त्तये ।।६।। सुनावमारुहेयम्।। सुनावमारुहेयमस्स्रवन्तीमनागसम्।। शतारित्त्रा७स्वस्त्तये।।७।।
आनः।। आनोमित्त्रावरुणाघृतैर्ग्गव्व्यूतिमुक्क्षतम्। मद्ध्वारजा७सिसुक्क्रतू।।८।। प्रबाहवा।
सिसृतञ्जीवसेनआनोगव्व्यूतिमुक्क्षतङ्घृतेन।। आमाजनेश्श्रवयतँय्युवानाश्श्रुतम्मेमित्त्रावरुणा
हवेमा।।९।। शन्नः।। शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवस्स्वर्क्का।। जम्भयन्तोहिं
व्वृकरक्क्षा७सिसनेम्म्यस्म्मद्द्युयवन्नमीवा।।१०।। व्वाजेवाजेवत। व्वाजिनोनोधनेषुव्विप्प्राऽ
अमृताऽऋतज्ज्ञा।। अस्यमद्ध्वःपिबतमादयद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानै।।११।। (११-१)
समिद्धोऽअग्निः। समिधासुसमिद्धोव्वरेण्ण्य।। गायत्त्रीच्छन्दऽइन्द्रियन्त्र्यविर्ग्गौर्व्वयोदधु
।।१२।। तनूनपाच्छुचिव्व्रत।। तनूनपाच्छुचिव्व्रतस्त्तनूपाश्च्चसरस्वती।। उष्णिहाच्छन्दऽ
इन्द्रियन्दित्त्यवाड्ङ्गौर्व्वयोदधु।।१३।। इडाभिरग्निः।। इडाभिरग्निरीड्ड्य सोमोदेवोऽअमर्त्त्य।।
अनुष्टुप्प्छन्दऽइन्द्रियम्पञ्चाविर्ग्गौर्व्वयोदधु।।१४।। सुबर्हिरग्निः। पूषण्णवान्स्तीर्ण्णबर्हिरमर्त्त्य
।। बृहतीच्छन्दऽइन्द्रियन्त्रिवत्त्सोगौर्व्वयोदधु।।१५।। दुरोदेवीः।। दुरोदेवीर्द्दिशोमहीब्ब्रह्म्मादेवो

बृहस्प्पतिः।। पङ्क्तिश्च्छन्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्व्वयोदधुः।।१६।। उषेयह्व्वी।। उषेयह्व्वी सुपेशसाव्विश्श्वेदेवाऽअमर्त्त्याः।। त्रिष्टुप्प्छन्दऽइहेन्द्रियम्पष्ठवाड्गौर्व्वयोदधुः।।१७।। दैव्व्याहोतारा। भिषजेन्द्रेणसयुजायुजा। जगतीच्छन्दऽइन्द्रियमनड्ड्वान्न्गौर्व्वयोदधुः।।१८।। तिस्रऽइडा।। तिस्रऽइडासरस्वतीभारतीमरुतोव्विशः।। व्विराट्ट्छन्दऽइहेन्द्रियन्धेनुग्गौर्न्नव्वयोदधुः।।१९।। त्वष्टातुरीपः।। त्वष्टातुरीपोऽअद्ब्धुतऽइन्द्राग्ग्नीपुष्टिवर्द्धना।। द्विपदाच्छन्दऽन्द्रियमुक्षागौर्न्नव्वयोदधुः।।२०।। शमितानः।। शमिनोव्वनस्प्पतिःसविताप्प्रसुवन्न्भगम्।। ककुप्प्छन्दऽइहेन्द्रियंव्वशाव्वेहद्द्वयोदधुः।।२१।। स्वाहायज्ञम्।। स्वाहायज्ञंव्वरुणःसुक्क्षत्रोभेषजङ्करत्।। अतिच्छन्दाऽइन्द्रियंबृहदृषभोगौर्व्वयोदधुः।।२२।। (११-२) व्वसन्तेनऽऋतुना। देवाव्वसवस्त्रिवृतास्तुताः ।। रथन्तरेणतेजसाहविरिन्द्रेव्वयोदधुः।।२३।। ग्रीष्म्मेणऽऋतुना। देवारुद्राःपञ्चदशेस्तुताः।। बृहतायशसाबलꣳहविरिन्द्रेव्वयोदधुः।।२४।। व्वर्षाभिर्ऋतुना। दित्त्यास्त्तोमेसप्प्तदशेस्तुताः।। व्वैरूपेणव्विशौजसाहविरिन्द्रेव्वयोदधुः।।२५।। शारदेनऽऋतुना। देवाऽएकविꣳशऽऋभवस्तुताः

।। व्वैराजेनश्श्रियाश्श्रियꣳहविरिन्द्रेव्वयोदधुः।।२६।। हेमन्तेनऽऋतुना। देवास्त्रिणवेमरुतस्तुताः
।। बलेनशक्क्वरीःसहोहविरिन्द्रेव्वयोदधुः।।२७।। शैशिरेणऽऋतुना। देवास्त्रयस्त्रिꣳशेमृतास्तुताः
।। सत्त्येनरेवतीःक्षत्रꣳहविरिन्द्रेव्वयोदधुः।।२८।। (६-३) होतायक्षत्। होतायक्षत्समिधाग्ग्नि
मिडस्प्पदेश्श्विनेन्द्रꣳसरस्वतीमजोधूम्म्रोनगोधूमैःकुवलैर्ब्भेषजम्मधुशष्प्पैर्न्नतेजऽइन्द्रियम्पयःसोम
ःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।२९।। होतायक्षत्तनूनपात्सरस्वतीम्।। होतायक्ष
त्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभरन्नश्श्विनेन्द्रायव्वीर्य्यम्बदरैरुपवाकाभिर्ब्भेष
जन्तोक्क्मभिःपयःसोमःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३०।। होतायक्षन्नराशꣳ
सन्न। नग्ग्नहुम्पतिꣳसुरयाभेषजम्मेषःसरस्वतीभिषग्ग्रथोनचन्द्र्यश्श्विनोर्व्वपाऽइन्द्रस्यव्वीर्य्यम्ब
दरैरुपवाकाभिर्ब्भेषजन्तोक्क्मभिःपयःसोमःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३१।।
होतायक्षदिडेडितः।। होतायक्षदिडेडितऽआजुह्वानःसरस्वतीमिन्द्रम्बलेनव्वर्द्धयन्नृषभेणगवे
न्द्रियमश्श्विनेन्द्रायभेषजँय्यवैःकर्क्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयःसोमःपरिस्रुताघृतम्मधुव्व्य

न्त्वाज्ज्यस्यहोतर्य्यज।।३२।। होतायक्षद्द्बर्हिरूर्णम्म्रदाꣳ।। होतायक्षद्द्बहिरूर्णम्म्रदाभिष

ङ्ङ्नासत्त्याभिषजाश्शिवनाश्श्वाशिशुमतीभिषग्ग्धेनुःसरस्स्वतीभिषग्ग्दुहऽइन्द्रायभेषजम्पयꣳसोमः

परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३३।। होतायक्षद्दुरोदिशः। कवष्ष्योनव्व्यचस्स्वतीर

श्शिवब्भ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहेधेनुःसरस्स्वत्त्यश्शिवनेन्द्रायभेषजꣳशुक्क्रन्नज्ज्योतिरिन्द्रि

यम्पयꣳसोमःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३४।। होतायक्षत्त्सुपेशसोषे। नक्क्त

न्दिवाश्शिवनासमञ्ज्जातेसरस्स्वत्त्यात्त्विषिमिन्द्रेनभेषजꣳश्येनोनरजसाहृदाश्श्रियानमासरम्पयꣳ

सोमःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३५।। होतायक्षद्दैव्व्याहोतारा। भिषजाश्शिव

नेन्द्रन्नजागृविदिवानक्क्तन्नभेषजैःशूषꣳसरस्स्वतीभिषक्क्सीसेनदुहऽइन्द्रियम्पयꣳसोमःपरिस्रुताघृ

तम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३६।। होतायक्षत्तिस्रोदेवीः।। होतायक्षत्तिस्रोदेवीर्न्नभेष

जन्त्रयस्त्रिधातवोपसोरूपमिन्द्रेहिरण्ण्ययमश्शिवनेडानभारतीव्वाचासरस्स्वतीमहऽइन्द्रायदुहऽइ

न्द्रियम्पयꣳसोमःपरिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३७।। होतायक्षत्त्सुरेतसमृषभम्।।

होतायक्षत्त्सुरेतंसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्श्विनाभिषजन्नसरस्वतीमोजोनजूतिरिन्द्रियंव्वृ
कोनरंभसोभिषग्ग्यशꣳसुरयाभेषजꣳश्रियानमासरम्पयꣳसोमः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्
य्यज।।३८।। होतायक्षद्द्वनस्प्पतिꣳशमितारम्।। होतायक्षद्द्वनस्प्पतिꣳशमितारꣳशतक्क्रतु
म्भीमन्नमन्न्युꣳराजानंव्व्याग्घ्रन्नमसाश्श्विनाभामꣳसरस्वतीभिषगिन्द्रायदुहऽइन्द्रियम्पयꣳसोमः
परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३९।। होतायक्षदग्ग्निꣳस्वाहा।। होतायक्षदग्ग्निꣳ
स्वाहाज्ज्यस्यस्तोकानाꣳस्वाहामेदसाम्पृथक्क्स्वाहाछागमश्श्विब्भ्याꣳस्वाहामेषꣳसरस्वत्त्यैस्वाहऽ
ऋषभमिन्द्रायसिꣳहायसहसऽइन्द्रियꣳस्वाहाग्ग्निन्नभेषजꣳस्वाहासोममिन्द्रियꣳस्वाहेन्द्रꣳसुत्त्रामा
णꣳसवितारंव्वरुणम्भिषजाम्पतिꣳस्वाहाव्वनस्प्पतिम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआज्ज्य
पाजुषाणोऽअग्ग्निब्भेषजम्पयꣳसोमः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।४०।। (१२–४)
होतायक्षदश्श्विनौछागस्य। व्वपायामेदसोजुषेताꣳहविर्होतर्य्यज।। होतायक्षत्त्सरस्वतीम्मेष
स्यव्वपायामेदसोजुषताꣳहविर्होतर्य्यज।। होतायक्षदिन्द्रमृषभस्यव्वपायामेदसोजुषताꣳहवि

होतर्य्यज।।४१।। होतायक्षदश्विनौसरस्वतीम्।। होतायक्षदश्विनौसरस्वतीमिन्द्रꣳ सुत्रामाणमिमेसोमाꣳसुरामाणश्च्छागैर्न्नमेषैर्ऋषभैः सुताःशष्पैर्न्नतोक्क्मभिर्ल्लाजैर्म्महस्वन्तोमदा मासरेणपरिष्कृताꣳशुक्राःपयस्वन्तोमृताꣳप्रस्थितावोमधुश्च्चुतस्त्तानश्विनासरस्वतीन्द्रः सुत्रा माव्वृत्रहाजुषन्ताꣳसोम्म्यम्मधुपिबन्तुमदन्तुव्व्यन्तुहोतर्य्यज।।४२।। होतायक्षदश्विनौछागस्य। हविषऽआत्तामद्द्यमद्धयतोमेदऽउद्भृतम्पुराद्द्वेषोभ्यꣳपुरापौरुषेय्यागृभोघस्त्तान्नूनङ्घासेऽअज्ज्राणाꣳ य्यवसप्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पाश्र्वतःश्रो णितःशितामतऽउत्सादतोङ्गादङ्गादवत्तानाङ्करतऽएवाश्विनाजुषेताꣳहविर्होतर्य्यज।।४३।। होतायक्षत्सरस्वतीम्मेषस्य। हविषऽआवयदद्द्यमद्धयतोमेदऽउद्भृतम्पुराद्द्वेषोभ्यꣳपुरापौरुषेय्या गृभोघसन्नूनङ्घासेऽअज्ज्राणाꣳय्यवसप्प्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणामग्निष्वात्तानाम्पीवो पवसनानाम्पाश्र्वतःश्रोणितःशितामतऽउत्सादतोङ्गादङ्गादवत्तानाङ्करदेवꣳसरस्वतीजुषताꣳहवि र्होतर्य्यज।।४४।। होतायक्षदिन्द्रमृषभस्य। हविषऽआवयदद्द्यमद्धयतोमेदऽउद्भृतम्पुराद्द्वेषो

ब्भ्यꣳपुरापौरुषेय्ययागृभोघसन्नूनङ्घासेऽअज्ज्राणाँय्यवसप्प्रथमानाꣳसुमत्क्षराणाꣳशतरुद्द्रिया
णामग्ग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्श्वतःश्रोणितःशितामतऽउत्त्सादतोङ्गादङ्गादवत्तानाङ्करदेव
मिन्द्रोजुषताꣳहविर्होतर्य्यज।।४५।। होतायक्षद्द्वनस्प्पतिमभि। हिपिष्ट्टतमयारभिष्ठ्ठयारश
नयाधित। यत्राश्श्विनोश्च्छागस्यहविषःप्प्रियाधामानियत्रसरस्वत्त्यामेषस्यहविषःप्प्रियाधामा
नियत्रेन्द्रस्यऽऋषभस्यहविषःप्प्रियाधामानियत्राग्ग्नेःप्प्रियाधामानियत्रसोमस्यप्प्रियाधामानियत्रेन्द्र
स्यसुत्राम्मणःप्प्रियाधामानियत्रसवितुःप्प्रियाधामानियत्रव्वरुणस्यप्प्रियाधामानियत्रव्वन
स्प्पतेꣳप्प्रियापाथाꣳसियत्रदेवानामाज्ज्यपानाम्प्रियाधामानियत्राग्ग्नेर्होतुःप्प्रियाधामानितत्रैता
न्प्रस्तुत्त्येवोपस्तुत्त्येवोपावस्स्रक्क्षद्द्रभीयसऽइवकृत्त्वीकरदेवन्देवोव्वनस्प्पतिर्ज्जुषताꣳहविहोतर्य्यज।
।४६।। होतायक्षदग्ग्निꣳस्विष्ट्टकृतम्।। होतायक्षदग्ग्निꣳस्विष्ट्टकृतमयाडग्ग्निरश्श्विनोश्च्छा
गस्यहविषःप्प्रियाधामान्ययाट्ट्सरस्वत्त्यामेषस्यहविषःप्प्रियाधामान्ययाडिन्द्रस्यऽऋषभस्यह
विषःप्प्रियाधामान्ययाडग्ग्नेःप्प्रियाधामान्ययाट्ट्सोमस्यप्प्रियाधामान्ययाडिन्द्रस्यसुत्राम्म्णः

प्प्रियाधामान्न्ययांट्ट्सवितुः प्प्रियाधामान्न्ययाड्ड्व्वरुणस्यप्प्रियाधामान्न्ययाड्ड्व्वनस्प्पतेः प्प्रि
यापाथाᳩस्ययांडड्देवानांमाज्ज्यपानांम्पियाधामांनियक्क्षंदग्ग्नेर्होतुः प्प्रियाधामांनियक्क्षत्त्स्वम्मंहि
मानमायंजतामेज्ज्याऽइषंः कृणोतुसोऽअंदद्ध्वराजातवैंदाजुषतांᳩहविर्होतय्यर्द्धंजं॥४७॥ (७-५)
देवम्बर्हिः। सरंस्वतीसुदेवमिन्द्रेंऽअश्श्विनां॥ तेजोनचक्क्षुरक्क्ष्योर्ब्बर्हिषांदधुरिन्द्रियंव्वंसुवनेंसुधे
यंस्यव्व्यन्तुयजं॥४८॥ देवीद्द्वारंः॥ देवीद्द्वारोऽअश्श्विनांभिषजेन्द्रेसरंस्वती॥ प्राणन्न
व्वीर्य्यन्नसिद्द्वारोंदधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्व्यन्तुयजं॥४९॥ देवीऽउषासौं॥ देवीऽउषासां
वश्श्विनांसुत्त्रामेन्द्रेसरंस्वती॥ बलन्नव्वाचंमास्यंऽउषाब्भ्यांन्दधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्य
व्व्यन्तुयजं॥५०॥ देवीजोष्ट्ट्रीं॥ देवीजोष्ट्ट्रीसरंस्वत्त्यश्श्विनेन्द्रंमवर्द्धयन्॥ श्रोत्त्रन्नकर्ण्णंयो
र्य्यशोजोष्ट्ट्रीब्भ्यान्दधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्व्यन्तुयजं॥५१॥ देवीऽऊर्ज्जाहुंती॥ देवीऽ
ऊर्ज्जाहुंतीदुघेंसुदुघेन्द्रेसरंस्वत्त्यश्श्विनांभिषजांवतः॥ शुक्क्रन्नज्ज्योतिस्त्तनंयोराहुंतीधरत्तऽइन्द्रियं
व्वांसुवनेंव्वसुधेयंस्यव्व्यन्तुयजं॥५२॥ देवादेवानांम्॥ देवादेवानांम्भिषजाहोतांराविन्द्रंमश्श्विनां

।। व्वषट्ट्कारैः सरस्वतीत्त्विषिन्नहदयेमतिꣳहोतृब्भ्यान्दधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यव्यन्तुयज

।।५३।। देवीस्त्तिस्रः।। देवीस्त्तिस्रस्त्तिस्रोदेवीराश्श्विनेडासरस्वती।। शूषन्नमद्ध्येनाब्भ्यामिन्द्राय

दधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यव्यन्तुयज।।५४।। देवऽइन्द्र÷।। देवऽइन्द्रोनराशꣳसस्त्रिवरूथः

सरस्वत्त्याश्श्विब्भ्यामीयतेरथ÷।। रेतोनरूपममृतञ्जनित्त्रमिन्द्रायत्त्वष्ट्टादधदिन्द्रियाणिव्वसुवने

व्वसुधेयस्यव्यन्तुयज।।५५।। देवोदेवैः।। देवोदेवैर्व्वनस्प्पतिर्हिरण्ण्यपर्ण्णोऽअश्श्विब्भ्याꣳसर

स्वत्त्यासुपिप्पलऽइन्द्रायपच्च्यतेमधु।। ओजोनजूतिर्ऋषभोनभामंव्वनस्प्पतिर्न्नोदधदिन्द्रियाणि

व्वसुवनेव्वसुधेयस्यव्यन्तुयज।।५६।। देवम्बर्हिः।। देवम्बर्हिर्व्वारितीनामद्ध्वरेस्त्तीर्ण्णमश्श्वि

ब्भ्यामूर्ण्णम्म्रदाꣳसरस्वत्त्यास्योनमिन्द्रतेसद÷।। ईशायैमन्न्युꣳराजानम्बर्हिषादधुरिन्द्रियंव्वसुवने

व्वसुधेयस्यव्यन्तुयज।।५७।। देवोऽअग्ग्निः। स्विष्ट्टकृद्देवान्न्यक्क्षद्द्यथायथꣳहोताराविन्द्रम

श्श्विनाव्वाचाव्वाचꣳसरस्वतीमग्ग्निꣳसोमꣳस्विष्ट्टकृत्त्स्विष्ट्टऽइन्द्र÷सुत्त्रामासविताव्वरुणोभिषगि

ष्ट्टोदेवोव्वनस्प्पतिꣳस्विष्ट्टादेवाऽआज्ज्यपाः स्विष्ट्टोऽअग्ग्निरग्ग्निनाहोताहोत्त्रेस्विष्ट्टकृद्द्यशोनदध

दिन्द्रियमूर्ज्जमपचितिᳫस्वधांव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज।।५८।। अग्निमद्द्य। होतारमवृणीतायँय्यजमानꣳपचन्पक्क्तीꣳपचन्पुरोडाशान्बद्धनन्नश्शिवब्भ्याञ्छागꣳसरस्वत्त्यैमेषमिन्द्रायऽऋषभꣳसुन्वन्नश्शिवब्भ्याᳫसरस्वत्त्याऽइन्द्रायसुत्राम्म्णेसुरासोमान्त्सूपस्त्थाऽअद्द्य।।५९।।

सूपस्त्थाऽअद्द्य। देवोव्वनस्प्पतिरभवदश्शिवब्भ्याञ्छागेनसरस्वत्त्यैमेषेणेन्द्रायऽऋषभेणाक्क्षँस्तान्न्मेदस्तःᳶप्रतिपचतागृभीषतावीवृधन्तपुरोडाशैरपुरश्शिवनासरस्वतीन्द्रः सुत्रामासुरासोमाँस्त्वामद्द्य।।६०।। त्वामद्द्य।। त्वामद्द्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायँय्यजमानोबहुब्भ्यऽआसङ्गतेब्भ्यऽएषमेदेवेषुव्वसुव्वार्य्यायक्क्ष्यतऽइतितायादेवादेवदानान्न्यदुस्त्तान्न्यस्म्माऽआचशास्वचगुरस्वेषितश्च्चहोतरसिभद्द्रवाच्च्यायप्प्रेषितोमानुषꣳसूक्क्तवाकायसूक्क्ताब्ब्रूहि।।६१।।(१४–६)

इतिश्रीवाजसनेयसंहितायामेकविंशोऽध्यायः।।२१।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।।

तेजोसिपंचा, ग्नयऽएका, हिङ्कारायद्वे, तत्त्सवितुर्द्दश, व्विभूर्म्मात्रैका, कायद्वे, ऽआब्रह्मँस्त्रयोदश, शेषादेकैको, नविꣳशतिश्च्चतुस्त्रिꣳशत् (अ. २२ मं. ३४ अनु. १९)।। हरिः ॐ।।

तेजोसि।। तेजोसिशुक्क्रममृतमायुष्प्पाऽआयुर्म्मेपाहि।। देवस्यत्त्वासवितुःप्प्रसवेश्शिवनोब्बाहु
ब्भ्याम्पूष्णणोहस्त्ताब्भ्यामाददे।।१।। इमामगृब्भ्णन्।। इमामगृब्भ्णन्नशनामृतस्यपूर्व्वऽआयुषि
व्विदथेषुकव्व्या।। सानोऽअस्मिन्त्सुतऽआबभूवऽऋतस्यसामन्त्सरमारपन्ती।।२।। अभिधाऽ
असि।। अभिधाऽअसिभुवनमसियन्तासिधर्त्ता।। सत्त्वमग्ग्निंव्वैश्श्वानरꣳसप्प्रथसङ्गच्छस्वाहाकृतः
।।३।। स्वगात्त्वा। देवेब्भ्यःप्प्रजापतयेब्ब्रह्म्मन्नश्श्वम्भन्त्स्यामिदेवेब्भ्यःप्प्रजापतयेतेनराद्ध्या
सम्।। तम्बधानदेवेब्भ्यःप्प्रजापतयेतेनराद्ध्नुहि।।४।। प्रजापतयेत्त्वा।। प्रजापतयेत्त्वाजुष्ट्टम्प्रो
क्क्षामीन्द्राग्ग्निब्भ्यान्त्वाजुष्ट्टम्प्रोक्क्षामिव्वायवेत्त्वाजुष्ट्टम्प्रोक्क्षामिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यो
जुष्ट्टम्प्रोक्क्षामिसर्व्वेब्भ्यस्त्वादेवेब्भ्योजुष्ट्टम्प्रोक्क्षामि।। योऽअर्व्वन्तञ्जिघाꣳसतितमब्भ्यमीति
व्वरुणः।। परोमर्त्तःपरःश्वा ।।५।। (५-१)

अग्ग्नयेस्वाहा।। अग्ग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवित्त्रेस्वाहाव्वायवेस्वाहाव्विष्ण्ण
वेस्वाहेन्द्रायस्वाहाबृहस्प्पतयेस्वाहामित्त्रायस्वाहाव्वरुणायस्वाहा।।६।। (१-२) हिङ्काराय

स्वाहा॥ हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्क्रन्दतेस्वाहावक्क्रन्दायस्वाहाप्प्रोथतेस्वाहाप्प्रप्प्रोथाय
स्वाहागन्धायस्वाहाग्घ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहाव्वल्गतेस्वाहा
सीनायस्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्ग्रतेस्वाहाकूजतेस्वाहाप्प्रबुद्धायस्वाहाव्विजृम्भ
माणायस्वाहाव्विचृतायस्वाहासꣳहानायस्वाहोपस्थितायस्वाहायनायस्वाहाप्प्रायणायस्वाहा
॥७॥ यतेस्वाहा॥ यतेस्वाहाधावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृताय
स्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवायस्वाहाबलायस्वाहाव्विवर्त्तमानायस्वाहाव्विवृत्ताय
स्वाहाव्विधून्वानायस्वाहाव्विधूतायस्वाहाशुश्रूषमाणायस्वाहाशृण्वतेस्वाहेक्षमाणायस्वाहे
क्क्षितायस्वाहाव्वीक्क्षितायस्वाहानिमेषायस्वाहायदत्तितस्म्मैस्वाहायत्त्पिबतितस्म्मैस्वाहायन्मूत्त्रं
ङ्करोतितस्म्मैस्वाहाकुर्व्वतेस्वाहाकृतायस्वाहा॥८॥ (२-३) तत्त्सवितुः॥ तत्त्सवितुर्व्वरेण्य
म्भर्ग्गोदेवस्यधीमहि॥ धियोयोनः प्प्रचोदयात्॥९॥ हिरण्यपाणिमूतये। सवितारमुपह्वये॥
सचेत्तादेवतापदम्॥१०॥ देवस्यचेततꣳ॥ देवस्यचेततोमहीम्प्रसवितुर्हवामहे॥ सुमतिꣳसत्त्य

राधसम्।।११।। सुष्टुतिꣳसुमतीवृधः।। सुष्टुतिꣳसुमतीवृधोरातिꣳसवितुरीमहे।। प्रदेवायमतीविदे ।।१२।। रातिꣳसत्त्पतिम्।। रातिꣳसत्त्पतिम्महेसवितारमुपह्व्वये।। आसवन्देववीतये।।१३।। देवस्यसवितुः।। देवस्यसवितुर्म्मतिमासवंव्विश्श्वदेव्व्यम्।। धियाभगम्मनामहे।।१४।। अग्निꣳस्तोमेन। बोधयसमिधानोऽअमर्त्त्यम्।। हव्व्यादेवेषुनोदधत्।।१५।। सहव्व्यवाट्।। सहव्व्यवाडमर्त्त्यऽउशिग्ग्दूतश्श्चनोहितः।। अग्निर्द्धियासमृण्णवति।।१६।। अग्निन्दूतम्।। अग्निन्दूम्पुरोदधे हव्व्यवाहमुपब्ब्रुवे।। देवाँ२।।ऽआसादयादिह।।१७।। अजीजनोहि। पवमानसूर्य्यंव्विधारेशक्क्मनापयः।। गोजीरयारꣳहमाणꣳपुरन्ध्या।।१८।। (१०-४) व्विभूर्म्मात्त्रा। प्प्रभूःपित्राश्श्वोसिह योस्यत्त्योसिमयोस्यर्व्वासिसप्प्तिरसिव्वाज्ज्यसिव्वृषासिनृमणाऽअसि ।। ययुर्न्नामासिशिशुर्न्नामास्यादित्त्यानाम्पत्त्वान्विहिदेवाऽआशापालाऽएतन्देवेब्भ्योश्श्वम्मेधायप्प्रोक्षितꣳरक्षतेहरन्तिरिहरमतामिहधृतिरिहस्वधृतिःस्वाहा।।१९।। (१-५) कायस्वाहा।। कायस्वाहाकस्म्मैस्वाहाकतमस्म्मैस्वाहास्वाहाधिमाधीतायस्वाहामनःप्प्रजापतयेस्वाहाचित्तंव्विज्ञातायादित्त्यैस्वाहादित्त्यै

मह्यौस्वाहादित्त्यैसुमृडीकायैस्वाहासरस्वत्त्यैस्वाहासरस्वत्त्यैपावकायैस्वाहासरस्वत्त्यैबृहत्त्यैस्वाहापूष्णेस्वाहापूष्णेप्प्रपत्थ्यायस्वाहापूष्णेनरन्धिषायस्वाहात्त्वष्ट्रेस्वाहात्त्वष्ट्रेतुरीपायस्वाहात्त्वष्ट्रेपुरुरूपायस्वाहाव्विष्णवेस्वाहाव्विष्णवेनिभूयपायस्वाहाव्विष्णवेशिपिविष्टायस्वाहा ।।२०।।

व्विश्श्वोदेवस्य। नेतुर्म्मर्त्तोव्वुरीतसक्ख्यम्।। व्विश्श्वोरायऽइषुद्ध्यतिद्द्युम्म्नंव्वृणीतपुष्ष्यसेस्वाहा।।२१।। (२–६)

आब्ब्रह्म्मन्।। आब्ब्रह्म्मन्ब्ब्राह्म्मणोब्ब्रह्म्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्ड्वानाशुः सप्प्तिः पुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनः पर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयः पच्च्यन्तांय्योगक्क्षेमोनः कल्प्पताम्।।२२।। (१–७) प्राणायस्वाहा। पानायस्वाहाव्व्यानायस्वाहाचक्क्षुषेस्वाहाश्श्रोत्त्रायस्वाहावाचेस्वाहामनसेस्वाहा।।२३।। (१–८) प्राच्च्यैदिशे। स्वाहार्व्वाच्च्यैदिशेस्वाहादक्क्षिणायैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहाप्प्रतीच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशे

स्वाहोदीच्च्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहोद्ध्वायैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहावाच्च्यैदिशेस्वाह
ार्व्वाच्च्यैदिशेस्वाहा।।२४।। (१-९) अद्भ्यःस्वाहा। व्वार्ब्भ्यःस्वाहोदकायस्वाहातिष्ठन्ती
ब्भ्यःस्वाहास्रवन्तीब्भ्यःस्वाहास्यन्दमानाब्भ्यःस्वाहाकूप्प्याब्भ्यःस्वाहासूद्द्याब्भ्यःस्वाहाधार्य्या
ब्भ्यःस्वाहार्ण्णवायस्वाहासमुद्द्रायस्वाहासरिरायस्वाहा।।२५।। (१-१०) व्वातायस्वाहा।
धूमायस्वाहाब्भ्रायस्वाहामेघायस्वाहाव्विद्द्योतमानायस्वाहास्त्तनयतेस्वाहावस्प्फूर्ज्जतेस्वाहाव्वर्ष
तेस्वाहाववर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहाशीग्घ्रंव्वर्षतेस्वाहोद्द्गृह्णतेस्वाहोद्द्गृहीतायस्वाहाप्प्रुष्णतेस्
वाहाशीकायतेस्वाहाप्प्रुष्वाब्भ्यःस्वाहाह्लादुनीब्भ्यःस्वाहानीहारायस्वाहा।।२६।। (१-११)
अग्ग्नयेस्वाहा।। अग्ग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहापृथिव्व्यैस्वाहान्तरिक्क्षायस्वाहादिवे
स्वाहादिग्ग्भ्यःस्वाहाशाब्भ्यःस्वाहोर्व्व्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहा।।२७।। (१-१२)
नक्क्षत्रेब्भ्यःस्वाहा। नक्क्षत्रियेब्भ्यःस्वाहाहोरात्त्रेब्भ्यःस्वाहार्द्धमासेब्भ्यःस्वाहामासेब्भ्यःस्वाह
ऽऋतुब्भ्यःस्वाहार्त्तवेब्भ्यःस्वाहासंवत्त्सरायस्वाहाद्द्यावापृथिवीब्भ्याꣳस्वाहाचन्द्रायस्वाहा

सूर्य्यायस्वाहारश्मिब्भ्यःस्वाहाव्वसुब्भ्यःस्वाहारुद्द्रेब्भ्यःस्वाहादित्त्येब्भ्यःस्वाहामरुद्द्भ्यःस्वाहा
व्विश्श्वेब्भ्योदेवेब्भ्यःस्वाहामूलेब्भ्यःस्वाहाशाखाब्भ्यःस्वाहाव्वनस्प्पतिब्भ्यःस्वाहापुष्प्पेब्भ्यः
स्वाहाफलेब्भ्यःस्वाहौषधीब्भ्यःस्वाहा॥२८॥ (१-१३) १३०० शतम्॥ पृथिव्व्यैस्वाहा॥
पृथिव्व्यैस्वाहान्तरिक्क्षायस्वाहादिवेस्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्क्षत्रेब्भ्यःस्वाहाद्द्भ्यः
स्वाहौषधीब्भ्यःस्वाहाव्वनस्प्पतिब्भ्यःस्वाहापरिप्प्लवेब्भ्यःस्वाहाचराचरेब्भ्यःस्वाहासरीसृपे
ब्भ्यःस्वाहा॥२९॥ (१-१४) असवेस्वाहा॥ असवेस्वाहाव्वसवेस्वाहाव्विभुवेस्वाहाव्विवस्वते
स्वाहागणश्श्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतयेस्वाहाशूषायस्वाहासꣳसर्प्पायस्वाहा
चन्द्रायस्वाहाज्ज्योतिषेस्वाहामलिम्म्लुचायस्वाहादिवापतयतेस्वाहा॥३०॥ (१-१५) मधवे
स्वाहा। मधवेस्वाहामाधवायस्वाहाशुक्क्रायस्वाहाशुचयेस्वाहानभसेस्वाहानभस्यायस्वाहेषाय
स्वाहोर्ज्जायस्वाहासहसेस्वाहासहस्यायस्वाहातपसेस्वाहातपस्यायस्वाहाꣳहसस्प्पतयेस्वाहा
॥३१॥ (१-१६) व्वाजायस्वाहा। प्प्रसवायस्वाहापिजायस्वाहाक्क्रतवेस्वाहास्वःस्वाहामूद्र्ध्ने

स्वाहाव्व्यश्नुविनेस्वाहान्त्यायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहा

प्प्रजापतयेस्वाहा।।३२।। (१–१७) आयुर्य्यज्ज्ञेन। कल्प्पता७स्वाहाप्प्राणोयज्ज्ञेनकल्प्पता७

स्वाहापानोयज्ज्ञेनकल्प्पता७स्वाहाव्व्यानोयज्ज्ञेनकल्प्पता७स्वाहोदानोयज्ज्ञेनकल्प्पता७स्वाहा

समानोयज्ज्ञेनकल्प्पता७स्वाहाचक्षुर्य्यज्ज्ञेनकल्प्पता७स्वाहाश्श्रोत्त्रँय्यज्ज्ञेनकल्प्पता७स्वाहा

व्वाग्ग्यज्ज्ञेनकल्प्पता७स्वाहामनोयज्ज्ञेनकल्प्पता७स्वाहात्त्मायज्ज्ञेनकल्प्पता७स्वाहाब्ब्रह्मायज

ज्ञेनकल्प्पता७स्वाहाज्ज्योतिर्य्यज्ज्ञेनकल्प्पता७स्वाहास्वर्य्यज्ज्ञेनकल्प्पता७स्वाहापृष्ठँय्यज्ज्ञेन

कल्प्पता७स्वाहायज्ज्ञोयज्ज्ञेनकल्प्पता७स्वाहा।।३३।। (१–१८) एकस्म्मैस्वाहा।। एकस्म्मैस्वा

हाद्द्वाब्भ्या७स्वाहाशतायस्वाहैकशतायस्वाहाव्व्युष्ट्यैस्वाहास्वर्ग्गायस्वाहा।।३४।। (१–१९)

इतिश्रीवाजसनेयसंहितायां द्वाविंशोऽध्यायः।।२२।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।।

हिरण्ण्यगब्भीयःप्प्राणतोद्विकौ, युञ्जन्त्यष्टौ, व्वायुष्ट्वापञ्च, प्राणायतिस्र, उत्त्सक्क्थ्या द्वादश,

गायत्त्रीत्रिष्टुप्, कस्त्त्वाषट्कौ, कःस्विदष्टौ, कास्विद्दश, सुभूःस्वयंभूस्तिस्र, एकादश

पञ्चषष्टिः।। (अ. २३ मं. ६५ अनु. ११) हरिः ॐ। हिरण्यगर्ब्भऽसम्।। हिरण्यगर्ब्भऽ
समवर्त्तताग्ग्रेभूतस्यजातऽपतिरेकऽआसीत्।। सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्वि
धेम।।१।। उपयामगृहीतोसि। प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यस्तेमहिमा।।
यस्तेहन्त्संवत्त्सरेमहिमासम्बभूवयस्तेव्वायावन्तरिक्क्षेमहिमसाम्बभूवयस्तेदिविसूर्य्येमहिमासम्बभू
वतस्म्मैतेमहिम्म्नेप्प्रजापतयेस्वाहादेवेब्भ्यः।।२।। (२-१) यऽप्प्राणतः। यऽप्प्राणतोनिमिषतो
महित्त्वैकऽइद्राजाजगतोबभूव।। यऽईशेऽअस्यद्विपदश्च्चतुष्प्पदःकस्म्मैदेवायहविषाव्विधेम
।।३।। उपयामगृहीतोसि। प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिश्च्चन्द्रमास्तेमहिमा।।
यस्तेरात्त्रौसंवत्त्सरेमहिमासम्बभूवयस्तेपृथिव्यामग्ग्नौमहिमासम्बभूवयस्तेनक्क्षत्त्रेषुचन्द्रमसिम
हिमासम्बभूवतस्म्मैतेमहिम्म्नेप्प्रजापतयेदेवेब्भ्यःस्वाहा।।४।। (२-२) युञ्जन्तिब्ब्रद्ध्नम्।
युञ्जन्तिब्ब्रद्ध्नमरुषञ्चरन्तम्परितस्त्थुषः।। रोचन्तेरोचनादिवि।।५।। युञ्जन्त्यस्य।। युञ्जन्त्य
स्यकाम्म्याहरीव्विपक्क्षसारथे।। शोणाधृष्णूनृवाहसा।।६।। यद्वातः।। यद्वातोऽअपोऽअग

नीगन्प्रियामिन्द्रस्यतन्न्वम्।। एतꣳस्तोतरनेनपथापुनरश्श्वमावर्त्तयासिनः।।७।। व्वसवस्त्वा।
ञ्जन्तुगायत्त्रेणच्छन्दसारुद्द्रास्त्वाञ्जन्तुत्त्रैष्टुभेनच्छन्दसादित्त्यास्त्वाञ्जन्तुजागतेनच्छन्दसा।।
भूर्ब्भुवःस्स्वर्ल्लाजी३।। ञ्छाची३।। न्न्यव्व्येगव्व्यंएतदन्नमत्तदेवाऽएतदन्नमद्धिप्प्रजापते।।८।।
कःस्वित्।। कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः।। किꣳस्विद्धिमस्यभेषजङ्किम्वावपनम्म
हत्।।९।। सूर्य्यंऽएकाकी। चरतिचन्द्रमाजायतेपुनः।। अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत्
।।१०।। कास्वित्।। कास्विदासीत्त्पूर्व्वचित्तिःकिꣳस्विदासीद्बृहद्वयः।। कास्विदासीत्त्पिलि
प्पिलाकास्विदासीत्त्पिशङ्गिला।।११।। द्यौरासीत्।। द्यौरासीत्त्पूर्व्वचित्तिरश्श्वऽआसीद्बृहद्वयः
।। अविरासीत्त्पिलिप्पिलारात्त्रिरासीत्त्पिशङ्गिला।।१२।। (८-३) व्वायुष्ट्वा।। पचतैर्वत्त्व
सितग्ग्रीवश्च्छागैर्न्न्यग्ग्रोधश्च्चमसैःशल्म्मलिर्व्वृद्ध्या।। एषस्यराथ्थ्योव्वृषापड्भिश्च्चतुर्भिरे
दगन्ब्रह्ममाकृष्णश्च्चनोवतुनमोग्नये।।१३।। सꣳशितोरश्मिना।। सꣳशितोरश्मिनारथःसꣳ
शितोरश्मिनाहयः।। सꣳशितोऽअप्स्वप्सुजाब्ब्रह्ममासोमपुरोगवः।।१४।। स्वयंव्वाजिन्।।

स्वयंव्वाजिंस्तन्न्वङ्कल्प्पयस्वस्वयँय्यजस्वस्वयञ्जुषस्व।। महिमातेन्न्येननसन्नशे।।१५।। नवै।।
नवाऽउऽएतन्म्रियसेनरिष्ष्यसिदेवाँ२।।ऽइदेषिपथिभिः सुगेभिः।। यत्रासतेसुकृतोयत्रतेययुस्तत्र
त्त्वादेवःसवितादधातु।।१६।। अग्निःपशुः।। अग्निःपशुरासीत्तेनायजन्तसऽएतँल्लोकमज
यद्द्यस्मिन्नग्निःसतेलोकोभविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः।। व्वायुःपशुरासीत्तेनायजन्तस
ऽएतँल्लोकमजयद्द्यस्मिन्न्वायुःसतेलोकोभविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः।। सूर्य्यःपशु
रासीत्तेनायजन्तसऽएतँल्लोकमजयद्द्यस्मिन्त्सूर्य्यःसतेलोकोभविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअप
।।१७।। (५-४) प्राणायस्वाहा। पानायस्वाहाव्व्यानायस्वाहा।। अम्बेऽअम्बिकेम्बालिकेन
मानयतिकश्च्चन।। ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम्।।१८।। गणानान्त्वा। गणपतिꣳ
हवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम।। आहमजा
निगर्ब्भधमात्त्वमजासिगर्ब्भधम्।।१९।। ताऽउभौचतुरःपदःसम्प्रसारयावस्वर्ग्गेलोके प्प्रोर्ण्णुवाथां
व्वृषाव्वाजीरेतोधारेतोदधातु।।२०।। (३-५) उत्त्सक्थ्याऽअव। गुदन्धेहिसमञ्जिञ्चारयाव्वृषन्।।

यस्त्रीणाञ्जीवभोजनꣳ।।२१।। यकासकौ। शकुन्तिकाहलगितिव्वञ्चति। आहन्तिगभेपसो
निगल्गलीतिधारका।।२२।। यकोसकौ। शकुन्तकऽआहलगितिव्वञ्चति।। व्विवक्क्षत
ऽइवतेमुखद्ध्वय्र्योमानस्त्वमभिभाषथाꣳ।।२३।। माताच। तेपिताचतेग्ग्रंव्वृक्क्षस्यरोहतꣳ ।।
प्रतिलामीतितेपितागभेमुष्ट्टिमतꣳसयत्।।२४।। माताच। तेपिताचतेग्ग्रेव्वृक्क्षस्यक्क्रीडतꣳ।।
व्विवक्क्षतऽइवतेमुखम्ब्रह्म्मन्न्मात्त्वंव्वदोबहु।।२५।। ऊद्ध्र्वामेनाम्। ऊद्ध्र्वामेनामुच्छापय
गिरौभारꣳहरन्निव।। अथास्यैमद्ध्यमेधताꣳशीतेव्वातेपुनन्निव।।२६।। ऊद्ध्र्वमेनम्।। ऊद्ध्र्वमेन
मुच्छ्रयतादिग्गिरौभारꣳहरन्निव।। अथास्यमद्ध्यमेजतुशीतेव्वातेपुनन्निव।।२७।। यदस्याꣳ।।
यदस्याऽअꣳहुभेद्याꣳकृधुस्स्थलमुपातसत्।। मुष्क्काविदस्याऽएजतोगोशफेशकुलाविव।।२८।।
यद्देवासः।। यद्देवासोललामगुम्प्रविष्ट्टीमिनमाविषुꣳ।। सक्क्थ्नादेदिश्श्यतेनारीसत्त्यस्याक्क्षिभुवो
यथा।।२९।। यद्धरिणः।। यद्धरिणोयवमत्तिनपुष्ट्टम्पशुमन्न्यते।। शूद्द्रायदय्र्यजारानपोषायधना
यति।।३०।। यद्धरिणः।। यद्धरिणोयवमत्तिनपुष्ट्टम्बहुमन्न्यते। शूद्द्रोयदय्र्यायैजारोनपोषमनु

मन्न्यते।।३१।। दधिक्क्राव्ण्णोऽअकारिषम्। दधिक्क्राव्ण्णोऽअकारिषञ्जिष्ण्णोरश्श्वस्यव्वा
जिनः।। सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत्।।३२।। (१२-६) गायत्त्रीत्त्रिष्ट्टुप्। गायत्त्री
त्त्रिष्ट्टुब्ब्जगत्त्यनुष्ट्टुप्प्पङ्क्त्यासह।। बृहत्त्युष्णिहाककुप्प्सूचीभिःशम्म्यन्तुत्त्वा।।३३।। द्विपदायाः।।
द्विपदायाश्च्चचतुष्पदास्त्रिपदायाश्च्चषट्ट्पदाः।। व्विच्छन्दायाश्च्चसच्छन्दाःसूचीभिः
शम्म्यन्तुत्त्वा।।३४।। महानाम्न्योरेवत्त्यः।। महानाम्न्योरेवत्त्योव्विश्श्वाऽआशाःप्प्रभूवरीः।।
मैघीर्व्विद्द्युतोव्वाचःसूचीभिःशम्म्यन्तुत्त्वा।।३५।। नार्य्यस्त्ते।। नार्य्यस्त्तेपत्क्न्योलोम
व्विचिन्न्वन्तुमनीषया।। देवानाम्पत्क्न्योदिशःसूचीभिःशम्म्यन्तुत्त्वा।।३६।। रजताहरिणीः।।
रजताहरिणीःसीसायुजोयुज्ज्यन्तेकर्म्मभिः।। अश्श्वस्यव्वाजिनस्त्त्वचिसिमाःशम्म्यन्तुशम्म्यन्तीः
।।३७।। कुविदङ्ग। यवमन्तोयवञ्चिद्द्यथादान्त्यनुपूर्व्वंव्वियूय।। इहेहैषाङ्कृणुहिभोजनानिये
बर्हिषोनमऽउक्त्तिंय्यजन्ति।।३८।। (६-७) कस्त्त्वा।। कस्त्त्वाच्छ्यतिकस्त्त्वाव्विशास्त्तिकस्त्ते
गात्त्राणिशम्म्यति।। कऽउतेशमिताकविः।।३९।। ऋतवस्त्ते।। ऋतवस्त्तऽऋतुथापर्व्वशमितारो

व्विशासतु।। संवत्त्सरस्यतेजसाशमीभिः शम्म्यन्तुत्त्वा।।४०।। अर्द्धमासाः परूँषि। तेमासाऽ
आच्छ्यन्तुशम्म्यन्तः।। अहोरात्त्राणिमरुतोव्विलिष्ट्टꣳसूदयन्तुते।।४१।। दैव्व्याऽअद्ध्वर्य्यवः।।
दैव्व्याऽअद्ध्वर्य्यवस्त्वाच्छ्यन्तुव्विचशासतु।। गात्त्राणिपर्व्वशस्त्तेसिमाꣳकृण्ण्वन्तुशम्म्यन्तीः
।।४२।। द्यौस्त्ते। पृथिव्व्यन्तरिक्षंव्वायुश्छिद्द्रम्पृणातुते।। सूर्य्यस्त्तेनक्क्षत्त्रैꣳसहलोकङ्कृणोतु
साधुया।।४३।। शन्ते।। शन्तेपरेब्भ्योगात्त्रेब्भ्यꣳशमस्त्ववरेब्भ्यः।। शमस्त्थब्भ्योमज्जब्भ्यः
शम्म्वस्तुतन्न्वैतव।।४४।। (६-८) कः स्वित्।। कः स्विदेकाकीचरतिकऽउस्विज्जायतेपुनः।
किँस्विद्धिमस्यभेषजङ्किम्म्वावपनम्महत्।।४५।। सूर्य्यऽएकाकी। चरतिचन्द्रमाजायतेपुनः।।
अग्ग्निर्हिमस्यभेषजम्भूमिरावपनम्महत्।।४६।। किँस्वित्।। किँस्वित्त्सूर्य्यसमञ्ज्योतिꣳकिꣳ
समुद्द्रसमꣳसरः।। किँस्वित्त्पृथिव्व्यैव्वर्षीयꣳकस्यमात्त्रानव्विद्यते।।४७।। ब्रह्म्मसूर्य्यसमम्।।
ब्रह्म्मसूर्य्यसमञ्ज्योतिद्यौःसमुद्द्रसमꣳसरः।। इन्द्रःपृथिव्व्यैव्वर्षीयान्न्गोस्त्तुमात्त्रानव्विद्यते
।।४८।। पृच्छामित्त्वा। चितयेदेवसखयदित्त्वमत्त्रमनसाजगन्त्थ।। येषुव्विष्ण्णुस्त्त्रिषुपदेष्ष्वेष्ट्टस्त्ते

षुव्विश्श्वम्भुवनमाविवेशा३।।४९।। अपितेषु। त्त्रिषुपदेष्ष्वस्मियेषुव्विश्श्वम्भुवनमाविवेश।।
सद्द्यःपर्य्येमिपृथिवीमुतद्द्यामेकेनाङ्गेनदिवोऽअस्यपृष्ठुम्।।५०।। केष्ष्वन्तः। पुरुषऽआविवेशका
न्न्यन्तःपुरुषेऽअर्प्पितानि।। एतद्द्ब्रह्म्मन्नुपवल्ल्हामसित्त्वाकिंस्विन्नःप्प्रतिवोचास्यत्त्र।।५१।।
पञ्चस्वन्तः। पुरुषऽआविवेशतान्न्यन्तःपुरुषेऽअर्प्पितानि।। एतत्त्वात्त्रप्प्रतिमन्न्वानोऽअस्म्मिन
माययाभवस्युत्तरोमत्।।५२।। (८-९) कास्वित्।। कास्विदासीप्पूर्व्वचित्तिकिꣳस्विदासीद्द्बृहद्
द्वयः।। कास्विदासीत्त्पिलिप्पिलाकास्विदासीत्त्पिशङ्गिला।।५३।। द्यौरासीत्।। द्यौरासीत्त्पूर्व्व
चित्तिरश्श्वऽआसीद्द्बृहद्द्वयः।। अविरासीत्त्पिलिप्प्पिलारात्त्रिरासीत्त्पिशङ्गिला।।५४।। काऽईम्।।
काऽईमरेपिशङ्गिलाकाऽईङ्कुरुपिशङ्गिला।। कऽईमास्क्कन्दमर्षतिकऽईम्पन्थांव्विसर्प्पति।।५५।।
अजारे। पिशङ्गिलाश्श्वाविक्त्कुरुपिशङ्गिला।। शशऽआस्क्कन्दमर्षत्त्यहिःपन्थांव्विसर्प्पति।।५६।।
कत्त्यस्य। व्विष्ठाःकत्त्यक्क्षराणिकतिहोमासःकतिधासमिद्धः।। यज्ज्ञस्यत्त्वाव्विदथापृच्छमत्त्रक
तिहोतारऽऋतुशोयजन्ति।।५७।। षडस्य। व्विष्ठाःशतमक्क्षराण्ण्यशीतिर्होमाःसमिधोहतिस्रः।।

यज्ञस्यतेव्विदथाप्प्रब्ब्रवीमिसप्प्तहोतारऽऋतुशोयजन्ति।।५८।। कोऽअस्य। व्वेदभुवनस्यना
भिङ्कोद्द्यावापृथिवीऽअन्तरिक्षम्।। कःसूर्य्यस्यव्वेदबृहतोजनित्रङ्कोव्वेदचन्द्रमसँय्यतोजाः
।।५९।। व्वेदाहम्।। व्वेदाहमस्यभुवनस्यनाभिंव्वेदद्द्यावापृथिवीऽअन्तरिक्षम्।। व्वेदसूर्य्यस्य
बृहतोजनित्रमथोव्वेदचन्द्रमसँय्यतोजाः।।६०।। पृच्छामित्त्वा।। पृच्छामित्त्वापरमन्तम्पृथिव्याः
पृच्छामियत्रभुवनस्यनाभिः।। पृच्छामित्त्वाव्वृष्णोऽअश्श्वस्यरेतःपृच्छामिव्वाचःपरमंव्व्योम
।।६१।। इयंव्वेदिः।। इयंव्वेदिःपरोऽअन्तःपृथिव्याऽअयँय्यज्ञोभुवनस्यनाभिः।। अयꣳसोमो
व्वृष्णोऽअश्श्वस्यरेतोब्ब्रह्म्मायंव्वाचःपरमंव्व्योम।।६२।। (१०-१०) सुभूःस्वयम्भूः।
प्प्रथमोन्तर्म्महत्त्यर्ण्णवे।। दधेहगर्ब्भमृत्त्वियँय्यतोजातःप्प्रजापतिः।।६३।। होतायक्षत्।।
होतायक्षत्त्प्रजापतिꣳसोमस्यमहिम्म्नः।। जुषताम्पिबतुसोमꣳहोतर्य्यज।।६४।। प्रजापतेन।
त्त्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव।। यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुव्वयꣳ
स्यामपतयोरयीणाम्।।६५।। (३-११) इतिश्रीवाजसनेयसंहितायां त्रयोविंशोऽध्यायः।।२३।।

श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। अश्श्वस्तूपरो, धूम्म्रान्वसन्ताय, समुद्द्रायशिशुमारान्, मयुःप्प्राजापत्त्योदशका, श्चत्वारश्चत्वारिꣳशत् (अ. २४ मं. ४० अनु. ४)।। हरिः ॐ।।

अश्श्वस्तूपरः।। अश्श्वस्तूपरोगोमृगस्तेप्प्राजापत्त्याःकृष्णग्ग्रीवऽआग्ग्नेयोरराटेपुरस्तात्सारस्वतीमेष्य्युधस्ताद्धन्न्वोराश्श्विनावधोरामौबाह्व्वोःसौमापौष्णःश्यामोनाब्भ्याःसौर्य्यायमौश्श्वेतश्चचकृष्णश्च्चपाश्श्वर्वयोस्त्वाष्ट्रौलोमशसक्त्थौसक्थ्योर्व्वायव्व्यः श्वेतःपुच्छऽइन्द्रायस्वपस्यायव्वेहद्द्वैष्णवोव्वामनः।।१।। रोहितोधूम्म्ररोहितः। कर्क्कन्धुरोहितस्तेसौम्म्याबब्भ्रुररुणबब्भ्रुःशुकबब्भ्रुस्तेव्वारुणाःशितिरन्ध्रोन्न्यतः शितिरन्ध्रःसमन्तशितिरन्ध्रस्तेसावित्त्राःशितिबाहुरन्न्यतः शितिबाहुःसमन्तशितिबाहुस्तेबार्हस्प्पत्त्याःपृषतीक्क्षुद्द्रपृषतीस्थूलपृषतीतामैत्त्रावरुण्ण्यः।।२।। शुद्धवालःसर्व्वशुद्धवालः।। शुद्धवालःसर्व्वशुद्धवालोमणिव्वालस्तऽआश्श्विनाःश्येतः श्येताक्षोरुणस्तेरुद्द्रायपशुपतयेकर्ण्णायामाऽअवलिप्प्तारौद्द्रानभोरूपाःपार्ज्जन्न्याः।।३।। पृश्निस्तिरश्च्चीनपृश्निः।। पृश्निस्तिरश्च्चीनपृश्निरूद्ध्र्वपृश्निस्तेमारुताःफल्गूर्लोहितोर्ण्णी

पलक्क्षीताःसारस्वत्त्य÷प्प्लीहाकर्ण्णा÷शुण्ठाकर्ण्णोद्ध्यालोहकर्ण्णस्त्तेत्त्वाष्ट्ट्राःकृष्ण्णग्ग्रीवः
शिति कक्क्षोञ्जिसक्क्थस्त्तऽऐन्द्राग्ग्नाःकृष्ण्णाञ्जिरल्प्पाञ्जिर्म्महाञ्जिस्त्तऽउषस्या÷।।४।।
शिल्प्पाव्वैश्श्वदेव्व्य÷।। शिल्प्पाव्वैश्श्वदेव्व्योरोहिण्ण्यस्त्त्र्यवयोव्वाचेविज्ज्ञाताऽअदित्त्यैस
रूपाधात्त्रेव्वत्त्सतर्य्योदेवानाम्पत्त्नीब्भ्यः।।५।। कृष्ण्णग्ग्रीवाऽआग्ग्नेयाः। शितिब्भ्रवोव्वसूना७
रोहितारुद्द्राणा७श्वेताऽअवरोकिणऽआदित्त्यानान्नभोरूपाःपार्ज्जन्न्याः।।६।। उन्नतऽऋषभः।।
उन्नतऽऋषभोव्वामनस्त्तऽऐन्द्रावैष्ण्णवाऽउन्नतःशितिबाहुःशितिपृष्ठस्त्तऽऐन्द्राबार्हस्प्पत्त्याःशुकरू
पाव्वाजिनाःकल्म्माषाऽआग्ग्निमारुताःश्यामाःपौष्ण्णाः।।७।। एताऽऐन्द्राग्ग्नाः।। एताऽऐन्द्राग्ग्ना
द्द्विरूपाऽअग्ग्नीषोमीयाव्वामनाऽअनड्ड्वाहऽआग्ग्नावैष्ण्णवाव्वशामैत्त्रावरुण्ण्योन्न्यतऽएन्न्योमै
त्त्र्य÷।।८।। कृष्ण्णग्ग्रीवाऽआग्ग्नेयाः।। कृष्ण्णग्ग्रीवाऽआग्ग्नेयाबब्भ्रव÷सौम्म्याःश्वेताव्वा
यव्व्याऽअविज्ज्ञाताऽअदित्त्यैसरूपाधात्त्रेव्वत्त्सतर्य्योदेवानाम्पत्त्नीब्भ्यः।।९।। कृष्ण्णाभौमाः।।
कृष्ण्णाभौमाधूम्म्राऽआन्तरिक्क्षाबृहन्तोदिव्व्याःशबलाव्वैद्द्युताःसिद्ध्मास्त्तारकाः।।१०।।

(१०–१) धूम्म्रान्वसन्ताय।। धूम्म्रान्वसन्तायालभतेश्श्वेतान्ग्रीष्म्मायकृष्ण्णान्वर्षाब्भ्योरुणा
ञ्छरदेपृषतोहेमन्तायपिशङ्गाञ्छिशिराय।।११।। त्र्यवयोगायत्त्र्यै। पञ्चावयस्त्रिष्टुभेदित्त्यवाहोज
गत्त्यैत्त्रिवत्त्साऽअनुष्टुभेतुर्य्यवाहऽउष्ण्णिहे।।१२।। पष्ठवाहोव्विराजे।। पष्ठवाहोव्विराजऽउक्क्षा
णोबृहत्त्याऽऋषभाꣳककुभेनड्ड्वाह÷पङ्क्क्त्यैधेनवोतिच्छन्दसे।।१३।। कृष्ण्णग्ग्रीवाऽआग्ग्नेयाꣳ।।
कृष्ण्णग्ग्रीवाऽआग्ग्नेयाबब्भ्रव÷सौम्म्याऽउपद्ध्वस्ताꣳसावित्त्राव्वत्त्सतर्य्य÷सारस्वत्त्य÷श्यामाꣳ
पौष्ण्णाꣳपृश्न्नयोमारुताबहुरूपाव्वैश्श्वदेवाव्वशाद्द्यावापृथिवीयाꣳ।।१४।। उक्क्ताꣳसञ्चराꣳ।।
उक्क्ताꣳसञ्चराऽएताऽऐन्द्राग्ग्नाꣳकृष्ण्णाव्वारुणाꣳपृश्न्नयोमारुताꣳकायास्तूपराꣳ।।१५।। अग्ग्नये
नीकवते। प्प्रथमजानालभतेमरुद्ध्य÷सान्तपनेब्भ्य÷सवात्त्यान्मरुद्ध्योगृहमेधिब्भ्योबष्क्किहान्न
मरुद्ध्य÷क्क्रीडिब्भ्य÷सꣳसृष्टान्मरुद्ध्यꣳस्वतवद्ध्योनुसृष्टान् ।।१६।। उक्क्ताꣳसञ्चराꣳ।।
उक्क्ताꣳसञ्चराऽएताऽऐन्द्राग्ग्नाꣳप्प्राशृङ्गामाहेन्द्राबहुरूपाव्वैश्श्वकर्म्मणाꣳ।।१७।। धूम्म्राबब्भ्रुनी
काशाꣳ। पितृणाꣳसोमवताम्बब्भ्रवोधूम्म्रनीकाशाꣳपितृणांबर्हिषदाङ्कृष्ण्णाबब्भ्रुनीकाशाꣳपितृणा

मग्निष्ष्वात्तानाङ्कृष्ष्णाः पृषन्तस्त्रैयम्बकाः ।।१८।। उक्क्ताः सञ्चराः ।। उक्क्ताः सञ्चराऽएताः शुना
सीरीयाः श्वेताव्वायव्व्याः श्वेताः सौर्य्याः ।।१९।। व्वसन्तायकपिञ्जलान् ।। व्वसन्तायकपिञ्ज
लानालभतेग्ग्रीष्म्मायकलविङ्कान्न्वर्षाब्भ्यस्तित्तिरीञ्छरदेव्वर्त्तिकाहेमन्तायककराञ्छशिरायव्वि
ककरान् ।।२०।। (१०-२) समुद्द्रायशिशुमारान् ।। समुद्द्रायशिशुमारानालभतेपर्ज्जन्न्यायमण्डू
कानद्भ्योमत्स्यान्न्मित्त्रायकुलीपयान्न्वरुणायनाक्क्रान् ।।२१।।

सोमायहꣳसान् ।। सोमायहꣳसानालभतेव्वायवेबलाकाऽइन्द्राग्ग्निब्भ्याङ्कुञ्चान्न्मित्त्रायमद्गुन्न्व
रुणायचक्क्रवाकान् ।।२२।। अग्ग्नयेकुटरून् ।। अग्ग्नयेकुटरूनालभतेव्वनस्प्पतिब्भ्यऽउलूका
नग्ग्नीषोमाब्भ्याञ्चाषानश्श्विब्भ्याम्मयूरान्न्मित्त्रावरुणाब्भ्याङ्कपोतान् ।।२३।। सोमायलबान् ।।
सोमायलबानालभतेत्त्वष्ट्रेकौलीकान्न्गोषादीर्द्देवानाम्पत्क्नीब्भ्यः कुलीकादेवजामिब्भ्योग्ग्नयेगृह
पतयेपारुष्ष्णान् ।।२४।। अह्नेपारावतान् ।। अह्नेपारावतानालभतेरात्त्र्यैसीचापूरहोरात्त्रयोः
सन्धिब्भ्योजतूर्म्मासेब्भ्योदात्त्यौहान्त्संवत्त्सरायमहतः सुपर्ण्णान् ।।२५।। भूम्म्याऽआखून् ।। भूम्म्याऽ

आखूनालभतेन्तरिक्षायपाङ्ङ्त्रान्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकानवान्तरदिशाभ्यः॥२६॥

व्वसुभ्यऽऋश्यान्॥ व्वसुभ्यऽऋश्यानालभतेरुद्रेभ्योरुरूनादित्त्येभ्योन्न्यङ्कून्विश्श्वेभ्यो देवेभ्यःपृषतान्त्साद्धयेभ्यःकुलुङ्गान्॥२७॥ ईशानायपरस्वतः॥ ईशानायपरस्वतऽआलभते मित्त्रायगौरान्वरुणायमहिषान्बृहस्पतयेगवयाँस्त्वष्ट्रऽउष्ट्रान्॥२८॥ प्रजापतयेपुरुषान्॥ प्रजापतयेपुरुषान्हस्तिनऽआलभतेव्वाचेप्लुषींश्चचक्षुषेमशकाञ्छ्रोत्त्रायभृङ्गाः॥२९॥

शतम्॥१४००॥ प्रजापतयेच। व्वायवेचगोमृगोव्वरुणायारण्ण्योमेषोयमायकृष्णोमनुष्य राजायमर्कटःशार्दूलायरोहिदृषभायगवयीक्षिप्प्रश्श्येनायव्वर्त्तिकानीलङ्गोःक्क्रिमिःसमुद्द्राय शिशुमारोहिमवतेहस्ती॥३०॥ (१०-३) मयुःप्प्राजापत्त्यः॥ मयुःप्प्राजापत्त्यऽउलोहलिक्ष्णो व्वृषदंशस्त्तेधात्त्रेदिशाङ्कङ्कोधुङ्क्षाग्ग्नेयीकलविङ्कोलोहिताहिःपुष्क्करसादस्त्तेत्त्वाष्ट्राव्वाचेक्क्रुञ्चः ॥३१॥ सोमायकुलुङ्गः॥ सोमायकुलुङ्गऽआरण्ण्योजोनकुलःशकातेपौष्णाःक्क्रोष्टामायोरिन्द्र स्यगौरमृगःपिद्द्वोन्न्यङ्कुःकक्कटस्त्तेनुमत्त्यैप्प्रतिश्श्रुत्त्कायैचक्क्रवाकः॥३२॥ सौरीबलाका।

शार्ग्गःसृजयःशयाण्डकस्तेमैत्राःसरस्वत्यैशारिःपुरुषवाक्क्श्वाविद्भौमीशार्दूलोव्वृकःपृदाकु
स्तेमन्न्यवेसरस्वतेशुकःपुरुषवाक्॥३३॥ सुपर्ण्णःपार्ज्जन्न्यः॥ सुपर्ण्णःपार्ज्जन्न्यऽआतिर्व्वा
हसोदर्व्विदातेव्वायवेबृहस्प्पतयेव्वाचस्प्पतयेपैङ्गराजोलजऽआन्तरिक्क्षःप्प्लवोमद्गुर्म्मत्स्यस्तेनदी
पतयेद्द्यावापृथिवीयःकूर्म्मः॥३४॥ पुरुषमृगश्च्चन्द्रमसः॥ पुरुषमृगश्च्चन्द्रमसोगोधा
कालकादार्व्वाघाटस्तेव्वनस्प्पतीनाङ्कृकवाकुःसावित्रोहंसोव्वातस्यनाक्क्रोमकरःकुलीपयस्तेकू
पारस्यह्रियैशल्ल्यकः॥३५॥ एण्ण्यहन्नः॥ एण्ण्यहन्नोमण्डूकोमूषिकातित्तिरिस्तेसर्प्पाणाँल्लो
पाशऽआश्श्विनःकृष्ण्णोरात्र्याऽऋक्क्षोजतूःसुषिलीकातऽइतरजनानाञ्जहकाव्वैष्ण्णवी॥३६॥
अन्न्यवापोर्द्धमासानाम्॥ अन्न्यवापोर्द्धमासानामृश्श्योमयूरःसुपर्ण्णस्तेगन्धर्व्वाणामपामुद्द्रोमा
साङ्कश्श्यपोरोहित्कुण्डृणाचीगोलत्तिकातेप्सरसाम्मृत्त्यवेसितः॥३७॥ व्वर्षाहूर्ऋतूनाम्॥ व्वर्षाहू
ऋतूनामाखुःकशोमान्थालस्तेपितृणाम्बलायाजगरोव्वसूनाङ्कपिञ्जलःकपोतऽउलूकःशशस्तेनिर्ऋ
त्यैव्वरुणायारण्ण्योमेषः॥३८॥ श्श्वित्रऽआदित्त्यानाम्॥ श्श्वित्रऽआदित्त्यानामुष्ट्रोघृणीवान्वार्ध्री

नसस्तेमत्त्याऽअरण्ण्यायसृमरोरुरूरौद्द्रःक्क्वयिꣳकुटरुर्द्दात्त्यौहस्तेव्वाजिनाङ्कामायपिकः ।।३९।।
खड्ड्गोव्वैश्श्वदेवः। श्वाकृष्ण्णःकण्णोगर्द्दभस्त्तरक्षुस्तेरक्षसामिन्द्रायसूकरःसिꣳहोमारुतः कृकलासःपिप्पकाशकुनिस्तेशरव्व्यायैव्विश्श्वेषान्देवानाम्पृषतः।।४०।। (१०-४) इति श्रीवाजसनेयसंहितायां चतुर्विंशोऽध्यायः।।२४।। श्रीवेदपुरुषाय नमः। अनुवाकसूत्रम्।। शादन्दद्भिर्नवैकैका, हिरण्यगर्भश्च्चतस्र, ऽआनोदश, मानोमित्त्रो, यदश्श्वस्याष्टकौ, यत्तेषडि, मानुकंद्वे, पञ्चदशसप्तचत्वारिꣳशत्।। (अ. २५ मं. ४७ अनु. १५) हरिः ॐ।।
शादन्दद्भिः।। शादन्दद्भिरवकान्दन्तमूलैर्म्मृदम्बस्वैस्तेगान्दꣳष्ट्राब्भ्याꣳसरस्वत्त्याऽअग्रजिह्व्वञ्जिह्व्वायाऽउत्त्सादमवक्क्रन्देनतालुव्वाजꣳहनुब्भ्यामपऽआस्येनव्वृषणमाण्डाब्भ्यामादित्त्याँश्श्मश्श्रुभिःपन्थानम्भ्रूब्भ्यान्द्यावापृथिवीव्वर्तोब्भ्याव्विद्द्युतङ्कनीनकाब्भ्याꣳशुक्क्लायस्वाहाकृष्ण्णायस्वाहापार्य्याणिपक्ष्माण्ण्यवार्य्याऽइक्षवोवार्य्याणिपक्ष्माणिपार्य्याऽइक्षवꣳ।।१।।(१-१)
व्वातम्प्राणेन।। व्वातम्प्राणेनापानेननासिकेऽउपयाममधरेणौष्ठेनसदुत्तरेणप्प्रकाशेनान्तरमनूका

शेनबाह्वन्निवेष्प्पम्मूद्ध्र्नास्त्तनयित्क्नुन्निर्ब्बाधेनाशनिम्मस्त्तिष्क्केणव्विद्द्युतङ्कनीनकाब्भ्याङ्कण्णौ

ब्भ्याꣳश्रोत्रꣳश्रोत्त्राब्भ्याङ्कण्णौतेदनीमधरकण्ठेनापःशुष्क्ककण्ठेनचित्तम्मन्न्याभिरदितिःशी

ष्ष्णानिर्ऋर्तिन्निर्ज्जर्ज्जल्ल्येनशीष्ष्णासङ्क्रोशैःप्प्राणान्न्रेष्म्माणꣳस्त्तुपेन॥२॥ (१-२)

मशकान्केशैः॥ मशकान्केशैरिन्द्रꣳस्वपसाव्वहेनबृहस्प्पतिःशकुनिसादेनकूम्र्माञ्छफैराक्क्रमणꣳ

स्त्थूराब्भ्यामृक्क्षलाभिःकपिञ्जलाञ्जवञ्जङ्घाब्भ्यामद्ध्वानम्बाहुब्भ्याञ्जाम्बीलेनारण्ण्यमग्ग्नि

मतिरुग्ग्भ्याम्पूषणन्दोब्भ्र्यामश्श्विनावꣳसाब्भ्याꣳरुद्द्रꣳरोराब्भ्याम्॥३॥ (१-३) अग्ग्नेः

पक्क्षतिः॥ अग्ग्नेःपक्क्षतिर्व्वायोर्न्निपक्क्षतिरिन्द्रस्यतृतीयासोमस्यचतुत्थ्र्यदित्त्यैपञ्चमीन्द्राण्ण्यै

षष्ठीमरुताꣳसप्प्तमीबृहस्प्पतेरष्ट्टम्म्यर्य्यम्म्णोनवमीधातुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्यद्द्वादशीयम

स्यत्त्रयोदशी॥४॥ (१-४) इन्द्राग्ग्न्योःपक्क्षतिः। सरस्वत्त्यैनिपक्क्षतिर्म्मित्त्रस्यतृतीयापाञ्च

तुत्थीर्निर्ऋत्त्यैपञ्चम्म्युग्ग्नीषोमयोःषष्ठीसर्प्पाणाꣳसप्प्तमीव्विष्ण्णोरष्ट्टमीपूष्ण्णोनवमीत्त्वष्ट्टुर्द्दश

मीन्द्रस्यैकादशीव्वरुणस्यद्द्वादशीयम्म्यैत्त्रयोदशीद्द्यावापृथिव्व्योर्द्दक्षिणम्पाश्श्र्वव्विश्श्वेषान्देवा

नामुत्तरम्।।५।। (१–५) मरुताᳫँस्कन्धाः। मरुताᳫँस्कन्धाव्विश्श्वेषान्देवानाम्प्रथमाकीक

सारुद्द्राणान्द्वितीयादित्त्यानान्तृतीयाव्वायोःपुच्छमग्ग्नीषोमयोर्ब्भासदौक्क्रुञ्चौश्श्रोणिब्भ्यामिन्द्रा

बृहस्प्पतीऽऊरुब्भ्याम्मित्त्रावरुणावल्ग्गाब्भ्यामाक्क्रमणᳫँस्थूराब्भ्याम्बलङ्कुष्ठाब्भ्याम्।।६।।

(१–६) पूषणंव्वनिष्ठुना। न्धाहीन्त्स्थूलगुदयासर्प्पान्गुदाभिर्व्विह्रुतऽआन्त्त्रैरपोव्वस्त्तिनाव्वृषण

माण्डाब्भ्यांव्वाजिनᳫँशेपेनप्प्रजाᳫँरेतसाचाषान्पित्तेनप्प्रदरान्पायुनाकूश्म्माञ्छकपिण्डैः।।७।।

(१–७) इन्द्रस्यक्क्रोडः। इन्द्रस्यक्क्रोडोदित्त्यैपाजस्यन्दिशाञ्जत्त्रवोदित्त्यैभसज्जीमूतान्हृदयौ

पशेनान्तरिक्षम्पुरीततानभऽउदर्य्येणचक्क्रवाकौमतस्न्नाब्भ्यान्दिवंव्वृक्काब्भ्याङ्गिरीन्प्लाशिभि

रुपलान्प्लीह्न्नाव्वल्म्मीकान्क्लोमभिग्ग्लौभिर्गुल्म्मान्हिराभिᳫँस्रवन्तीर्ह्रदान्कुक्षिब्भ्याᳫँस

मुद्द्रमुदरेणव्वैश्श्वानरम्भस्म्मना।।८।। (१–८) व्विधृतिन्नाब्भ्या। घृतᳫँरसेनापोयूष्णामरीचि

र्व्विप्प्रुड्भिर्न्नीहारमूष्म्मणाशीनंव्वसयाप्प्रुष्वाऽअश्श्रुभिर्ह्रादुनीर्द्दूषीकाभिरस्न्नारक्षाᳫँसिचि

त्त्राण्यङ्गैर्न्नक्षत्त्राणिरूपेणपृथिवीन्त्वचाजुम्बकायस्वाहा।।९।। (१–९) हिरण्ण्यगर्ब्भःसम्।।

हिरण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत्।। सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मै देवा
यहविषाव्विधेम।।१०।। यः प्प्राणतः।। यः प्प्राणतोनिमिषतोमहित्त्वैकऽइद्द्राजाजगतोबभूव।।
यऽईशेऽअस्यद्द्विपदश्च्चतुष्प्पदःकस्म्मै देवायहविषाव्विधेम।।११।। यस्येमे। हिमवन्तोमहित्त्वा
यस्यसमुद्द्रᳬरसयासहाहुः।। यस्येमाः प्प्रदिशोयस्यबाहूकस्म्मै देवायहविषाव्विधेम।।१२।।
यऽआत्त्मदाः।। यऽआत्त्मदाबलदायस्यव्विश्श्वऽउपासतेप्प्रशिषँय्यस्यदेवाः।। यस्यछाया
मृतँय्यस्यमृत्त्युःकस्म्मै देवायहविषाव्विधेम।।१३।। (४-१०) आनः।। आनोभद्द्राः क्क्रतवोयन्तु
व्विश्श्वतोदब्धासोऽपरीतासऽउद्भिदः।। देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवे
दिवे।।१४।। देवानाम्भद्द्राः।। देवानाम्भद्द्रासुमतिर्ऋजूयतान्देवानाᳪरातिरभिनोनिवर्त्तताम्।।
देवानाᳪसक्ख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्रतिरन्तुजीवसे।।१५।। तान्पूर्व्वया। निविदाहूमहे
व्वयम्भगम्मित्त्रमदितिन्दक्षमस्रिधम्।। अर्य्यमणंव्वरुणᳬसोममश्श्विनासरस्वतीनःसुभगामय
स्क्करत्।।१६।। तन्नः।। तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्त्पितादद्यौः।। तदद्ग्रा

वाणसोमसुतोमयोभुवस्त्तदश्शिवनाशृणुतन्धिष्ण्ण्यायुवम्।।१७।। तमीशानम्।। तमीशान
ञ्जगतस्त्तस्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम्।। पूषानोयथाव्वेदसामसद्वृधेरक्क्षितापायु
रदब्धस्वस्त्तये।।१८।। स्वस्त्तिनः।। स्वस्त्तिनऽइन्द्रोव्वृद्धश्श्रवास्वस्त्तिनःपूषाव्विश्श्ववेदाः।।
स्वस्त्तिनस्ताक्क्ष्योऽअरिष्ट्टनेमिस्वस्त्तिनोबृहस्प्पतिर्द्दधातु।।१९।। पृषदश्श्वामरुतः।। पृषदश्श्वा
मरुतपृश्निमातरशुभँय्यावानोव्विदथेषुजग्ग्मयः।। अग्ग्निजिह्व्वामनवसूरचक्क्षसोव्विश्श्वेनो
देवाऽअवसागमन्निह।।२०।। भद्द्रङ्कर्ण्णेभिः। शृणुयामदेवाभद्द्रम्प्पश्श्येमाक्क्षभिर्य्यजत्त्राः।।
स्थिरैरङ्गैस्त्तुष्ट्टुवाᳬसस्त्तनूभिर्व्व्यशेमहिदेवहितँय्यदायुः।।२१।। शतमित्।। शतमिन्नुशरदोऽअन्ति
देवायत्त्रानश्च्चक्क्राजरसन्तनूनाम्।। पुत्त्रासोयत्त्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्ग्गन्तोः।।२२।।
अदितिर्द्द्यौः।। अदितिर्द्द्यौरदितिरन्तरिक्क्षमदितिर्म्मातासपितासपुत्त्रः।। व्विश्श्वेदेवाऽअदितिः
पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम्।।२३।। (१०-११) मानः।। मानोमित्त्रोव्वरुणोऽअर्य्यमायु
रिन्द्रऽऋभुक्क्षामरुतपरिक्ख्यन्।। यद्वाजिनोदेवजातस्यसप्प्तेःप्प्रवक्क्ष्यामोव्विदथेव्वीर्य्याणि

।।२४।। यन्निर्णिजा।। यन्निर्णिजारेवक्णसाप्प्रावृतस्यरातिङ्गृभीताम्मुखतोनयन्ति।। सुप्प्राङ्
जोमेम्म्यद्दि्वश्श्वरूपऽइन्द्रापूष्णणोः प्प्रियमप्प्येतिपाथः।।२५।। एषच्छागः। पुरोऽअश्श्वेन
व्वाजिनापूष्णणोभागोनीयतेव्विश्श्वदेव्व्यः।। अभिप्प्रियँय्यत्त्पुरोडाशमर्व्वतात्त्वष्ट्टेदेनꣳसौश्श्रव
सायजिन्न्वति।।२६।। यद्धविष्ष्यम्।। यद्धविष्ष्यमृतुशोदेवयानन्त्रिर्म्मानुषाः पर्य्यश्श्वन्नयन्ति।।
अत्त्रापूष्णणः प्प्रथमोभागऽएतियज्ज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः।।२७।। होताद्ध्वर्य्युः।। होताद्ध्व
र्य्युरावयाऽअग्ग्निमिन्धोग्ग्रावग्ग्राभऽउतशꣳस्तासुविप्प्रः।। तेनयज्ज्ञेनस्वरङ्कृतेनस्विष्ट्टेनव्वक्षणा
ऽआपृणद्ध्वम्।।२८।। यूपव्व्रस्क्काऽउत। येयूपवाहाश्च्चषालँय्येऽअश्श्वयूपायतक्क्षति।।
येचार्व्वतेपचनꣳसम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइन्न्वतु।।२९।। उपप्प्र।। उपप्प्रागात्त्सुमन्न्मेधायि
मन्न्मदेवानामाशाऽउपवीतपृष्ठः।। अन्न्वेनंव्विप्प्राऽऋषयोमदन्तिदेवानाम्पुष्ठेचकृमासुबन्धुम्
।।३०।। यद्द्वाजिनः।। यद्द्वाजिनोदामसन्दानमर्व्वतोयाशीर्षण्ण्यारशनारज्जुरस्य।। यद्द्वाघास्य
प्प्रभृतमास्स्येतृणꣳसर्व्वातातेऽअपिदेवेष्ष्वस्त्तु।।३१।। (८-१२) यदश्श्वस्य। क्क्रविषोमक्क्षिका

शयद्द्वास्वरौस्वधितौरिप्प्तमस्त्ति।। यद्धस्त्तयोऽशमितुर्य्यन्नखेषुसर्व्वातातेऽअपिदेवेष्ष्वस्तु।।३२।।
यदूवंद्ध्यम्।। यदूवंद्ध्यमुदरस्यापवातियऽआमस्यंक्क्रविषोगन्धोऽअस्त्ति।। सुकृतातच्छमितारः
कृण्ण्वन्तूनमधः शृतपाकम्पचन्तु।।३३।। यत्ते।। यत्तेगात्त्रादग्ग्निनापच्च्यमानादभिशूलन्निहत
स्यावधावति।। मातद्भूम्म्यामाश्श्रिषन्मातृणेषुदेवेब्भ्यस्त्तदुशद्ध्योरातमस्तु।।३४।। येव्वा
जिनम्।। येव्वाजिनम्परिपश्श्यन्तिपक्क्वँय्यऽईमाहुःसुरभिर्न्निर्हरेति।। येचार्व्वतोमाᳶसभिक्क्षा
मुपासतऽउतोतेषामभिगूर्त्तिर्न्नऽइन्न्वतु।।३५।। यन्नीक्क्षणम्।। यन्नीक्क्षणम्माँस्प्पचन्न्याऽउखा
यायापात्त्राणियूष्ण्णऽआसेचनानि।। उष्म्मण्ण्यापिधानाचरूणामङ्काःसूनाःपरिभूषन्त्यश्श्वम्
।।३६।। मात्त्वा।। मात्त्वाग्ग्निद्ध्वनयीद्धूमगन्धिम्मोखाब्भ्राजन्त्यभिविक्क्तजग्घ्रिः।।
इष्ट्टंव्वीतमभिगूर्त्तंव्वषट्कृतन्तन्देवासःप्प्रतिगृब्भ्णन्त्यश्श्वम्।।३७।। निक्क्रमणन्निषदनम्।।
निक्क्रमणन्निषदनंव्विवर्त्तनँय्यच्चपड्ड्वीशमर्व्वतः।। यच्चपपौयच्चघासिञ्जघाससर्व्वातातेऽ
अपिदेवेष्ष्वस्तु।।३८।। यदश्श्वाय।। यदश्श्वायव्वासऽउपस्तृणन्त्यधीवासँय्याहिरण्ण्यान्न्यस्म्मै।।

सन्दानमर्व्वन्तम्पड्ड्वीशम्प्रियादेवेष्वायामयन्ति।।३९।। (८-१२) यत्ते। सादेमहंसाशूकृंतस्य
पार्ष्ण्यांव्वाकशंयाव्वातुतादं।। स्रुचेवताहविषोऽअद्ध्वरेषुसर्व्वातातेब्ब्रह्म्मणासूदयामि।।४०।।
चतुस्त्रिंशद्द्वाजिनं।। चतुस्त्रिंशद्द्वाजिनोदेवबन्धोर्व्वङ्क्रीरश्श्वस्यस्वधितिःसमेति।।
अच्छिद्द्रागात्त्रांव्वयुनाकृणोतपरुष्प्परुरनुघुष्याव्विशस्त।।४१।। एकस्त्वष्टुः।। एकस्त्वष्ट्टु
रश्श्वस्याव्विशस्त्ताद्द्वायन्तारांभवतस्त्तथऽऋतुः।। यातेगात्त्राणामृतुथाकृणोमितातापिण्डाना
म्प्रजुहोम्म्यग्ग्नौ।।४२।। मात्त्वा। तपत्त्प्रियऽआत्क्मापियन्तम्मास्वधितिस्त्तन्न्वऽआतिष्ठिपत्ते।।
मातेगृध्नुरविशस्त्तातिहायछिद्द्रागात्त्राण्ण्यसिनामिथूकः।।४३।। नवै।। नवाऽउऽएतन्न्म्रियसेन
रिष्ष्यसिदेवाँ२।। ऽइदेषिपथिभिःसुगेभिः।। हरीतेयुञ्जापृषतीऽअभूतामुपास्त्थाद्द्वाजीधुरिरास
भस्य।।४४।। सुगव्व्यन्नः।। सुगव्व्यन्नोव्वाजीस्वश्श्व्यम्पुंसः पुत्त्राँ२।। ऽउतविंश्श्वापुषं
रयिम्।। अनागास्त्वन्नोऽअदितिःकृणोतुक्क्षत्त्रन्नोऽअश्श्वोवनताᳬहविष्म्मान्।।४५।। (६-१३)
इमानु। कम्भुवनासीषधामेन्द्रश्च्चव्विश्श्वेचदेवाः।। आदित्त्यैरिन्द्रःसगणोमरुद्द्भिरस्म्मब्भ्यम्भेष

जाकरत्।। यज्ज्ञञ्चनस्त्तन्न्वञ्चप्प्रजाञ्चादित्त्यैरिन्द्र÷सहसीषधाति।।४६।। अग्ग्नेत्त्वम्।। अग्ग्नेत्त्वन्नो ऽअन्तमऽउतत्रातशिवोभवाव्वरूत्थ्य÷।। व्वसुरग्ग्निर्व्वसुश्श्रवाऽअच्छानक्षिद्द्युमत्तमꣳरयिन्दाꣳ।। तन्त्वाशोचिष्ठुदीदिवꣳसुम्म्नायनूनमीमहेसखिब्भ्यꣳ।।४७।। (२–१४) इतिश्रीवाजसनेय संहितायां पञ्चविंशोऽध्यायः।।२५।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। अग्निश्च्चपंचदशो, च्चातऽएकादश, द्वौ षड्विꣳशतिः (अ. २६ मं. २६ अनु. २)।। हरिः ॐ।।

अग्ग्निश्च्च। पृथिवीचसन्नतेतेमेसन्नमतामदोव्वायुश्च्चान्तरिक्षञ्चसन्नतेतेमेसन्नमतामदऽआदित्त्यश्च्चद्द्यौश्च्चसन्नतेतेमेसन्नमतामदऽआपश्च्चव्वरुणश्च्चसन्नतेतेमेसन्नमतामदः।। सप्प्तसꣳसदोऽअष्ट्टमीभूतसाधनी।। सकामाँ२।।ऽअद्ध्वनस्क्कुरुसँज्ज्ञानमस्त्तुमेमुना।।१।। यथेमाम्।। यथेमांव्वाचङ्कल्ल्याणीमावदानिजनेब्भ्यꣳ।। ब्ब्रह्म्मराजन्न्याब्भ्याꣳशूद्द्रायचार्य्यायचस्वायचारणायच।। प्रियोदेवानान्दक्क्षिणायैदातुरिहभूयासमयम्मेकामꣳसमृद्ध्यतामुपमादोनमतु।।२।। बृहस्प्पतेऽअति।। बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु।। यद्दीदयच्छवसऽ

ऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम्।। उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा
।।३।। इन्द्रगोमन्।। इन्द्रगोमन्निहायाहिपिबासोमꣳशतक्क्रतो।। व्विद्द्यद्द्भिग्ग्रावभिꣳसुतम्।।
उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषतेयोनिरिन्द्रायत्त्वागोमते।।४।। इन्द्रायाहि।। इन्द्रायाहिव्वृत्र
हन्न्पिबासोमꣳशतक्क्रतो।। गोमद्द्भिग्ग्रावभिꣳसुतम्।। उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषते
योनिरिन्द्रायत्त्वागोमते।।५।। ऋतावानंव्वैश्श्वानरम्।। ऋतावानंव्वैश्श्वानरमृतस्यज्ज्योतिष
स्प्पतिम्।। अजस्स्रङ्घर्म्ममीमहे।। उपयामगृहीतोसिव्वैश्श्वानरायत्त्वैषतेयोनिव्वैश्श्वानरायत्त्वा
।।६।। व्वैश्श्वानरस्यसुमतौ। स्यामराजाहिकम्भुवनानामभिश्श्रीः।। इतोजातोव्विश्श्वमिदं
व्विचष्ट्टेव्वैश्श्वानरोयततेसूर्य्येण।। उपयामगृहीतोसिव्वैश्श्वानरायत्त्वैषतेयोनिर्वैश्श्वानरायत्त्वा
।।७।। व्वैश्श्वानरोनः।। व्वैश्श्वानरोनऽऊतयऽआप्प्रयातुपरावतः।। अग्ग्निरुक्क्थेनव्वाहसा।।
उपयामगृहीतोसिव्वैश्श्वानरायत्त्वैषतेयोनिव्वैश्श्वानरायत्त्वा।।८।। अग्ग्निर्ऋषिः।। अग्ग्निर्ऋषिꣳ
पवमानꣳपाञ्चजन्न्यꣳपुरोहितꣳ।। तमीमहेमहागयम्।। उपयामगृहीतोस्यग्ग्नयेत्त्वाव्वर्च्चसऽएष

तेयोनिरग्ग्नयेत्त्वाव्वर्च्चसे।।९।। महाँ२।।ऽइन्द्रः।। महाँ२।।ऽइन्द्रोव्वज्ज्रहस्तःषोडशीशर्म्मयच्छतु
।। हन्तुपाप्प्मानँय्योस्म्मान्द्द्वेष्ट्टि।। उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा।।१०।।
तंव्वः।। तंव्वोदस्म्ममृतीषहंव्वसोर्म्मन्दानमन्धसः।। अभिवत्त्सन्नस्वसरेषुधेनवऽइन्द्रङ्गीर्ब्भिर्न्नवा
महे।।११।। यद्द्वाहिष्ठ्ठुम्।। यद्द्वाहिष्ठ्ठुन्तदग्ग्नयेबृहदर्च्चव्विभावसो।। महिषीवत्त्वद्द्रयिस्त्त्व
द्द्वाजाऽउदीरते।।१२।। एहि।। एह्यूषुब्ब्रवाणितेग्ग्नऽइत्त्थेतरागिरः।। एभिर्व्वर्द्धासऽइन्दुभिः
।।१३।। ऋतवस्त्ते।। ऋतवस्त्तेयज्ज्ञंव्वितन्न्वन्तुमासारक्क्षन्तुतेहविः।। संव्वत्त्सरस्तेयज्ज्ञन्दधातुनः
प्प्रजाञ्च्चपरिपातुनः।।१४।। उपह्व्वरेगिरीणाम्।। उपह्व्वरेगिरीणाᳬसङ्गमेचनदीनाम्।। धियाव्वि
प्प्रोऽअजायत।।१५।। (१५-१) उच्चाते।। उच्चातेजातमन्धसोदिविसद्द्भूम्म्याददे।। उग्ग्रᳬशर्म्म
महिश्श्रवः।।१६।। सनः।। सनऽइन्द्राययज्ज्यवेव्वरुणायमरुद्द्भ्यः।। व्वरिवोवित्त्परिस्स्रव।।१७।।
एनाव्विश्श्वानि।। एनाव्विश्श्वान्न्यर्य्यऽआद्द्युम्म्नानिमानुषाणाम्।। सिषासन्तोव्वनामहे।।१८।।
अनुवीरैः।। अनुवीरैरनुपुष्ष्यास्म्मगोभिरन्न्वश्श्वैरनुसर्व्वैणपुष्ट्टैः।। अनुद्द्विपदानुचतुष्प्पदाव्वयन्दे

वानोयज्ञमृतुथानयन्तु।।१९।। अग्ग्नेपत्क्नीः।। अग्ग्नेपत्क्नीरिहावहदेवानामुशतीरुप।। त्वष्ट्टारꣳ सोमपीतये।।२०।। अभियज्ञम्।। अभियज्ञङ्गृणीहिनोग्ग्नावोनेष्ट्टःपिबऽऋतुना।। त्वꣳहिरत्क्नधा ऽअसि।।२१।। द्रविणोदाꣳपिपीषति।। जुहोतप्प्रचतिष्ठ्ठत।। नेष्ट्ट्राद्दृतुभिरिष्ष्यत।।२२।।
तवायम्।। तवायꣳसोमस्त्वमेह्यर्व्वाङ्शश्श्वत्तमꣳसुमनाऽअस्यपाहि।। अस्म्मिन्न्यज्ज्ञेबर्हिष्ष्या निषद्द्यादधिष्ष्वेमञ्जठरऽइन्दुमिन्द्र।।२३।। अमेवनः।। अमेवनःसुहवाऽआहिगन्तननिबर्हिषिसदत नारणिष्ट्टन।। अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्टृर्द्देवेभिर्ज्जनिभिःसुमद्द्गणः।।२४।। स्वादिष्ठ्ठ यामदिष्ठ्ठया।। स्वादिष्ठ्ठयामदिष्ठ्ठयापवस्वसोमधारया।। इन्द्रायपातवेसुतः।।२५।। रक्क्षोहा व्विश्श्वचर्षणिरभियोनिमयोहते।। द्रोणेसधस्त्थमासदत्।।२६।। (११-२)।।२।। इति श्रीवाजसनेयसंहितायां षड्विंशतितमोऽध्यायः।।२६।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। समास्त्वादशो, र्द्धाऽअस्य, पीवोऽअन्नाद्द्वादशका, वभित्त्वैकादश, चत्त्वारः पंचचत्त्वारिꣳशत् (अ. २७ मं. ४५ अनु. ४)।। हरिः ॐ।। समास्त्वा।।

समास्त्वाग्नऽऋतवोव्वर्द्धयन्तुसंव्वत्सराऽऋषयोयानिसत्त्या।। सन्दिव्व्येनदीदिहिरोचनेनव्विश्श्वाऽआभाहिप्प्रदिशश्च्चतस्स्रः।।१।। सञ्चं।। सञ्चेद्ध्यस्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय। माचरिषदुपसत्तातेऽअग्ग्नेब्ब्रह्म्माणस्त्तेयशसःसन्तुमान्न्ये।।२।। त्वामग्ग्ने।। त्वामग्ग्नेव्वृणतेब्ब्राह्म्मणाऽइमेशिवोऽअग्ग्नेसंव्वरणेभवानः।। सपत्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन्।।३।। इहैव।। इहैवाग्ग्नेऽअधिधारयारयिम्मात्त्वानिक्क्रन्न्पूर्व्वं चितोनिकारिणः।। क्षत्रमग्ग्नेसुयममस्तुतुब्भ्यमुपसत्ताव्वर्द्धतान्तेअनिष्ष्टृतः।।४।। क्षत्रेणाग्ग्ने।। क्षत्रेणाग्ग्नेस्वायुःसꣳरभस्वमित्त्रेणाग्ग्नेमित्त्रधेयेयतस्व।। सजातानाम्मद्ध्यमस्त्थाऽएधिराज्ज्ञामग्ग्नेव्विहव्व्योदीदिहीह।।५।। अतिनिहः।। अतिनिहोऽअतिस्स्रिधोत्त्यचित्तिमत्त्यरातिमग्ग्ने।। व्विश्श्वाह्यग्ग्नेदुरितासहस्वाथास्म्मब्भ्यꣳसहवीराꣳरयिन्दाः।।६।। अनाधृष्ष्योजातवेदाः।। अनाधृष्ष्योजातवेदाऽअनिष्ट्टृतोव्विराडग्ग्नेक्क्षत्रभृद्दीदिहीह।। व्विश्श्वाऽआशाःप्प्रमुञ्चन्न्मानुषीभिर्यःशिवेभिरद्द्यपरिपाहिनोव्वृधे।।७।। बृहस्प्पतेसवितः।। बृहस्प्पतेसवितब्बोधयैनꣳसꣳशितञ्चित्त्सन्तराꣳ

सहशिशाधि।। व्वर्द्धयैनम्महतेसौभगायव्विश्श्वऽएनमनुमदन्तुदेवाः।।८।। अमुत्त्रभूयादध।।
अमुत्त्रभूयादधयद्द्यमस्यबृहस्प्पतेऽअभिशस्त्तेरमुञ्चः।। प्रत्यौहतामश्शिवनामृत्त्युमस्म्माद्देवानां
मग्गनेभिषजाशचीभिः।।९।। उद्द्वयम् ।। उद्द्वयन्तमसस्प्परिस्वः पश्श्यन्तऽउत्तरम् ।। देवन्देवत्त्रा
सूर्य्यमगन्म्मज्ज्योतिरुत्तमम्।।१०।। (१०-१) ऊद्ध्र्वाऽअस्य समिधोभवन्त्यूद्ध्र्वाशुक्क्राशोची
ष्यग्ग्नेः।। द्युमत्तमासुप्प्रतीकस्यसूनोः।।११।। तनूनपादसुरः।। तनूनपादसुरोव्विश्श्ववेदादेवोदेवे
षुदेवः।। पथोऽअनक्क्तुमद्ध्वाघृतेन।।१२।। मद्ध्वायज्ज्ञम्।। मद्ध्वायज्ञन्नक्षसेप्प्रीणानोन
राशसोऽअग्ग्ने।। सुकृद्देवः सविताव्विश्श्ववारः।।१३।। अच्छायम् ।। अच्छायमेतिशवसाघृतेने
डानोव्वन्हिर्न्नमसा।। अग्निसुचोऽअद्ध्वरेषुप्प्रयत्त्सु।।१४।। सयक्क्षत्।। सयक्क्षदस्यमहिमान
मग्ग्नेः सऽईम्मन्द्रासुप्प्रयसः।। व्वसुश्च्चेतिष्ठोव्वसुधातमश्च्च ।।१५।। द्वारोदेवीः।। द्वारोदेवी
रन्न्वस्यव्विश्श्वेव्व्रतादन्तेऽअग्ग्नेः।। उरुव्व्यचसोधाम्म्नापत्त्यमानाः।।१६।। शतम् १६००।।
तेऽअस्य।। तेऽअस्ययोषणेदिव्व्येनयोनाऽउषासानक्क्ता।। इमँय्यज्ज्ञमवतामद्ध्वरन्नः।।१७।।

दैव्व्याहोतारा।। दैव्व्याहोताराऽऊर्द्ध्वमद्ध्वरन्नोग्ग्नेर्ज्जिह्व्वामभिगृणीतम्।। कृणुतन्नःस्विष्ट्टिम्
।।१८।। तिस्रोदेवीः।। तिस्रोदेवीर्ब्बर्हिरेदᳪसदन्त्विडासरस्वतीभारती।। महीगृणाना।।१९।।
तन्नः।। तन्नस्तुरीपमद्ध्रुतम्पुरुक्षुत्त्वष्ट्टासुवीर्य्यम्।। रायस्प्पोषंव्विष्ष्यतुनाभिमस्म्मे।।२०।।
व्वनस्प्पतेव।। व्वनस्प्पतेवसृजाररराणस्त्मनादेवेषु।। अग्निर्हव्व्यᳪशमितासूदयाति।।२१।। अग्ग्ने
स्वाहा।। कृणुहिजातवेदऽइन्द्रायहव्व्यम्।। व्विश्श्वेदेवाहविरिदञ्जुषन्ताम्।।२२।। (१२–२)
पीवोऽअन्नारयिवृधः। सुमेधाःश्वेतःसिषक्क्तिनियुतामभिश्श्रीः ।। तेव्वायवेसमनसोव्वित
स्त्थुव्विश्श्वेन्नरःस्वपत्त्यानिचक्व्रुः।।२३।। रायेनु। यञ्जज्ज्ञतूरोद सीमेरायेदेवीधिषणा
धातिदेवम्।। अधव्वायुन्नियुतःसश्च्चतस्वाऽउतश्श्वेतंव्वसुधितिन्निरेके ।।२४।। आपोह।।
आपोहयद्ध्रुहतीर्व्विश्श्वमायन्गार्भन्दधानाजनयन्तीरग्निम्।। ततोदेवानाᳪसमवर्त्ततासुरेकः
कस्म्मैदेवायहविषाव्विधेम।।२५।। यश्चिच्चत्।। यश्चिच्चदापोमहिनापर्य्यपश्श्यद्दक्क्षन्दधानाजनय
तीर्य्यज्ज्ञम्।। योदेवेष्ष्वधिदेवऽएकऽआसीत्त्कस्म्मैदेवायहविषाव्विधेम।।२६।।

प्रयाभिः।। प्रयाभिर्य्यासिदाश्श्वाᳬसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे।। निनोरयिᳩसुभोज

सँय्युवस्वनिवीरङ्गव्यमश्श्वयञ्चराधः।।२७।। आनः।। आनोनियुद्भिःशतिनीभिरध्वरᳩ

सहस्रिणीभिरुपयाहियज्ञम्।। व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिᳩसदानᳩ

।।२८।। नियुत्त्वान्वायो।। नियुत्त्वान्वायवागह्ययᳩशुक्क्रोऽअयामिते।। गन्तासिसुन्वतोगृहम्

।।२९।। व्वायोशुक्क्रः।। व्वयोशुक्क्रोऽअयामितेमद्धोऽअग्ग्रन्दिविष्टिषु।। आयाहिसोमपीतये

स्प्पार्होदेवनियुत्त्वता।।३०।। व्वायुरग्ग्रेगाः।। व्वायुरग्ग्रेगायज्ञप्प्रीःसाकङ्गन्मनसायज्ञम्।।

शिवोनियुद्भिःशिवाभिः।।३१।। व्वायोये। तेसहस्रिणोरथासस्त्तेभिरागहि।। नियुत्त्वान्त्सोम

पीतये।।३२।। एकयाच। दशभिश्च्चस्वभूतेद्वाब्भ्यामिष्टयेव्विᳩशतीच।। तिसृभिश्च्च

व्वहसेत्त्रिᳩशताचनियुद्भिर्व्वायविहताव्विमुञ्च।।३३।। तवव्वायो।। तवव्वायवृतस्प्पतेत्त्वष्टुर्ज्जा

मातरद्द्भुत।। अवाᳬस्यावृणीमहे।।३४।। (१२–३) अभित्त्वा। शूरनोनुमोदुग्ग्धाऽइवधेनवः।।

ईशानमस्यजगतᳩस्वर्द्दृशमीशानमिन्द्रतस्त्थुषः।।३५।। नन्न्वावान्।। नन्न्वावाँ२।।ऽअन्न्योदि

व्व्योनपार्त्थिवोनजातोनजनिष्ष्यते।। अश्श्वायन्तोमघवन्न्निन्द्रव्वाजिनोगव्व्यन्तस्त्वाहवामहे ।।३६।। त्वामित्।। त्वामिद्धिहवामहेसातौव्वाजस्यकारवः।। त्वांव्वृत्रेष्ष्विन्द्रसत्त्पतिन्नरस्त्वाङ्का ष्ठास्वर्व्वतः।।३७।। सत्त्वम्।। सत्त्वन्नश्चिच्चित्रव्वज्ज्रहस्तधृष्ष्णुयामहस्त्तवानोऽअद्रिवः।। गामश्श्वंरत्थ्यमिन्द्रसङ्किरसत्राव्वाजन्नजिग्ग्युषे।।३८।। कयानः।। कयानश्चिच्चत्रऽआभुवदूती सदावृधःसखा।। कयाशचिष्ष्ठयाव्वृता।।३९।। कस्त्वा। सत्त्योमदानाम्मंहिष्ष्ठोमत्त्सदन्धसः।। दृढाचिदारुजेव्वसु।।४०।। अभीषुणः।। अभीषुणःसखीनामविताजरितॄणाम्।। शतम्भवास्यूतये ।।४१।। यज्ज्ञायज्ज्ञावः।। यज्ज्ञायज्ज्ञावोऽअग्ग्नयेगिरागिराचदक्क्षसे।। प्रप्प्रवयममृतञ्ज्जातवेद सम्प्रियम्मित्रन्नशंसिषम्।।४२।। पाहिनः।। पाहिनोऽअग्ग्नऽएकयापाह्युतद्द्वितीयया।। पाहिगी र्भिस्तिसृभिरूर्ज्जाम्पतेपाहिचतसृभिर्व्वसो।।४३।। ऊर्ज्जोनपातम्।। ऊर्ज्जोनपातंसहिनायमस्म्म युर्दाशेमहव्व्यदातये।। भुवद्द्वाजेष्ष्वविताभुवद्वृधऽउतत्त्रातातनूनाम्।।४४।। संव्वत्त्सरोसि। परिवत्त्सरोसीदावत्त्सरोसीद्द्वत्त्सरोसिव्वत्त्सरोसि।। उषसस्त्तेकल्प्पन्तामहोरात्त्रास्त्तेकल्प्पन्तामर्द्ध

मासास्त्तेकल्प्पन्ताम्मासास्त्तेकल्प्पन्तामृतवस्त्तेकल्प्पन्ता७संव्वत्त्सरस्त्तेकल्प्पताम्।। प्रेत्त्याऽएत्त्यै सञ्चाञ्चप्प्रचसारय।। सुपर्ण्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवः सीद।।४५।। (११–४)

इति श्रीवाजसनेयसंहितायां सप्तविꣳशोऽध्यायः।।२७।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। होतायक्षदेकादश, देवंबर्हिर्द्वादश, पुनरप्येवं, चत्त्वारः षट्चत्त्वारिꣳशत् (अ. २८ मं. ४६ अनु. ४)

हरिः ॐ।।

होतायक्क्षत्।। होतायक्क्षत्त्समिधेन्द्रमिडस्प्पदेनाभापृथिव्व्याऽअधि।। दिवोव्वर्ष्मन्त्समिद्ध्यत ऽओजिष्ठुश्च्चर्षणीसहांव्वेत्त्वाज्ज्यस्यहोतर्य्यज।।१।। होतायक्क्षत्तनूनपातमूतिभिः।। होतायक्क्ष त्तनूनपातमूतिभिर्ज्जेतारमपराजितम्।। इन्द्रन्देव७स्वर्व्विदम्पथिभिर्म्मधुमत्तमैर्न्नराशꣳसेनतेजसा व्वेत्त्वाज्ज्यस्यहोतर्य्यज।।२।। होतायक्क्षदिडाभिरिन्द्रम्।। होतायक्क्षदिडाभिरिन्द्रमीडितमा जुह्व्वानममर्त्त्यम्।। देवोदेवैः सवीर्य्योव्वज्रहस्त्तꣳपुरन्दरोव्वेत्त्वाज्ज्यस्यहोतर्य्यज।।३।। होतायक्क्ष द्द्बर्हिषीन्द्रम्।। होतायक्क्षद्द्बर्हिषीन्द्रन्निषद्द्वरंवृषभन्नर्य्यापसम्।। व्वसुभीरुद्द्रैरादित्त्यैꣳसयुग्भि

ब्बर्हिरासदद्द्वेत्त्वाज्ज्यस्यहोतर्य्यज ।।४।। होतायक्क्षदोजोन।। होतायक्क्षदोजोनव्वीर्य्यꣳ

सहोद्द्वारꣳइन्द्रमवर्द्धयन्।। सुप्प्रायणाऽअस्म्मिन्न्यज्ज्ञेव्विश्श्रयन्तामृतावृधोद्द्वारꣳइन्द्रायमीढुषे

व्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।५।। होतायक्क्षदुषेऽइन्द्रस्य। धेनूसुदुघेमातरामही।। सवातरौनतेजसा

व्वत्त्समिन्द्रमवर्द्धतांव्वीतामाज्ज्यस्य होतर्य्यज।।६।। होतायक्क्षद्दैव्व्याहोतारा।। भिषजासखायाह

विषेन्द्रम्भिषज्ज्यतꣳ।। कवीदेवौप्प्रचेतसाविन्द्रायधत्तऽइन्द्रियंव्वीतामाज्ज्यस्यहोतर्य्यज।।७।।

होतायक्क्षत्तिस्स्रोदेवीः।। होतायक्क्षत्तिस्स्रोदेवीर्न्नभेषजन्त्रयस्त्रिधातवोपसऽइडासरस्वतीभारतीमहीः।

इन्द्रपत्नीर्हविष्म्मतीर्व्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।८।। होतायक्क्षत्त्वष्ट्टारमिन्द्रम्।। होतायक्क्षत्त्वष्ट्टार

मिन्द्रन्देवम्भिषजꣳसुयजङ्घृतश्श्रियम्।। पुरुरूपꣳसुरेतसम्मघोनमिन्द्रायत्त्वष्ट्टादधदिन्द्रियाणिव्वेत्त्वा

ज्ज्यस्यहोतर्य्यज ।।९।। होतायक्क्षद्द्वनस्स्पतिꣳशमितारम्।। होतायक्क्षद्द्वनप्पतिꣳशमितारꣳशत

क्क्रतुन्धियोजोष्ट्टारमिन्द्रियम्।। मद्ध्वासमञ्जन्पथिभिःसुगेभिःस्वदातियज्ज्ञम्मधुनाघृतेन व्वेत्त्वा

ज्ज्यस्यहोतर्य्यज ।।१०।। होतायक्क्षदिन्द्रꣳस्वाहा।। होतायक्क्षदिन्द्रꣳस्वाहाज्ज्यस्यस्वाहामेदसꣳ

स्वाहा स्त्तोकाना࠸स्वाहास्वाहाकृतीना࠸स्वाहाहव्व्यसूक्तीनाम्।। स्वाहादेवाऽआज्ज्यपाजुषाणा ऽइन्द्रऽआज्ज्यस्यव्व्यन्तुहोतर्य्यज।।११।। (११-१) देवम्बर्हिरिन्द्रम्।। देवम्बर्हिरिन्द्रꣳसुदेवन्देवैर्व्वीरवत्त्स्तीर्ण्णंव्वेद्यामवर्द्धयत्।। व्वस्त्तोर्वृतम्प्राक्क्तोर्भृतꣳरायाबर्हिष्म्मतोत्त्यगाद्वसुवनेव्वसुधेयस्यव्वेतुयज ।।१२।। देवीर्द्वारः।। देवीर्द्वारऽइन्द्रꣳसङ्घातेव्वीड्वीर्य्यामन्नवर्द्धयन्।। आवत्त्सेनतरुणेन कुमारेणचमीवतापार्व्वाणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज।।१३।। देवीऽउषासानक्क्ता।। देवीऽउषासानक्क्तेन्द्रंय्यज्ज्ञेप्प्रयत्त्यह्व्वेताम्।। देवीर्व्विशःप्प्रायासिष्टा࠸सुप्प्रीतेव्वसुधितेव्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।१४।। देवीजोष्ट्री।। देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रमवर्द्धताम्।। अयाव्व्यन्न्याघाद्द्वेषा࠸स्यान्न्याव्वक्षद्वसुव्वार्य्याणियजमानायशिक्क्षितेव्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।१५।। देवीऽऊर्ज्जाहुती।। देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम्।। इषमूर्ज्जमन्न्याव्वक्षत्त्सग्ग्धिꣳसपीतिमन्न्यानवेनपूर्व्वन्दयमानेपुराणेननवमधाताऽमूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयमानेव्वसुव्वार्य्याणियजमानायशिक्क्षितेव्वसुवनेव्वसुधेयस्यव्वीताँय्यज

।।१६।। देवादैव्व्या।। देवादैव्व्याहोतारादेवमिन्द्रमवर्द्धताम्।। हताघशꣳसावाभार्ष्ट्वंव्व
सुव्वार्य्याणियजमानायशिक्षितौव्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।१७।। देवीस्तिस्रः।। देवी
स्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन्।। अस्पृक्षद्भारतीदिवꣳरुद्रैर्य्यज्ञꣳसरस्वतीडाव्वसुमती
गृहान्वसुवनेव्वसुधेयस्यव्व्यन्तुयज।।१८।। देवऽइन्द्रः।। देवऽइन्द्रोनराशꣳसस्त्रिवरूथस्त्रि
बन्धुरोदेवमिन्द्रमवर्द्धयत्।। शतेनशितिपृष्ठानामाहितꣳसहस्रेणप्प्रवर्त्ततेमित्त्रावरुणेदस्यहोत्त्रमर्हतो
बृहस्प्पतिस्तोत्त्रमश्श्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयस्यव्वेतुयज।।१९।। देवोदेवैः।। देवोदेवै
र्व्वनस्प्पतिर्हिरण्ण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमवर्द्धयत्।। दिवमग्ग्रेणास्पृक्षदान्तरिक्ष
म्पृथिवीमदृꣳहीद्द्वसुवनेव्वसुधेयस्यव्वेतुयज।।२०।। देवम्बर्हिः।। देवम्बर्हिर्व्वारितीनान्देवमिन्द्रम
वर्द्धयत्।। स्वासस्त्थमिन्द्रेणासन्नमन्न्याबर्हीꣳष्ष्यभ्भ्यभूद्द्वसुवनेव्वसुधेयस्यव्वेतुयज।।२१।।
देवोऽअग्निः।। देवोऽअग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत्।। स्विष्टङ्कुर्व्वन्त्स्विष्टकृत्स्विष्टमद्द्यक
रोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज।।२२।। अग्निमद्य।। होतारमवृणीतायँय्यजमानꣳ

पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्रायच्छागम्।। सूपस्था अद्यदेवोव्वनस्पतिरभवदिन्द्रायच्छागेन।। अघत्तम्मेदस्तः प्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन।। त्वामद्यऽऋषे।।२३।।

(१२-२) होतायक्षत्समिधानम्महत्।। होतायक्षत्समिधानम्महद्यशः सुसमिद्द्ध्वंव्वरेण्यमग्ग्निमिन्द्रंव्वयोधसम्।। गायत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गांव्वयोदधद्द्वेत्वाज्ज्यस्यहोतर्य्यज।।२४।।

होतायक्षत्तनूनपातमुद्भिदम्।। होतायक्षत्तनूनपातमुद्भिदँय्यङ्गर्ब्भमदितिर्द्दधेशुचिमिन्द्रंव्वयोधसम् ।। उष्णिहञ्छन्दऽइन्द्रियन्दित्यवाहङ्गाव्वयोदधद्द्वेत्वाज्ज्यस्यहोतर्य्यज।।२५।। होतायक्षदीडेन्न्यमीडितम्।। होतायक्षदीडेन्न्यमीडितंवृत्रहन्तममिडाभिरीड्ड्यः सहः सोममिन्द्रंव्वयोधसम्।। अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांव्वयोदधद्द्वेत्वाज्ज्यस्यहोतर्य्यज।।२६।। होतायक्षत्सुबर्हिषम्पूषण्वन्तम्।। होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्त्यः सीदन्तम्बर्हिषिप्प्रियेमृतेन्द्रंव्वयोधसम्।। बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्द्वेत्वाज्ज्यस्यहोतर्य्यज।।२७।। होतायक्षद्व्यचस्वतीः सुप्प्रायणाः।। होतायकक्षद्व्यचस्वतीः सुप्प्रायणाऽऋतावृधोद्द्वारोदेवीर्हिरण्ययार्ब्ब्रह्म्माणमिन्द्रं

व्वयोधसम्।। पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्वयोदधद्व्ययन्त्वाज्ज्यस्यहोतर्य्यज ।।२८।।
होतायक्षत्सुपेशसासुशिल्प्पे। बृहतीऽउभेनक्तोषासानदर्शतेव्विश्वमिन्द्रंव्वयोधसम्।।
त्रिष्टुभञ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गाव्वयोदधद्वीतामाज्ज्यस्यहोतर्य्यज।।२९।। होतायक्षत्प्रचेत
सादेवानाम्।। होतायक्षत्प्रचेतसादेवानामुत्तमँय्यशोहोताराद्दैव्व्याकवीसयुजेन्द्रंव्वयोधसम्।।
जगतिञ्छन्दऽइन्द्रियमनड्ड्वाहङ्गांव्वयोदधद्वीतामाज्ज्यस्यहोतर्य्यज।।३०।। होतायक्षत्पेश
स्वतीस्तिस्रः।। होतायक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ण्ययीब्भारतीर्बृतीर्म्महीःपतिमिन्द्रंव्वयोध
सम्।। व्विराजञ्छन्दऽइहेन्द्रियन्धेनुङ्गान्नव्वयोदधद्व्ययन्त्वाज्ज्यस्यहोतर्य्यज।।३१।। होतायक्ष
त्सुरेतसन्त्वष्टारम्।। होतायक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳरूपाणिबिब्भ्रतम्पृथक्पुष्टिमिन्द्रं
व्वयोधसम्।। द्विपदञ्छन्दऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधद्द्वेत्त्वाज्ज्यस्यहोतर्य्यज।।३२।। होता
यक्षद्व्वनस्प्पतिꣳशमितारम्।। होतायकक्षद्व्वनस्प्पतिꣳशमितारꣳशतक्क्रतुꣳहिरण्ण्यपर्ण्णमुक्त्थि
नꣳरशनाम्बिब्भ्रतंव्वशिम्भगमिन्द्रंव्वयोधसम्।। ककुभञ्छन्दऽइहेन्द्रियंव्वेहतङ्गांव्वयोदधद्द्वेत्त्वा

ज्ज्यस्यहोतर्य्यज।।३३।। होतायक्षत्स्वाहाकृतीरग्ग्निम्।। होतायक्षत्स्वाहाकृतीरग्ग्निङ्गृहपति
म्पृथग्ग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रँव्वयोधसम्।। अतिच्छन्दसच्छन्दऽइन्द्रियम्बृहदृषभङ्गाव्वयोदध
द्द्व्यन्त्वाज्ज्यस्यहोतर्य्यज।।३४।। (११-३) देवम्बर्हिः।। देवम्बर्हिर्व्वयोधसन्देवमिन्द्रमवर्द्धयत्।।
गायत्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रेव्वयोदधद्द्वसुवनेव्वसुधेयस्यव्वेतुयज।।३५।। देवीर्द्द्वारः।।
देवीर्द्द्वारोव्वयोधसꣳशुचिमिन्द्रमवर्द्धयन्।। उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेव्वयोदधद्द्वसुवने
व्वसुधेयस्यव्व्यन्तुयज।।३६।। देवीऽउषासानक्क्ता।। देवमिन्द्रँव्वयोधसन्देवीदेवमवर्द्धताम्।।
अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधद्द्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।३७।। देवीजोष्ट्री।।
देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रँव्वयोधसन्देवीदेवमवर्द्धताम्।। बृहत्त्याच्छन्दसेन्द्रियꣳश्रोत्रमिन्द्रे
व्वयोदधद्द्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।३८।। देवीऽऊर्ज्जाहुती।। देवीऽऊर्ज्जाहुतीदुघेसुदुघेपय
सेन्द्रम्व्वयोधसन्देवीदेवमवर्द्धतान्।। पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्क्रमिन्द्रेव्वयोदधद्द्वसुवनेव्वसुधेय
स्यव्वीताँय्यज।।३९।। देवादैव्व्या।। देवादैव्व्याहोतारादेवमिन्द्रँव्वयोधसन्देवौदेवमवर्द्धताम्।।

त्रिष्टुभाच्छन्दसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधद्द्वसुवनेव्वसुधेयस्यव्वीताँय्यज।।४०।। देवीस्तिस्रः।।
देवीस्तिस्रस्तिस्रोदेवीर्व्वयोधसम्पतिमिन्द्रमवर्द्धयन्।। जगत्याच्छन्दसेन्द्रियꣳशूषमिन्द्रेव्वयो
दधद्द्वसुवनेव्वसुधेयस्यव्व्यन्तुयज।।४१।। देवोनराशꣳसः।। देवोनराशꣳसोदेवमिन्द्रव्वयोध
सन्देवोदेवमवर्द्धयत्।। व्विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधद्द्वसुवनेद्द्वसुधेयस्यव्वेतुयज
।।४२।। देवोव्वनस्प्पतिः।। देवोव्वनस्प्पतिर्द्देवमिन्द्रव्वयोधसन्देवोदेवमवर्द्धयत्।। द्विपदाच्छन्द
सेन्द्रियम्भगमिन्द्रेव्वयोदधद्द्वसुवनेव्वसुधेयस्यव्वेतुयज।।४३।। देवम्बर्हिः।। देवम्बर्हिर्व्वारितीना
न्देवमिन्द्रव्वयोधसन्देवन्देवमवर्द्धयत्।। ककुभाच्छन्दसेन्द्रियँय्यशऽइन्द्रेव्वयोदधद्द्वसुवनेव्व
सुधेयस्यव्वेतुयज।।४४।। देवोऽअग्निः।। स्विष्टकृद्देवमिन्द्रव्वयोधसन्देवोदेवमवर्द्धयत्।।
अतिच्छन्दसाच्छन्दसेन्द्रियक्क्षत्रमिन्द्रेव्वयोदधद्द्वसुवनेव्वसुवधेयस्यव्वेतुयज।।४५।। अग्निमद्य।
होतारमवृणीतायँय्यजमानꣳपचन्न्पक्क्तीꣳपचन्न्पुरोडाशम्बन्धनन्निन्द्रायव्वयोधसेच्छागम्।।
सूपस्थाऽअद्यदेवोव्वनस्प्पतिरभवदिन्द्रायव्वयोधसेच्छागेन।। अघत्तम्मेदस्तःप्प्रतिपचताग्ग्रभी

दवींवृधत्त्पुरोडाशेन।। त्वामद्यऽऋंषे।।४६।। (१२-४) इतिश्रीवाजसनेयसंहितायाम्
अष्टाविंशोऽध्यायः।।२८।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। समिद्धोऽअञ्जन्नेकादश,
यदक्रन्दस्त्रयोदश, समिद्धोऽअद्यद्वादश, केतुंकृण्वँश्चतुर्व्विंशति, श्चत्वारः षष्टिः (अ. २९
मं. ६० अनु. ४)। हरिः ॐ।। समिद्धोऽअञ्जन्।। समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतम
ग्ग्नेमधुमत्त्पिन्वमानः।। व्वाजीव्वहन्वाजिनञ्जातवेदोदेवानांव्वक्षिप्प्रियमासधस्त्थम्।।१।।
घृतेनाञ्जन्।। घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्वाज्ज्यप्प्येतुदेवान्।। अनुत्त्वासप्प्तेप्प्रदिशः
सचन्ताᳬस्वधामस्म्मैयजमानायधेहि।।२।। ईड्यश्च्च।, ईड्यश्च्चासिव्वन्द्यश्च्चव्वाजिन्ना
शुश्च्चासिमेद्ध्यश्च्चसप्प्ते।। अग्ग्निष्ट्वादेवैर्व्वसुभिःसजोषाःप्प्रीतंव्वह्निन्व्वहतुजातवेदाः ।।३।।
स्त्तीर्ण्णम्बर्हिः।। सुष्ट्टरीमाजुषाणोरुपृथुप्प्रथमानम्पृथिव्व्याम्।। देवेभिर्य्युक्क्तमदितिःसजोषाः
स्योनङ्कृण्ण्वानासुवितेदधातु।।४।। एताऽउवः। सुभगाव्विश्श्वरूपाव्विपक्क्षोभिःश्रयमाणा
ऽउदातैः।। ऋष्ष्वाःसतीःकवषःशुम्भमानाद्द्वारोदेवीःसुप्प्रायणाभवन्तु।।५।। अन्तरामित्त्रावरुणा

।। अन्तरामित्त्रावरुणाचरन्तीमुखँय्यज्ञानामभिसंव्विदाने ।। उषासावा७सुहिरण्ण्येसुशिल्प्पेऽऋत

स्ययोनाविहसादयामि।।६।। प्रथमावाम्।। प्रथमावा७सरधिनासुवर्ण्णादेवौपश्श्यन्तौभुवना

निव्विश्श्वा।। अपिप्प्रयश्चोदनावाम्मिमानाहोता राज्ज्योतिः प्प्रदिशादिशन्ता।।७।। आदित्त्यैर्न्नः।।

आदित्त्यैर्न्नोभारतीव्वष्ट्टुयज्ज्ञ सरस्वतीसह रुद्द्रैर्न्नऽआवीत्।। इडोपहूताव्वसुभिः सजोषायज्ज्ञन्नो

देवीरमृतेषुधत्त।।८।। त्वष्ट्टाव्वीरम्।। त्वष्ट्टाव्वीरन्देवकामञ्जजानत्त्वष्ट्टुरर्व्वाजायतऽआशु

रश्श्वः।। त्वष्ट्टेदंव्विश्श्वम्भुवनञ्जजानबहोः कर्त्तारमिहयक्क्षिहोतः।।९।। अश्श्वोघृतेन।।

अश्श्वोघृतेनत्त्मन्न्यासमक्क्तऽउपदेवाँ२।।ऽऋतुशः पाथऽएतु।। व्वनस्प्पतिर्द्देवलोकम्प्रजानन्न

ग्ग्निनाहव्व्यास्वदितानिव्वक्क्षत्।।१०।।

प्रजापतेस्त्तपसा। वावृधानः सद्द्योजातोदधिषेयज्ज्ञमग्ग्ने।। स्वाहाकृतेनहविषापुरोगायाहिसाद्ध्या

हविरदन्तुदेवाः ।।११।। (११-१) यदक्क्रन्दः। प्प्रथमञ्जायमानऽउद्द्यन्त्समुद्द्रादुतवापुरीषात्।।

श्येनस्यपक्क्षाहरिणस्यबाहूऽउपस्त्तुत्त्यम्महिजातन्तेऽअर्व्वन्।।१२।। यमेनदत्तम्।। यमेनदत्तन्त्रित

ऽएनमायुनगिन्द्रंऽएणम्प्रथमोऽअद्ध्यंतिष्ठत्।। गन्धर्व्वोऽअस्यरशनामगृब्भ्णात्त्सूरादश्श्वंव्वसवो

निरंतष्ट।।१३।। असिंयमः।। असिंयमोऽअस्यांदित्त्योऽअंर्व्वन्नसिंत्त्रितोगुह्योनव्व्रतेन।। असिसोमेन

समयाव्विपृक्क्तऽआहुस्त्तेत्त्रीणिंदिविबन्धनानि।।१४।। त्रीणिंते।। त्रीणिंतऽआहुर्द्दिविबन्धना

नित्त्रीण्ण्यप्प्सुत्त्रीण्ण्यन्तः समुद्द्रे।। उतेवमेव्वरुणश्च्छन्त्स्यर्व्वन्न्यत्त्रांतऽआहुः परमञ्जनित्त्रम्

।।१५।। इमातेव्वाजिन्।। इमातेव्वाजिन्नवमार्ज्जनानीमाशफानांᳪसनितुर्न्निधाना।। अत्त्रांतेभद्द्रा

रंशनाऽअंपश्श्यमृतस्य्ययाऽअंभिरक्क्षन्तिगोपाः।।१६।। आत्क्मानन्ते।। आत्क्मानन्तेमनसारादं

जानामवोदिवापतयन्तम्पतङ्गम्।। शिरोऽअपश्श्यम्पथिभिः सुगेभिरेणुभिर्ज्जेहमानम्पतत्त्रि।।१७।।

अत्त्रांते। रूपमुत्तममपश्श्यञ्जिगीषमाणमिषऽआपदेगोः।। यदातेमर्त्तोऽअनुभोगमानडादिद्ग्रसिंष्ठ

ऽओषधीरजीगः।।१८।। अनुंत्त्वा।। अनुंत्त्वारथोऽअनुमर्य्योऽअर्व्वन्ननुगावोऽनुभगःकनीनाम् ।।

अनुव्व्रातांसस्त्तवसक्ख्यमीयुरनुदेवाममिरेव्वीर्य्यन्ते।।१९।। हिरंण्ण्यशृङ्गोयः।। हिरंण्ण्यशृङ्गोयोंऽ

अस्यपादामनोजवाऽअवरऽइन्द्रंऽआसीत्।। देवाऽइदस्यहविरद्द्यमायन्न्योऽअर्व्वन्तम्प्रथमोऽ

अद्ध्यतिष्ठत्।।२०।। ईर्म्मान्तासꣳसिलिकमद्ध्यमासꣳ।। ईर्म्मान्तासꣳसिलिकमद्ध्यमासꣳसꣳ
शूरणासोदिव्व्यासोऽअत्त्याः।। हꣳसाऽइवश्श्रेणिशोयतन्तेयदाक्क्षिषुर्द्दिव्व्यमज्ज्ममश्श्वाः।।२१।।
तवशरीरम्।। तवशरीरम्म्पतयिष्ण्णवर्व्वन्तवचित्तंव्वातऽइवद्ध्रजीमान्।। तवशृङ्गाणिव्विष्ठिता
पुरुत्त्रारण्ण्येषुजर्भुराणाचरन्ति।।२२।। उपप्प्र।। उपप्प्रागाच्छसनंव्वाज्यर्व्वादेवद्द्रीचामन
सादीद्ध्यानꣳ।। अजःपुरोनीयतेनाभिरस्यानुपश्च्चात्क्कवयोयन्तिरेभाः।।२३।। उपप्प्र।। उपप्प्रागा
त्त्परमँय्यत्त्सधस्त्थमर्व्वाँ२।।ऽअच्छापितरम्मातरञ्च।। अद्द्यादेवाञ्जुष्टतमोहिगम्म्याऽअथाशास्त्ते
दाशुषेव्वार्य्याणि।।२४।। (१३-२) समिद्धोऽअद्द्य। मनुषोदुरोणेदेवोदेवान्न्यजसिजातवेदः।।
आचव्वहमित्त्रमहश्चिचकित्त्वान्त्वन्दूतःकविरसिप्प्रचेताः।।२५।। तनूनपात्त्पथः।। तनूनपात्त्पथ
ऽऋतस्ययानान्मद्ध्वासमञ्जन्त्स्वदयासुजिह्व।। मन्न्मानिधीभिरुतयज्ज्ञमृन्धन्देवत्त्राचकृणुह्य
द्ध्वरन्नः।।२६।। नराशꣳसस्यमहिमानम्।। नराशꣳसस्यमहिमानमेषामुपस्त्तोषामयजतस्ययज्ज्ञैः।।
येसुक्क्रतवꣳशुचयोधियन्धाःस्वदन्तिदेवाऽउभयानिहव्व्या।।२७।। आजुहव्वानऽईड्ड्यः।।

आजुह्वानऽईड्ड्योव्वन्द्यश्च्चायाह्यग्ग्नेव्वसुभिꣳसजोषाꣳ।। त्वन्देवानामसियह्व्वहोता

सऽएनान्न्यक्षीषितोयजीयान्।।२८।। प्राचीनम्बर्हिः। प्प्रदिशापृथिव्व्याव्वस्त्तोरस्याव्वृज्ज्यते

ऽअग्ग्रेऽअह्न्नाम्।। व्व्युप्प्रथतेव्वितरंव्वरीयोदेवेब्भ्योऽअदितयेस्योनम्।।२९।। व्व्यचस्व

तीरुर्व्विया। श्श्रयन्ताम्पतिब्भ्योनजनयꣳशुम्भमानाꣳ।। देवीद्द्वारोबृहतीव्विर्व्विश्श्वमिन्न्वादेवे

ब्भ्योभवतसुप्प्रायणाꣳ।।३०।। आसुष्ष्वयन्ती। यजतेऽउपाकेऽउषासानक्क्तासदतान्नियोनौ।।

दिव्व्येयोषणेबृहतीसुरुक्क्मेऽअधिश्श्रियꣳशुक्क्रपिशन्दधाने।।३१।। दैव्व्याहोतारा। प्प्रथमा

सुवाचामिमानायज्ज्ञम्मनुषोयजद्ध्यै।। प्रचोदयन्ताव्विदथेषुकारूप्प्राचीनञ्ज्योतिः प्प्रदिशादि

शन्ता।।३२।। आनः।। आनोयज्ज्ञम्भारतीतूयमेत्त्विडामनुष्ष्वदिहचेतयन्ती।। तिस्स्रोदेवीर्ब्बर्हिरेदꣳ

स्योनꣳसरस्वतीस्वपसꣳसदन्तु।।३३।। यऽइमे। द्द्यावापृथिवीजनित्त्रीरूपैरपिꣳशद्भ्दुवनानिव्वि

श्श्वा।। तमद्द्यहोतरिषितोयजीयान्देवन्त्वष्ट्टारमिहयक्षिव्विद्द्वान्।।३४।। उपावसृजत्क्मन्न्या।

समञ्जन्देवानाम्पाथऽऋतुथाहवी꣡षि।। व्वनस्प्पतिःशमितादेवोऽअग्ग्निःस्वदन्तुहव्व्यम्मधुना

घृतेन।।३५।। सद्द्योजातः।। सद्द्योजातोव्व्यमिमीतयज्ज्ञमग्ग्निर्द्देवानामभवत्पुरोगाः।। अस्यहोतुः प्प्रदिशश्यृतस्यंव्वाचिस्वाहाकृतꣳहविरदन्तुदेवाः।।३६।। (१२–३) केतुङ्कृण्णवन्।। केतुङ्कृण्णवन्नकेतवेपेशोमर्य्याऽअपेशसे।। समुषद्भिरजायथाः।।३७।। जीमूतस्येवभवति।। जीमूतस्येवभवतिप्प्रतीकँय्यद्वर्म्मीयातिसमदामुपस्त्थे।। अनाविद्धयातन्न्वाजयत्त्वꣳसत्त्वा व्वर्म्मणोमहिमापिपर्त्तु।।३८।। धन्न्वनागाः।। धन्न्वनागाधन्न्वनाजिञ्जयेमधन्न्वनातीव्व्राः समदोजयेम।। धनुःशत्त्रोरपकामङ्कृणोतिधन्न्वनासर्व्वाः प्प्रदिशोजयेम।।३९।। व्वक्क्ष्यन्तीवेत्।। व्वक्क्ष्यन्तीवेदागनीगन्तिकर्ण्णम्प्रियꣳसखायम्परिषस्वजाना।। योषेवशिङ्क्तेव्वितताधि धन्न्वञ्ज्ज्याऽइयꣳसमनेपारयन्ती।।४०।। तेऽआचरन्ती।। तेऽआचरन्तीसमनेवयोषामातेव पुत्त्रम्बिभृतामुपस्त्थे।। अपशत्त्रून्न्विव्ध्यताꣳसंविदानेऽआर्त्नीऽइमेव्विष्फुरन्तीऽअमित्त्रान् ।।४१।। बह्वीनाम्पिता। बहुरस्यपुत्त्रश्चिश्चाकृणोतिसमनावगत्त्य।। इषुधिःसङ्काःपृतना श्च्चसर्व्वाःपृष्ठेनिनद्धोजयतिप्प्रसूतः।।४२।। रथेतिष्ठन्।। रथेतिष्ठन्नयतिव्वाजिनःपुरोयत्रय

त्रकामयन्तेसुषारथिः।। अभीशूनाम्महिमानम्पनायतमनःपश्चादनुयच्छन्तिरश्मयः।।४३।।

तीव्व्रान्घोषान्।। तीव्व्रान्घोषान्कृण्ण्वतेव्वृषपाणयोश्श्वारथेभिःसहव्वाजयन्तः।। अवक्क्रा

मन्तःप्प्रपदैरमित्त्रान्क्षिणन्तिशत्त्रूँ१।।ऽरनपव्व्ययन्तः।।४४।। रथवाहणꣳहविः।। रथवाहणꣳहवि

रस्यनामयत्रायुधन्निहितमस्यव्वर्म्म।। तत्रारथमुपशग्ग्मꣳसदेमव्विश्श्वाहाव्वयꣳसुमनस्यमानाः

।।४५।। स्वादुषꣳसदःपितरः।। स्वादुषꣳसदःपितरोव्वयोधाःकृच्छ्रेश्श्रितःशक्क्तीवन्तोगभीराः

।। चित्रसेनाऽइषुबलाऽअमृद्ध्राःसतोवीराऽउरवोव्व्रातसाहाः।।४६।। ब्राह्म्मणासःपितरः।।

ब्राह्म्मणासःपितरःसोम्म्यासःशिवेनोद्द्यावापृथिवीऽअनेहसा।। पूषानःपातुदुरितादृतावृधोरक्क्षा

माकिर्न्नोऽअघशꣳसऽईशत।।४७।। सुपर्ण्णंव्वस्ते। मृगोऽअस्यादन्तोगोभिःसन्नद्धापततिप्प्रसूता

।। यत्रानरःसञ्चव्विचद्द्रवन्तितत्रास्म्मभ्यमिषवःशर्म्मयꣳसन्।।४८।। ऋजीतेपरि। वृङ्धिनो

शर्म्माभवतुनस्तनूः।। सोमोऽअधिब्ब्रवीतुनोदितिःशर्म्मयच्छतु।।४९।। आजङ्घन्ति।। आजङ्घन्ति

सान्वेषाञ्जघनाँ२।।ऽउपजिग्घ्नते।। अश्श्वाजनिप्प्रचेतसोश्श्वान्त्समत्त्सुचोदय।।५०।। अहिरिव

भोगैः। पर्य्यैतिबाहुज्ज्यायाहेतिम्परिबाधमानः।। हस्तग्घ्नोव्विश्श्वाव्वयुनानिव्विद्द्वान्पुमान्पुमा७ सम्परिपातुव्विश्श्वतः।।५१।। व्वनस्प्पतेव्वीड्ड्वङ्गः।। व्वनस्प्पतेव्वीड्ड्वङ्गोहिभूयाऽअस्म्मत्सखाप्प्रतरणःसुवीरः।। गोभिःसन्नद्धोऽअसिव्वीडयस्वास्त्थातातेजयतुजेत्त्वानि।।५२।। दिवःपृथिव्व्याः।। दिवःपृथिव्व्याःपर्य्योजऽउद्धृतंव्वनस्प्पतिब्भ्यःपर्य्याभृतꣳसहः।।

अपामोज्म्मानम्परिगोभिरावृतमिन्द्रस्यव्वज्रꣳहविषारथँय्यज।।५३।। इन्द्रस्यव्वज्रः।। इन्द्रस्यव्वज्रोमरुतामनीकम्मित्त्रस्यगब्भोव्वरुणस्यनाभिः।। सेमान्नोहव्व्यदातिञ्जुषाणोदेवरथप्प्रतिहव्व्यागृभाय।।५४।। उपश्श्वासय। पृथिवीमुतद्द्यामपुरुत्त्रातेमनुताव्विष्ष्ठितञ्जगत्।। सदुन्दुभेसजूरिन्द्रेणदेवैर्द्दूराद्दवीयोऽअपसेधशत्रून्।।५५।। आक्क्रन्दय।। आक्क्रन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः।। अपप्प्रोथदुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिव्वीडयस्व।।५६।।

आमूः।। आमूरजप्प्रत्त्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्व्वावदीति। समश्श्वपर्ण्णाश्श्चरन्तिनोनरोस्म्माकमिन्द्ररथिनोजयन्तु।।५७।। आग्ग्नेयःकृष्ष्णग्ग्रीवः। सारस्वतीमेषीबब्भ्रुःसौम्म्यःपौष्ष्णः

श्श्यामःशितिपृष्ठोबार्हस्प्पत्त्यःशिल्प्पोव्वैश्श्वदेवऽऐन्द्रोरुणोमारुतःकल्म्माषऽऐन्द्राग्ग्नःसꣳहितो
धोरामल्सावित्त्रोव्वारुणःकृष्ण्णऽएकशितिपात्त्पेत्त्वः॥५८॥ अग्ग्नयेनीकवते॥ अग्ग्नयेनीकव
तेरोहिताञ्जिरनड्ड्वानधोरामौसावित्त्रौपौष्ण्णौरजतनाभीव्वैश्श्वदेवौपिशङ्गौतूपरौमारुतःकल्म्मा
षऽआग्ग्नेयःकृष्ण्णोजःसारस्वतीमेषीव्वारुणःपेत्त्वः॥५९॥ अग्ग्नयेगायत्त्राय। त्त्रिवृतेराथन्त
रायाष्ट्टाकपालऽइन्द्रायत्त्रैष्ट्टुभायपञ्चदशायबार्हतायैकादशकपालोव्विश्श्वेब्भ्योदेवेब्भ्योजागते
ब्भ्यल्सप्तदशेब्भ्योव्वैरूपेब्भ्योद्द्वादशकपालोमित्त्रावरुणाब्भ्यामानुष्ट्टुभाब्भ्यामेकविꣳशाब्भ्यां
व्वैराजाब्भ्याम्पयस्स्याबृहस्प्पतयेपाङ्क्तायत्त्रिणवायशाक्क्वरायचरुःसवित्त्रऽऔष्णिहायत्त्र
यस्त्रिꣳशायरैवतायद्द्वादशकपालल्प्प्राजापत्त्यश्श्चरुरदित्त्यैव्विष्ण्णुपत्क्न्यैचल्रुरग्ग्नयेव्वैश्श्वान
रायद्द्वादशकपालोनुमत्त्याऽअष्ट्टाकपालः॥६०॥ (२४-४)॥ इतिश्रीवाजसनेयसंहितायामेकोन
त्रिंशोऽध्यायः॥२९॥ श्रीवेदपुरुषाय नमः॥ अनुवाकसूत्रम्॥ देवसवितः षट्, तपसेकौलालꣳ
षोडश, द्वौ द्वाविꣳशतिः॥ (अ. ३० मं. २२ अ.२) हरिःॐ॥ देवसवितः॥ देवसावितः

प्प्रसुवयज्ज्ञम्प्रसुवयज्ज्ञपतिम्भगाय।। दिव्व्योगन्धर्व्वःकेतपूःकेतन्नꣳपुनातुव्वाचस्प्पति
र्व्वाचन्नꣳस्वदतु।।१।। तत्त्सवितुः।। तत्त्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यधीमहि।। धियोयोनः
प्प्रचोदयात्।।२।। विश्श्वानिदेव। सवितर्द्दुरितानिपरासुव।। यद्भद्द्रन्तन्नऽआसुव।।३।।
व्विभक्तारꣳहवामहे।। व्विभक्क्तारꣳहवामहेव्वसोश्चित्रस्यराधसः।। सवितारन्नृचक्क्षसम्
।।४।। ब्रह्म्मणेब्ब्राह्म्मणम्।। ब्रह्म्मणेब्ब्राह्म्मणङ्क्षत्रायराजन्न्यम्मरुद्भ्योव्वैश्श्यन्तपसे
शूद्द्रन्तमसेतस्क्करन्नारकायव्वीरहणम्पाप्प्मनेक्क्लीबमाक्क्रयायाऽअयोगूङ्कामायपुँश्च्चलूमति
क्क्रुष्ट्टायमागधम्।।५।। नृत्तायसूतम्।। नृत्तायसूतङ्गीतायशैलूषन्धर्म्मायसभाचरन्नरिष्ट्ठायै
भीमलन्नर्म्मायरेभꣳहसायकारिमानन्दायस्त्रीषखम्प्रमदेकुमारीपुत्त्रम्मेधायैरथकारन्धैर्य्यायतक्क्षा
णम्।।६।। (६-१) तपसेकौलालम्। तपसेकौलालम्मायायैकर्म्मारꣳरूपायमणिकारꣳशुभेव्वपꣳ
शरव्व्यायाऽइषुकारꣳहेत्त्यैधनुष्क्कारङ्कर्म्मणेज्ज्याकारन्दिष्ट्टायरज्जुसर्ज्जम्मृत्त्यवेमृगयुमन्तकायश्श्व
निनम्।।७।। नदीब्भ्यःपौञ्जिष्ठम्।। नदीब्भ्यःपौञ्जिष्ठमृक्क्षीकाब्भ्योनैषादम्पुरुषव्व्याग्घ्राय

दुर्म्मदङ्गन्धर्व्वाप्सरोब्भ्योव्व्रात्त्यम्प्रयुग्भ्यऽउन्मत्तꣳसर्प्पदेवजनेब्भ्योप्प्रतिपदमयेब्भ्यꣳकितवमी
र्य्यतायाऽअकितवम्पिशाचेब्भ्योबिदलकारीँय्यातुधानेब्भ्यꣳकण्टकीकारीम्।।८।। सन्धयेजारम् ।।
सन्धयेजारङ्गेहायोपपतिमार्त्त्यैपरिवित्तन्निर्ऋत्त्यैपरिविविदानमराद्ध्याऽएदिधिषुꣳपतिन्निष्कृत्त्यै
पेशस्क्कारीꣳसञ्ज्ञानायस्म्मरकारीम्प्रकामोद्द्यायोपसदंव्वर्णायानुरुधम्बलायोपदाम्।।९।।
उत्त्सादेब्भ्यः कुब्जम्।। उत्त्सादेब्भ्यः कुब्जम्प्रमुदेव्वामनन्द्वाब्भ्यः स्स्रामꣳस्वप्नायान्धमधर्म्माय
बधिरम्पवित्त्रायभिषजम्प्रज्ज्ञानायनक्क्षत्रदर्शमाशिक्क्षायैप्प्रश्निन्नमुपशिक्क्षायाऽअभिप्प्रश्निन्नं
म्मर्य्यादायैप्प्रश्नविवाकम्।।१०।। अर्म्मेब्भ्योहस्तिपम्।। अर्म्मेब्भ्योहस्तिपञ्जवायाश्श्व
पम्पुष्ट्यैगोपालंव्वीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशङ्कीलालायसुराकारम्भद्द्रायगृहपꣳ
श्रेयसेवित्तधमाद्ध्यक्क्ष्यायानुक्क्षत्तारम्।।११।। भायैदार्व्वाहारम्।। भायैदार्व्वाहारम्प्रभाया
ऽअग्ग्न्येधम्ब्रद्ध्नस्यव्विष्टपायाभिषेक्क्तारंव्वर्षिष्ठायनाकायपरिवेष्टारन्देवलोकायपेशितारम्मनुष्य
लोकायप्प्रकरितारꣳसर्व्वेब्भ्योलोकेब्भ्यऽउपसेक्क्तारमवऽऋत्त्यैव्वधायोपमन्थितारम्मेधायव्वासꣳ

पल्प्पूलीम्प्रंकामायरजयित्रीम्।।१२।। ऋतयेस्त्तेनहृदयम्।। ऋतयेस्त्तेनहृदयंव्वैरहत्त्यायपिशुनं
व्विविक्क्त्यैक्षत्तारमौपद्द्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्म्नेपरिष्क्कन्दम्प्प्रियायप्प्रियवादि
नमरिष्ट्ट्याऽअश्श्वसादᳫस्वर्ग्गायलोकायभागदुघंव्वर्षिष्ठायनाकायपरिवेष्ट्टारम्।।१३।। मन्न्यवेय
स्त्तापम्।। मन्न्यवेयस्त्तापङ्क्रोधायनिसरँय्योगाययोक्क्तारꣳशोकायाभिसर्त्तारङ्क्षेमायव्विमोक्क्ता
रमुत्त्कूलनिकूलेब्भ्यस्त्रिष्ठिनंव्वपुषेमानस्कृतꣳशीलायाञ्जनीकारीन्निर्ऋत्त्यैकोशकारीँय्यमायासूम्
।।१४।। यमाययमसूम्।। यमाययमसूमथर्व्वब्भ्योवतोकाᳫसंवत्त्सरायपर्य्यायिणीम्परिवत्त्सराया
विजातामिदावत्त्सरायातीत्त्वरीमिद्द्वत्त्सरायातिष्क्कद्द्वरींव्वत्त्सरायव्विजर्ज्जराᳫसंवत्त्सरायपलिक्क्नी
मृभुब्भ्योजिनसन्धꣳसाद्ध्येब्भ्यश्च्चर्म्मम्म्नम् ।।१५।। सरोब्भ्योधैवरम्।। सरोब्भ्योधैवरमुपस्त्थावरा
ब्भ्योदाशंव्वैशन्ताब्भ्योबैन्दन्नड्ड्वलाब्भ्यꣳशौष्क्कलम्पारायमार्ग्गारमवारायकेवर्त्तन्तीर्त्थेब्भ्य
ऽआन्दंव्विषमेब्भ्योमैनालᳫस्वनेब्भ्यꣳपर्ण्णकङ्गुहाब्भ्यꣳकिरातꣳसानुब्भ्योजम्भकम्पर्व्वतेब्भ्यꣳ
किम्पूरुषम्।।१६।। बीभत्त्सायैपौल्क्कसम् ।। बीभत्त्सायैपौल्क्कसंव्वर्ण्णायहिरण्ण्यकारन्तुलायै

व्वाणिजम्पंश्च्चादोषायग्ग्लाविनंव्विश्श्वेब्भ्योभूतेब्भ्यः सिद्धमलम्भूत्त्यैजागरणमभूत्त्यैस्वपनमात्त्यै

जनवादिनंव्व्यृद्ध्याअपगल्ब्भꣳसꣳशरायप्प्रच्छिदम्।।१७।। अक्क्षराजायकितवम्।। अक्क्षराजाय

कितवङ्कृतायादिनवदर्शन्त्रेतायैकल्प्पिनन्द्वापरायाधिकल्प्पिनमास्क्कन्दायसभास्त्थाणुम्मृत्त्यवेगो

व्व्यच्छमन्तकायगोघातङ्क्षुधेयोगांव्विकृन्तन्तम्भिक्क्षमाणऽउपतिष्ठ्ठतिदुष्क्कृतायचरकाचार्य्य

म्पाप्प्मनेसैलगम्।।१८।।

प्रतिश्श्रुत्त्कायाऽअर्त्तनम्।। प्रतिश्श्रुत्त्कायाऽअर्त्तनङ्घोषायभषमन्तायबहुवादिनमनन्तायमूकꣳ

शब्दायाडम्बराघातम्महसेव्वीणावादङ्क्क्रोशायतूणवद्ध्ममवरस्प्परायशङ्खद्ध्मंव्वनायव्वनप

मन्न्यतोरण्ण्यायदावपम्।।१९।। नर्म्मायपुँश्च्चलूम्।। नर्म्मायपुँश्च्चलूꣳहसायकारिँय्यादसेशा

बल्ल्याङ्ग्ग्रामण्ण्यङ्गणकमभिक्क्रोशकन्तान्महसेव्वीणावादम्पाणिग्घ्नन्तूणवद्ध्मन्तान्नृत्तायानन्दा

यतलवम्।।२०।। अग्ग्नयेपीवानम्।। अग्ग्नयेपीवानम्पृथिव्व्यैपीठसर्प्पिणंव्वायवेचाण्डाल

मन्तरिक्क्षायव्वꣳशनर्त्तिनन्दिवेखलतिꣳसूर्य्यायहर्य्यक्क्षन्नक्क्षत्रेब्भ्यःकिर्म्मिरञ्चन्द्रमसेकिला

समहन्नेशुक्क्लम्पिङ्गाक्क्षꣳरात्र्यैकृष्णम्पिङ्गाक्क्षम्।।२१।। अथैतान्।। अथैतानष्टौव्विरूपा नालभतेतिदीर्घञ्चातिह्रस्वञ्चातिस्त्थूलञ्चातिकृशञ्चातिशुक्क्लञ्चातिकृष्णञ्चातिकुल्ल्व ञ्चातिलोमशञ्च।। अशूद्द्राऽअब्ब्राह्म्मणास्त्तेप्प्राजापत्त्याः।। मागधꣳपुँश्चलीकितवꣳ क्क्लीबोशूद्द्राऽअब्ब्राह्म्मणास्त्तेप्प्राजापत्त्याः।।२२।। (१६–२) इतिश्रीवाजसनेयसंहितायां त्रिंशत्तमोऽध्यायः।।३०।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। सहस्रशीर्षा षोडशा, द्भ्यःसंभृतः षट्, द्वौ द्वाविꣳशतिः (अ ३१ मं. २२ अनु. २)।। हरिःॐ।।

सहस्रशीर्षापुरुषꣳ। सहस्राक्क्षꣳसहस्रपात्।। सभूमिꣳसर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम्।।१।। पुरुषऽएव।। पुरुषएवेदꣳसर्व्वंय्यद्भ्दूतँय्यच्चभाव्व्यम्।। उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ।।२।। एतावानस्य। महिमातोज्ज्यायाँश्च्चपूरुषꣳ।। पादोस्यव्विश्श्वाभूतानित्त्रिपादस्या मृतन्दिवि ।।३।। त्रिपादूद्ध्र्वꣳ।। त्रिपादूद्ध्र्वऽउदैत्पुरुषꣳपादोस्येहाभवत्पुनः।। ततोव्विष्ष्वङ् व्व्यक्क्रामत्त्साशनानशनेऽअभि।।४।। ततोव्विराट्।। ततोव्विराडजायतव्विराजोऽअधिपूरुषꣳ।।

सजातोऽअत्त्यरिच्च्यतपश्च्चाद्भूमिमथोपुरः।।५।। तस्म्माद्यज्ज्ञात्।। तस्म्माद्यज्ज्ञात्त्स
र्व्वहुतꣳसम्भृतम्पृषदाज्ज्यम्।। पशूँस्ताँश्च्चक्क्रेव्वायव्व्यानारण्ण्याग्ग्राम्म्याश्च्चये।।६।।
तस्म्माद्यज्ज्ञात्।। तस्म्माद्यज्ज्ञात्त्सर्व्वहुतऽऋचꣳसामानिजज्ज्ञिरे।। छन्दाꣳसिजज्ज्ञिरेतस्म्माद्य
जुस्त्तस्म्मादजायत।।७।। तस्म्मादश्श्वाः।। तस्म्मादश्श्वाऽअजायन्तयेकेचोभयादतः।।
गावोहजज्ज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः।।८।। तँय्यज्ज्ञम्।। तँय्यज्ज्ञम्बर्हिषिप्प्रौक्क्षन्न्पुरुष
ञ्जातमग्ग्रतः।। तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्च्चये।।९।। यत्पुरुषम्।। यत्पुरुषंव्व्यदधुःकति
धाव्व्यकल्प्पयन्।। मुखङ्किमस्यासीत्त्किम्बाहूकिमूरूपादाऽउच्च्येते।।१०।। ब्राह्म्मणोस्य।।
ब्राह्म्मणोस्य्मुखमासीद्द्बाहूराजन्न्यःकृतः।। ऊरूतदस्ययद्वैश्श्यःपद्भ्याꣳशूद्द्रोऽअजायत
।।११।। चन्द्रमामनसः।। चन्द्रमामनसोजातश्च्चक्क्षोःसूर्य्योऽअजायत।। श्रोत्त्राद्वायुश्च्च
प्प्राणश्च्चमुखादग्ग्निरजायत।।१२।। नाभ्भ्याऽआसीत्।। नाभ्भ्याऽआसीदन्तरिक्क्षꣳशीर्ष्ष्णो
द्द्यौःसमवर्त्तत।। पद्भ्याम्भूमिर्द्दिशःश्रोत्त्रात्तथालोकाँ२।।ऽअकल्प्पयन् ।।१३।। यत्पुरुषेण।।

हविषादेवायज्ज्ञमतन्न्वत।। व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्ष्मऽइद्ध्मःशरद्धविः।।१४।। सप्प्तास्यासन्
।। सप्प्तास्यासन्परिधयस्त्रिःसप्प्तसमिधः कृताः।। देवायद्यज्ज्ञन्तन्न्वानाऽअबद्ध्नन्पुरुष
म्पशुम्।।१५।। यज्ज्ञेनयज्ज्ञम्।। यज्ज्ञेनयज्ज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यासन्।।
तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाद्ध्याःसन्तिदेवाः।।१६।। (१६-१) अद्ध्भ्यःसम्भृतः।
पृथिव्व्यैरसाच्चव्विश्श्वकर्म्मणःसमवर्त्तताग्ग्रे।। तस्यत्त्वष्ट्टाव्विदधद्द्रूपमेतितन्मर्त्त्यस्यदेवत्त्व
माजानमग्ग्रे।।१७।। व्वेदाहम्।। व्वेदाहमेतम्पुरुषम्महान्तमादित्त्यवर्ण्णन्तमसःपरस्त्तात्।।
तमेवव्विदित्त्वातिमृत्त्युमेतिनान्न्यःपन्थाव्विद्यतेयनाय।।१८।। प्रजापतिश्च्चरति।। प्रजापति
श्च्चरतिगर्ब्भेऽअन्तरजायमानोबहुधाव्विजायते।। तस्ययोनिम्परिपश्श्यन्तिधीरास्त्तस्मिन्न्हत
स्त्थुर्भुवनानिव्विश्श्वा।।१९।। योदवेब्भ्यः।। योदेवेब्भ्यऽआतपतियोदेवानाम्पुरोहितः।।
पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायब्ब्राह्म्मये।।२०।। रुचम्ब्राह्म्मम्।। रुचम्ब्राह्म्मञ्जनयन्तो
देवाऽअग्ग्रेतदब्ब्रुवन्।। यस्त्त्वैवम्ब्राह्म्मणोव्विद्यात्तस्यदेवाऽअसन्न्वशे।।२१।। श्रीश्च्च।।

श्रीश्च्चतेलक्ष्मीश्च्चपत्क्न्यावहारोत्त्रेपाश्श्र्वेनक्क्षत्राणिरूपमश्श्विनौव्व्यात्तम्।। इष्ण्णन्नि

षाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण।।२२।। (६-२)।। इतिश्रीवाजसनेयसंहिताया

मेकत्त्रिंशोऽध्यायः।।३१।। ।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। तदेव सप्त, व्वेनस्तन्नव,

द्वौ षोडश (अ. ३२ मं. १६ अनु. २)।। हरिःॐ।। तदेव।। तदेवाग्ग्निस्त्तदादित्त्यस्त्तद्वायुस्त्तदु

चन्द्रमाः।। तदेवशुक्क्रन्तद्ब्रह्म्मताऽआपःसप्प्रजापतिः।।१।। सर्व्वेनिमेषाः।। सर्व्वेनिमेषा

जज्ज्ञिरेव्विद्द्युतःपुरुषादधि।। नैनमूर्द्धन्नतिर्य्यञ्चन्नमद्ध्येपरिजग्ग्रभत्।।२।। नतस्य।

प्प्रतिमाऽअस्त्तियस्यनाममहद्यशः।। हिरण्ण्यगर्भऽइत्त्येषमामाहिᳩसीदित्त्येषायस्म्मान्नजातऽ

इत्त्येषः।।३।। एषोह। देवःप्प्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्ब्भेऽअन्तः।। सऽएवजातःसज

निष्ष्यमाणःप्प्रत्त्यङ्जनास्त्तिष्ठ्ठतिसर्व्वतोमुखः।।४।। यस्म्माज्ज्जातम्।। यस्म्माज्ज्जातन्नपुरा

किञ्चनैवयऽआबभूवभुवनानिव्विश्श्वा।। प्रजापतिःप्प्रजयासᳩरराणस्त्रीणिज्ज्योतीᳫषिसचतेस

षोडशी ।।५।। येनद्यौः।। येनद्यौरुग्ग्रापृथिवीचदृढायेनस्वस्त्तभितँय्येननाकः।।

योऽअन्तरिक्षेरजसोव्विमानꣳकस्म्मैदेवायहविषाव्विधेम।।६।। यडङ्क्रन्दसी।। यङ्क्रन्दसीऽ
अवसातस्त्तभानेऽअब्भ्यैक्क्षेताम्मनसारेजमाने।। यत्राधिसूरऽउदितोव्विभातिकस्म्मैदेवायहविषा
व्विधेम।। आपोहयद्द्बृहतीर्य्यश्चिच्चदापः।।७।। (७-१) व्वेनस्त्तत्।। व्वेनस्त्तत्त्पश्श्य
न्निहितङ्गुहासद्द्यत्रव्विश्श्वम्भवत्त्येकनीडम्।। तस्म्मिन्निदꣳसञ्चव्विचैतिसर्व्वꣳसऽओतꣳप्प्रोत
श्च्चव्विभूःप्प्रजासु।।८।। प्रतत्।। प्रतद्द्वोचेदमृतन्नुव्विद्द्वान्न्गन्धर्व्वोधामव्विभृतङ्गुहासत्।।
त्रीणिपदानिनिहितागुहास्स्ययस्त्तानिव्वेदसपितुःपितासत्।।९।। सनः।। सनोबन्धुर्ज्जनिता
सव्विधाताधामानिव्वेदभुवनानिविश्श्वा।। यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नद्ध्यैरयन्त
।।१०।। परीत्त्यभूतानि। परीत्त्यलोकान्न्परीत्त्यसर्व्वाःप्प्रदिशोदिशश्च्च।। उपस्त्थायप्प्रथमजा
मृतस्स्यात्क्मनात्क्मानमभिसंविवेश।।११।। परिद्द्यावापृथिवी। सद्द्यऽइत्त्वापरिलोकान्न्परिदिशꣳ
परिस्स्वः।। ऋतस्स्यतन्तुंव्विततंव्विचृत्त्यतदपश्श्यत्तदभवत्तदासीत्।।१२।। सदसस्प्पतिम्।।
सदसस्प्पतिमद्द्भुतम्प्प्रियमिन्द्रस्स्यकाम्म्यम्।। सनिम्मेधामयासिषꣳस्वाहा।।१३।। याम्मेधाम्।।

याम्मेधान्देवगणाः पितरश्च्चोपासते।। तयामामद्द्यमेधयाग्ग्नेमेधाविनङ्कुरुस्वाहा।।१४।। मेधाम्मे
।। मेधाम्मेव्वरुणोददातुमेधामग्निःप्प्रजापतिः।। मेधामिन्द्रश्च्चव्वायुश्च्चमेधान्धाताददातुमे
स्वाहा।।१५।। इदम्मे।। इदम्मेब्ब्रह्म्मंचक्क्षत्रञ्च्चोभेश्श्रियमश्न्नुताम्।। मयिदेवादधतुश्श्रियमुत्त
मान्तस्यैतेस्वाहा।।१६।। (९-२) ।। इतिश्रीवाजसनेयसंहितायां द्वात्रिंशोऽध्यायः।।३२।।

श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। अस्याजरासः सप्तदशा, पश्च्चित् द्वादश, व्विब्भ्राट्
चतुर्द्दश, प्रवावृजऽएकादश, प्रवायुं पञ्च्चदश, प्रवीरया पञ्च्चदश, ऽआनस्त्रयोदश, सप्त
सप्तनवतिः।। (अ. ३३ मं. ९७ अनु.७) हरिःॐ।। अस्याजरासः।। अस्याजरासोदमामरित्त्राऽ
अर्च्चद्धूमासोऽअग्ग्नयः पावकाः।। श्वितीचयः श्श्वात्त्रासोभुरण्ण्यवोव्वनर्षदोव्वायवोनसोमाः
।।१।। हरयोधूमकेतवः।। हरयोधूमकेतवोव्वातजूताऽउपद्द्यवि।। यतन्तेवृथगग्ग्नयः।।२।।
यजानः।। यजानोमित्त्रावरुणायजादेवाँ२।।ऽऋतम्बृहत्।। अग्ग्नेयक्क्षिस्वन्दमम्।।३।।
युक्क्ष्वाहि। देवहूतमाँ२।।ऽअश्श्वाँ२।।ऽअग्ग्नेरथीरिव।। निहोतापूर्व्यःसदः।।४।। द्वेव्विरूपे।

चरतꣳस्वर्त्थेऽअन्न्यान्न्याँव्वत्त्समुपधापयेते।। हरिरन्न्यस्याम्भवतिस्वधावाञ्छुक्क्रोऽअन्न्यस्यान्द
दृशेसुवर्च्चाः।।५।। शतम्।।१७००।। अयमिह। प्प्रथमोधायिधातृभिर्होतायजिष्ठो
ऽअद्ध्वरेष्ष्वीड्यः।। यमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्व्वंव्विशेविशे।।६।। त्रीणिशता।
त्त्रीसहस्राण्ण्यग्ग्निन्त्त्रिꣳशच्चदेवानवचासपर्य्यन्।। औक्क्षन्घृतैरस्तृणन्बर्हिरस्म्माऽआदिद्धो
तारन्न्यसादयन्त।।७।। मूर्द्धानन्दिवः।। मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्यावैश्श्वानरमृतऽआजा
तमग्ग्निम्।। कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्त्रञ्जनयन्तदेवाः।।८।। अग्ग्निर्व्वृत्राणि।
जङ्घनद्द्रविणस्युर्व्विपन्न्यया।। समिद्धꣳशुक्क्रऽआहुतः।।९।। व्विश्श्वेभिःसोम्म्यम्।। व्विश्श्वे
भिःसोम्म्यम्मद्ध्वग्ग्नऽइन्द्रेणव्वायुना।। पिबामित्त्रस्यधामभिः।।१०।। आयत्।। आयदिषेनृपति
न्तेजऽआनट्टशुचिरेतोनिषिक्क्तन्द्यौरभीके।। अग्ग्निःशर्द्धमनवद्द्यँय्युवानꣳस्वाद्ध्यञ्जनयत्त्सूद
यच्च।।११।। अग्ग्नेशर्द्ध। महतेसौभगायतवद्द्युम्म्नान्न्युत्तमानिसन्तु।। सञ्जास्पत्त्यꣳसुयममा
कृणुष्ष्वशत्त्रूयतामभितिष्ठामहाꣳसि।।१२।। त्वाꣳहि। मन्द्रतममर्क्कशोकैर्व्ववृमहेमहिनः

श्रोष्ष्यंग्ग्ने।। इन्द्रन्नत्त्वाशवसादेवताव्वायुम्पृणन्तिराधसानृतमाः।।१३।। त्वेऽअग्ग्ने। स्वाहुत
प्प्रियास÷सन्तुसूरय÷।। यन्तारोयेमघवानोजनानामूर्व्वान्दयन्तगोनाम्।।१४।। श्रुधिश्श्रुत्त्कर्ण्ण।।
श्रुधिश्श्रुत्त्कर्ण्णव्वह्निन्भिर्द्देवैरग्ग्नेसयावभिः।। आसीदन्तुबर्हिषिमित्त्रोऽअर्य्यमाप्प्रातर्य्यावाणो
ऽअद्ध्वरम्।।१५।। व्विश्श्वेषामदितिः।। व्विश्श्वेषामदितिर्य्यज्ज्ञियानांव्विश्श्वेषामतिथिर्म्मानु
षाणाम्। अग्ग्निर्द्देवानामवऽआवृणानः सुमृडीकोभवतुजातवेदाः।।१६।। महोऽअग्ग्नेः। समिधान
स्यशर्म्मण्ण्यनागामित्त्रेव्वरुणेस्वस्त्तये।। श्रेष्ट्ठेस्यामसवितुः सवीमनितद्देवानामवोऽअद्द्याव्वृणी
महे।।१७।। (१७-१) आपश्चिचत्।। आपश्चिचत्त्पिप्प्युस्त्तर्य्योनगावोनक्क्षन्नृतञ्जरितारस्त्त
ऽइन्द्र।। याहिव्वायुर्न्ननियुतोनोऽअच्छात्त्वहिधीभिर्द्दयसेव्विवाजान्।।१८।। गावऽउप।।
गावऽउपावतावतम्महीयज्ज्ञस्यरप्प्सुदा।। उभाकर्ण्णाहिरण्ण्यया।।१९।। यदद्द्य। सूरऽउदितेनागा
मित्त्रोऽअर्य्यमा।। सुवातिसविताभग÷।।२०।। आसुतेसिञ्चतश्श्रियहरादस्योरभिश्श्रियम्।।
रसादधीतव्वृषभम्।। तम्प्रत्क्नथायंव्वेनः।।२१।। आतिष्ट्ठन्तम्परि।। आतिष्ट्ठन्तम्परिविश्श्वे

ऽअभूषञ्छ्रियोव्वसानश्च्चरतिस्वरोचिः।। महत्तद्वृष्णोऽअसुरस्यनामाव्विश्श्वरूपोऽअमृतानित

स्त्थौ।।२२।। प्रवः।। प्रवोमहेमन्दमानायान्धसोच्चर्चाव्विश्श्वानरायव्विश्श्वाभुवे।। इन्द्रस्ययस्य

सुमखꣳसहोमहिश्श्रवोनृम्म्णञ्चरोदसीसपर्य्यतः।।२३।। बृहन्नित्।। बृहन्निदिद्ध्मऽएषाम्भूरिश

स्त्तम्पृथुꣳस्वरुः।। येषामिन्द्रोयुवासखा।।२४।। इन्द्रेहि।। इन्द्रेहिमत्त्स्यन्धसोव्विश्श्वेभिꣳसोम

पर्व्वभिः।। महाँ२।।ऽअभिष्टिरोजसा।।२५।। इन्द्रोव्वृत्रम्।। इन्द्रोव्वृत्रमवृणोच्छर्द्धनीतिः

प्प्रमायिनाममिनाद्वर्प्पणीतिः।। अहन्व्व्युꣳसमुशधग्ग्वनेष्ष्वाविर्द्धेनाऽअकृणोद्राम्म्याणाम्

।।२६।। कुतस्त्वम्।। कुतस्त्वमिन्द्रमाहिनꣳसन्नेकोयासिसत्त्पतेकिन्तऽइत्था।। सम्पृच्छसेसमराणꣳ

शुभानैर्व्वोचेस्तन्नोहरिवोयत्तेऽअस्म्मे।। महाँ२।।ऽइन्द्रोयऽओजसाकदाचनस्तरीरसिकदाचन

प्प्रयुच्छसि।।२७।। आतत्।। आतत्तऽइन्द्रायवः पनन्ताभियऽऊर्व्वङ्गोमन्तन्तितृत्त्सान्।। सकृत्स्वꣳ

य्येपुरुपुत्राम्महीꣳसहस्रधाराम्बृहतीन्दुदुक्षन्।।२८।। इमान्ते।। इमान्तेधियम्प्रभरेमहोमहीमस्य

स्त्तोत्त्रेधिषणायत्तऽआनजे।। तमुत्त्सवेचप्प्रसवेचसासहिमिन्द्रन्देवासꣳशवसामदन्ननु।।२९।।

(१२-२) व्विब्भ्राड्बृहत्।। व्विब्भ्राड्बृहत्त्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधद्यज्ज्ञपतावविह्रुतम्।। व्वातजूतोयोऽअभिरक्क्षतित्क्मनाप्प्रजाः पुपोषपुरुधाव्विराजति।।३०।। उदुत्त्यम्।। उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः।। दृशेव्विश्श्वायसूर्य्यम्।।३१।। येनापावक।। येनापावकचक्क्षसा भुरण्यन्तञ्जनाँ२।।ऽअनु।। त्वंव्वरुणपश्श्यसि।।३२।। दैव्व्यावद्ध्वर्य्यू।। दैव्वयावद्ध्वर्य्यूऽआगतꣳ रथेनसूर्य्यत्त्वचा।। मद्ध्वायज्ज्ञꣳसमञ्जाथे।। तम्प्रत्क्नथायंव्वेनाश्च्चित्रन्देवानाम्।।३३।। आनः।। आनऽइडाभिर्व्विदथेसुशस्त्तिव्विश्श्वानरꣳसवितादेवऽएतु।। अपियथायुवानोमत्त्सथानोव्विश्श्वञ्जगदभिपित्त्वेमनीषा।।३४।। यदद्य। कच्चव्वृत्रहन्नुदगाऽअभिसूर्य्य।। सर्व्वन्तदिन्द्रते व्वशे।।३५।। तरणिर्व्विश्श्वदर्शतः।। तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य।। व्विश्श्वमाभासिरोचनम्।।३६।। तत्सूर्य्यस्य। देवत्त्वन्तन्म्महित्त्वम्मद्ध्याकर्त्तोर्व्विततꣳसञ्जभार।। यदेदयुक्क्तहरितःसधस्त्थाद्द्रात्त्रीव्वासस्त्तनुतेसिमस्म्मै।।३७।। तन्म्मित्त्रस्य।। तन्म्मित्त्रस्यव्वरुणस्याभिचक्क्षेसूर्य्यो रूपङ्कृणुतेद्द्योरुपस्त्थे।। अनन्तमन्न्यद्द्रुशदस्यपाजःकृष्ण्णमन्न्यद्धरितꣳसम्भरन्ति।।३८।।

बण्णमहान्।। बण्णमहाँ२।।ऽअसिसूर्य्यबडादित्त्यमहाँ२।।ऽअसि।। महस्त्तेसतोमहिमापनस्य
तेद्धादेवमहाँ२।।ऽअसि।।३९।। बट्ट्सूर्य्य।। बट्ट्सूर्य्यश्श्रवसामहाँ२।।ऽअसिसत्रादेवमहाँ२।।
ऽअसि।। मह्न्नादेवानामसुर्य्युं पुरोहितोव्विभुज्ज्योतिरदाब्भ्यम्।।४०।। श्रायन्तऽइवसूर्य्यम्।।
श्रायन्तऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्क्षत।। व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम
।।४१।। अद्द्यादेवाः।। अद्द्यादेवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृतानिरवद्द्यात्।। तन्नोमित्त्रो
व्वरुणोमामहन्तामदितिः सिन्धुं पृथिवीऽउतद्द्यौः।।४२।। आकृष्णणेन।। आकृष्णणेनरजसा
व्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च।। हिरण्ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन्।।४३।।
(१४-३) प्रवावृजे। सुप्प्रयाबर्हिरिषामाविश्प्पतीवबीरिटऽइयाते।। व्विशामक्क्तोरुषसं
पूर्व्वहूतौव्वायुः पूषास्वस्त्तयेनियुत्त्वान्।।४४।। इन्द्रवायूबृहस्प्पतिम्।। इइन्द्रवायूबृहस्प्पति
म्मित्राग्निम्पूषणम्भगम्।। आदित्त्यान्मारुतङ्गणम्।।४५।। व्वरुणः प्राविता। भुवन्मित्त्रो
व्विश्श्वाभिरूतिभिः।। करतान्नः सुराधसः।।४६।। अधिनः।। अधिनऽइन्द्रैषांव्विष्णणोसजात्त्यु

नाम्।। इतामरुतोऽअश्विना।। तम्प्रत्नकथायंव्वेनोयेदेवासऽआनऽइडाभिर्व्विश्श्वेभिःसोम्म्य म्मदद्ध्वोमासश्च्चर्षणीधृतः।।४७।। अग्ग्नऽइन्द्र।। अग्ग्नऽइन्द्रव्वरुणमित्त्रदेवाःशर्द्धःप्प्रयन्तमारु तोतव्विष्णणो।। उभानासत्त्यारुद्द्रोऽअधग्ग्नाःपूषाभगःसरस्वतीजुषन्त।।४८।। इन्द्राग्ग्नीमित्त्रा वरुणा।। इन्द्राग्ग्नीमित्त्रावरुणादितिॅस्वः पृथिवीन्द्याम्मरुतःपर्व्वताँ२।।ऽअपः।। हुवेव्विष्णणु म्पूषणम्ब्रह्म्मणस्प्पतिम्भगन्नुशꣳसꣳसवितारमूतये।।४९।। अस्म्मेरुद्द्राः।। अस्म्मेरुद्द्रामेहना पर्व्वतासोव्वृत्त्रहत्त्येभरहूतौसजोषाः।। यःशꣳसतेस्तुवतेधायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२।। ऽअवन्तुदेवाः।।५०।। अर्व्वाञ्चोअद्द्य।। अर्व्वाञ्चोऽअद्द्याभवतायजत्त्राऽआवोहार्द्दिभयमानो व्व्ययेयम्।। त्राद्ध्वन्नोदेवानिजुरोव्वृकस्यत्त्राद्ध्वङ्कर्त्तादवपदोयजत्त्राः।।५१। व्विश्श्वेऽअद्द्य। मरुतोव्विश्श्वऽऊतीव्विश्श्वेभवन्त्वग्ग्नयःसमिद्धाः।। व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्व मस्त्तुद्द्रविणंव्वाजोऽअस्म्मे।।५२।। व्विश्श्वेदेवाः। शृणुतेमꣳहवम्मेयेऽअन्तरिक्क्षेयऽउपद्द्यविष्ठ ।। येऽअग्ग्निजिह्व्वाऽउतवायजत्त्राऽआसद्द्यास्म्मिन्बर्हिषिमादयद्ध्वम्।।५३।। देवेब्भ्योहि।

प्प्रथमँय्यज्ज्ञियेब्भ्योमृतत्त्वꣳसुवसिंभागमुत्तमम्।। आदिद्दामानꣳसवितर्व्व्यूर्ण्णुषेनूचीनाजीवि

तामानुषेब्भ्यः।।५४।। (११-४) प्रवायुम्।। प्रवायुमच्छाबृहतीमनीषाबृहद्द्रयिं

व्विश्श्ववारꣳरथप्प्राम्।। द्युतद्द्यामानियुतःपत्त्यमानःकविꣳकविमियक्क्षसिप्प्रयज्ज्यो।।५५।।

इन्द्रव्वायूऽइमे। सुताऽउपप्प्रयोभिरागतम्।। इन्दवोवामुशन्तिहि।।५६।। मित्त्रꣳहुवे। पूतदक्क्षं

व्वरुणञ्चरिशादसम्।। धियङ्घृताचीꣳसाधन्ता।।५७।। दस्राुवाकवः। सुतानासत्त्याव्वृक्क्त

बर्हिषः।। आयातꣳरुद्द्रवर्त्तनी।। तम्प्रत्नकथायंव्वेनः।।५८।। व्विदद्यदी।। व्विदद्यदीसरमा

रुग्ग्णमद्द्रेर्म्महिपाथः पूर्व्व्यꣳसद्ध्यक्कः।। अग्ग्रन्नयत्सुपद्द्यक्क्षराणामच्छारवम्प्रथमाजानती

गात्।।५९।। नहिस्प्पशम्।। नहिस्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः।। एमेनम

वृधन्नमृताऽअमर्त्त्यंव्वैश्श्वानरङ्क्षैत्त्रजित्त्यायदेवाः।।६०।। उग्ग्राव्विघनिना।। उग्ग्राव्विघनिनामृध

ऽइन्द्राग्ग्नीहवामहे।। तानोमृडातऽईदृशे।।६१।। उपास्म्मै। गायतानरःपवमानायेन्दवे।।

अभिदेवाँ२।।ऽइयक्क्षते।।६२।। येत्त्वा।। हिहत्त्येमघवन्नवर्द्धन्न्येशाम्बरेहरिवोयेगविष्टौ।।

येत्त्वानूनमनुमदन्तिव्विप्प्राःपिबेन्द्रसोमꣳसगणोमरुद्भिः।।६३।। जनिष्ठाऽउग्ग्रः। सहसेतुरायम
रायमन्द्रऽओजिष्ठोबहुलाभिमानः।। अवर्द्धन्निन्द्रम्मरुतश्चिच्चदत्त्रमातायद्वीरन्दधनद्धनिष्ठा
।।६४।। आतु।। आतूनऽइन्द्रवृत्रहन्नस्म्माकमर्द्धमागहि।। महान्म्महीभिरूतिभिः।।६५।। त्वमिन्द्र
।। त्वमिन्द्रप्प्रतूर्त्तिष्ष्वभिविश्श्वाऽअसिस्पृधः।। अशस्तिहाजनिताव्विश्श्वतूरसित्त्वन्तूर्य्यत
रुष्ष्यतः।।६६।। अनुते।। अनुतेशुष्म्मन्तुरयन्तमीयतुःक्षोणीशिशुन्नमातरा।। व्विश्श्वास्त्तेस्पृधः
श्नथयन्तमन्न्यवेव्वृत्त्रँय्यदिन्द्रतूर्व्वसि।।६७।। यज्ज्ञोदेवानाम्।। यज्ज्ञोदेवानाम्प्रत्त्येतिसुम्म्नमा
दित्त्यासोभवतामृडयन्तः।। आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्चिद्द्याव्वरिवोवित्तरासत् ।।६८ ।।
अदब्धेभिःसवितः। पायुभिष्ट्वꣳशिवेभिरद्द्यपरिपाहिनोगयम्।। हिरण्ण्यजिह्व्वःसुवितायनव्व्य
सेरक्क्षामाकिर्न्नोऽअघशꣳसऽईशत।।६९।। (१५-५) प्रवीरया। शुचयोददिद्रेवामद्ध्वर्य्युभिर्म्मधु
मन्तःसुतासः।। व्वहव्वायोनियुतोयाह्यच्छापिबासुतस्यान्धसोमदाय।।७०।। गावऽउप।। गावऽउ
पावतावतम्महीयज्ज्ञस्यरप्प्सुदा।। उभाकर्ण्णाहिरण्ण्यया ।।७१।। काव्व्ययोराजानेषु।। काव्व्य

योराजानेषुक्क्रत्त्वादक्षस्यदुरोणे।। रिशादसासधस्त्थऽआ ।।७२।। दैव्व्यावद्ध्वर्य्यू।। दैव्व्यावद्ध्व

र्य्यूऽआगतहृरथेनसूर्य्यत्त्वचा।। मद्ध्वायज्ज्ञहृसमञ्जाथे ।। तम्प्रत्नकथायंव्वेनः ।।७३।।

तिरश्च्चीनोव्विततहं।। तिरश्च्चीनोव्विततोरश्श्मिरेषामधः स्विदासी३दुपरिस्विदासी३त्।।

रेतोधाऽआसन्म्महिमानऽआसन्त्स्वधाऽअवस्त्तात्त्प्रयतिहंपरस्त्तात् ।।७४।। आरोदसी।। आरोदसी

ऽअपृणदास्वर्म्महज्ज्जातँय्यदेनमपसोऽअधारयन्।। सोऽअद्ध्वरायपरिणीयतेकविरत्त्योनव्वाजसातये

चनोहितः।।७५।। उक्त्थेभिर्व्वृत्रहन्तमा।। उक्त्थेभिर्व्वृत्रहन्त मायामन्दानाचिदागिरा।। आङ्गूषैरा

विवासतहं।।७६।। उपनहं। सूनवोगिरः शृण्ण्वन्त्वमृतस्ययये।। सुमृडीकाभवन्तुनहं।।७७।।

ब्रह्म्माणिमे। मतयहंशहृसुतासहंशुष्म्मऽइयर्त्तिप्प्रभृतोमेऽअद्रिः।। आशासतेप्प्रतिहर्य्यन्त्युक्त्थे

माहरीव्वहतस्त्तानोऽअच्छ।।७८।। अनुत्तमाते। मघवन्नकिर्न्नुनत्त्वावाँ२।।ऽअस्त्तिदेवताव्विदानहं।।

नजायमानोनशतेनजातोयानिकरिष्ष्याकृणुहिप्प्रवृद्ध।।७९।।

तदित्।। तदिदासभुवनेषुज्ज्येष्ठँय्यतोजज्ज्ञऽउग्ग्रस्त्त्वेषनृम्म्णहं।। सद्द्योजज्ज्ञानोनिरिणातिशत्रूननुयं

व्विश्श्वेमदन्त्यूमां॥८०॥ इमाऽउंत्त्वा॥ पुरूवसोगिरोंव्वर्द्धन्तुयाममं॥ पावकवंर्ण्णाशुचंयो

व्विपश्च्चितोभिस्त्तोमैंरनूषत॥८१॥ यस्यायम्॥ यस्यायंव्विश्श्वऽआर्य्योदासं÷शेवधिपा

ऽअरि॥ तिरश्च्चिंदर्य्येरुशमेपवीरविंतुब्भ्येत्त्सोऽअंज्ज्यतेरयि॥८२॥ अयहसहस्रम्॥ अयह

सहस्रमृषिंभिसहंस्कृतसमुद्रऽइंवपप्प्रथे॥ सत्त्यसोऽअंस्यमहिमागृंणेशवोंयज्ज्ञेषुंव्विप्प्रराज्ज्ये

॥८३॥ अदंब्धेभिसवितं। पायुभिष्ट्ट्वशिवेभिंरद्द्यपरिंपाहिनोगयंम्॥ हिरंण्ण्यजिह्व्वं

सुवितायनव्व्यंसेरक्क्षामाकिंन्र्नोऽअघशंसऽईशत॥८४॥ (१५-६) आनं÷॥ आनोंयज्ज्ञन्दिंवि

स्पृशं व्वायोंयाहिसुमन्न्मंभिं॥ अन्तपवित्त्रंऽउपरिंश्श्रीणानोयशुक्क्रोऽअंयामिते॥८५॥

इन्द्रवायूसुंसन्दृशां॥ सुहवेहहंवामहे॥ यथांनसर्व्वऽइज्जनोंनमीवसङ्गमेंसुमनाऽअसंत्॥८६॥

ऋधंगित्त्था। समर्त्यं÷शशमेदेवतांतये॥ योनूनम्मित्त्रावरुंणावभिष्टंयऽआचक्क्रेहव्व्यदांतये

॥८७॥ आयांतम्॥ आयांतमुपंभूषतम्मद्ध्वं÷पिबतमश्श्विना॥ दुग्ग्धम्पयोंव्वृषणाजेन्न्याव

सूमानोंमर्द्धिष्ट्टमागंतम्॥८८॥ प्रैतुं॥ प्रैतुब्ब्रह्म्मंणस्प्पतिप्प्रदेव्व्येतुसूनृतां॥ अच्छांव्वीरन्न

य्यम्पङ्क्तिराधसन्देवायज्ज्ञन्नयन्तुनः।।८९।। चन्द्रमाऽअप्प्सु।। चन्द्रमाऽअप्प्स्वन्तरासुपण्णो
धावतेदिवि।। रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳहरिरेतिकनिक्क्रदत्।।९०।। देवन्देवंव्वः।। देवन्देवं
व्वोवसेदेवन्देवमभिष्ट्टये।। देवन्देवꣳहुवेमव्वाजसातयेगृणन्तोदेव्व्याधिया।।९१।। दिविपृष्ट्टः।।
दिविपृष्ट्टोऽअरोचताग्ग्निव्वैश्श्वानरोबृहन्।। क्ष्मयाव्वृधानऽओजसाचनोहितोज्ज्योतिषाबाधतेतमः
।।९२।। इन्द्राग्ग्नीऽअपात्।। इन्द्राग्ग्नीऽअपादियम्पूर्व्वागात्त्पद्द्वतीब्भ्यः।। हित्त्वीशिरोजिह्व्वया
व्वावदच्चरत्त्रिꣳशत्त्पदान्न्यक्क्रमीत्।।९३।। देवासोहि। ष्म्मामनवेसमन्न्यवोव्विश्श्वेसाकꣳ
सरातयः।। तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुव्वरिवोविदः।।९४।। अपाधमत्।। अपाधमदभि
शस्तीरशस्त्तिहाथेन्द्रोद्द्युम्म्न्याभवत्।। देवास्त्तऽइन्द्रसक्ख्याययेमिरेबृहद्भानोमरुद्द्गण।।९५।।
प्रवः।। प्रवऽइन्द्रायबृहतेमरुतोब्ब्रह्म्मार्च्चत।। व्वृत्रꣳहनतिव्वृत्रहाशतक्क्रतुर्व्वज्ज्रेणशतपर्व्वणा
।।९६।। अस्येत्।। अस्येदिन्द्रोव्वावृधेव्वृष्ण्ण्यꣳशवोमदेसुतस्यव्विष्ण्णवि।। अद्यातमस्य
महिमानमायवोनुष्टुवन्तिपूर्व्वथा।। इमाऽउत्त्वायस्यायमयꣳसहस्रमूर्द्धऽऊषुणः।।९७।। (१३–८)

इतिश्रीवाजसनेयसंहितायां त्रयस्त्रिंशोऽध्यायः।।३३।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। यज्जाग्रतो दश, पञ्चनद्यो दश, सोमोधेनुन्दश, ऽआकृष्णेन दश, पूषन्तव दश, नतदष्टौ, षडष्टपञ्चाशत् (अ.३४ मं. ५८ अनु. ६)।। हरिःॐ।।

यज्जाग्ग्रंतं।। यज्जाग्ग्रंतोदूरमुदैतिदैवन्तदुसुप्प्तस्यतथैवैति।। दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनंःशिवसंङ्कल्प्पमस्तु।।१।। येनकर्म्माणि।। येनकर्म्माण्ण्यपसोमनीषिणोयज्ज्ञेकृण्णवन्तिव्वि दथेषुधीराः।। यदपूर्व्वय्यक्षमन्तःप्प्रजानान्तन्मेमनंःशिवसंङ्कल्प्पमस्तु।।२।। यत्प्रज्ञानम्।। यत्प्रज्ज्ञानमुतचेतोधृतिश्च्चयज्ज्योतिरन्तरमृतम्प्रजासु।। यस्म्मान्नऽऋतेकिञ्चनकर्म्मक्क्रियते तन्मेमनंःशिवसंङ्कल्प्पमस्तु।।३।। येनेदम्।। येनेदम्भूतम्भुवनम्भविष्ष्यत्त्परिगृहीतममृतेनसर्व्वम् ।। येनयज्ज्ञस्तायतेसप्प्तहोतातन्मेमनंःशिवसंङ्कल्प्पमस्तु।।४।। यस्म्मिन्नृचंः।। यस्म्मिन्नृचं सामयजूंषियस्म्मिन्प्रतिष्ठितारथनाभाविवाराः।। यस्मिँश्चिच्चत्तंसर्व्वमोतम्प्रजानान्तन्मे मनंःशिवसंङ्कल्प्पमस्तु।।५।। सुषारथिरश्श्वानिव।। सुषारथिरश्श्वानिवयन्मनुष्ष्यान्नेनीयते

भीशुभिर्व्वाजिनऽइव।। हृत्प्रतिष्ठुन्यदजिरञ्जविष्ठुन्तन्मेमनः शिवसङ्कल्पमस्तु।।६।। पितुन्नु।
स्त्तोषम्महोधर्म्माणन्तवीषीम्।। यस्यत्रितोव्व्योजसाव्वृत्रंव्विपर्व्वमर्द्दयत्।।७।। अन्वित्।।
अन्विदनुमतेत्त्वम्मन्न्यासैशञ्चनस्कृधि।। क्रत्त्वेदक्क्षायनोहिनुप्प्रणऽआयूꣳषितारिषः।।८।।
शतम्।।१८००।। अनुनः।। अनुनोद्द्यानुमतिर्य्यज्ञन्देवेषुमन्न्यताम्।। अग्ग्निश्च्चहव्व्यवाहनो
भवन्तन्दाशुषेमयः।।९।। सिनीवालिपृथुष्टुके।। सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा।।
जुषस्वहव्व्यमाहुतम्प्रजान्देविदिदिड्ढिनः।।१०।। (१-१) पञ्चनद्द्यः।। पञ्चनद्द्यःसरस्वतीम
पियन्तिसस्रोतसः।। सरस्वतीतुपञ्चधासोदेशेभवत्सारित्।।११।। त्वमग्ग्ने। प्प्रथमोऽअङ्गिराऽऋषि
र्द्देवोदेवानामभवःशिवःसखा।। तवव्व्रतेकवयोव्विद्मनापसोजायन्तमरुतोब्भ्राजदृष्टयः।।१२।।
त्वन्नः।। त्वन्नोऽअग्ग्नेतवदेवपायुभिर्म्मघोनोरक्क्षतन्वश्च्चवन्द्य।। त्रतातोकस्यतनयेगवा
मस्यनिमेषꣲरक्क्षमाणस्तवव्व्रते।।१३।। उत्तानायामव। भराचिकित्त्वान्न्सद्द्यः प्प्रवीताव्वृषणञ्ज
जान।। अरुषस्तूपोरुशदस्यपाजऽइडायास्प्पुत्त्रेव्वयुनेजनिष्ट।।१४।। इडायास्त्वा। पदेव्वयन्नाभा

पृथिव्व्याऽअधि।। जातवेदोनिधीमह्यग्ग्नेहव्व्यायव्वोढवे।।१५।। प्रमन्न्हे। शवसानायशूषमा
ङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत्। सुवृक्क्तिभिस्तुवतऽऋग्ग्मियायार्च्चामार्क्कन्नरेव्विश्श्रुताय।।१६।।
प्रवः।। प्रवोमहेमहिनमोभरद्ध्वमाङ्गूष्ष्यᳪशवसानायसाम।। येनानःपूर्व्वेपितरःपदज्ज्ञा
ऽअर्च्चन्तोऽअङ्गिरसोगाऽअविन्दन्।।१७।। इच्छन्तित्त्वा।। सोम्म्यासःसखायःसुन्न्वन्तिसोमन्दधति
प्प्रयाᳩसि ।। तितिक्क्षन्तेऽअभिशस्तिञ्जनानामिन्द्रत्त्वदाकश्च्चनहिप्प्रकेतः।।१८।। नते।
दूरेपरमाचिद्द्रजाᳩस्यातुप्प्रयाहिहरिवोहरिब्भ्याम्।। स्थिरायव्वृष्ष्णेसवनाकृतेमायुक्क्ताग्ग्रावाण
ःसमिधानेऽअग्ग्नौ ।।१९।। अषाढँय्युत्त्सु। पृतनासुपप्प्रिᳩस्वर्षामप्प्सांव्वृजनस्यगोपाम्।।
भरेषुजाᳩसुक्क्षितिᳪसुश्श्रवसञ्जयन्तन्त्वामनुमदेमसोम।।२०।। (१०-२) सोमोधेनुम्।।
सोमोधेनुᳪसोमोऽअर्व्वन्तमाशुᳪसोमोव्वीरङ्कर्म्मण्ण्यन्ददाति।। सादन्न्यंव्विदत्थ्यᳪसभेयम्पितृ
श्श्रवणँय्योददाशदस्म्मै।।२१।। त्वमिमाः।। त्वमिमाऽओषधीःसोमव्विश्श्वास्त्वमपोऽअजन
यस्त्वङ्गाः ।। त्वमाततन्थोर्व्वन्तरिक्क्षन्त्वञ्ज्योतिषाव्वितमोव्ववर्त्थ।।२२।। देवेननः।। देवेननोम

नसादेवसोमरायोभागहंसंहसावन्नभियुद्ध्य।। मात्त्वातनदीशिंषेव्वीर्य्यंस्योभयेब्भ्यह्प्प्रचिकित्त्सागविष्ट्टौ।।२३।। अष्ट्टौव्वि।। अष्ट्टौव्व्यक्ख्यत्त्ककुभः पृथिव्व्यास्त्रीधन्न्वयोजनासप्प्तसिन्धून्। हिरण्ण्याक्षःसंवितादेवऽआगाद्दधद्द्रत्क्नादाशुषे व्वाय्र्याणि।।२४।। हिरण्ण्यपाणिह्सविता। व्विचर्षणिरुभेद्द्यावापृथिवीऽअन्तरीयते।। अपामीवाम्बाधतेव्वेतिसूर्य्यमभिकृष्ण्णेनरजसाद्द्यामृणोति।।२५।। हिरण्ण्यहस्त्तोऽअसुरः। सुनीथःसुमृडीकःस्ववांयात्त्वर्व्वाङ्।। अपसेधन्नक्षसोयातुधानानस्त्थाद्देवःप्प्रतिदोषङ्गृणानः।।२६।।

येते।। येतेपन्थाहसवितह्पूर्व्वर्यासोरेणवह्सुकृताऽअन्तरिक्क्षे।। तेभिन्नोऽअद्द्यपथिभिःसुगेभीरक्क्षाचनोऽअधिचब्ब्रूहिदेव।।२७।। उभापिबतम्।। उभापिबतमश्श्विनोभानह्शर्म्मयच्छतम्।। अविद्द्रियाभिरूतिभिः।।२८।। अप्प्नस्वतीमश्श्विना।। अप्प्नस्वतीमश्श्विनाव्वाचमस्म्मेकृतन्नोदस्स्राव्वृषणामनीषाम्।। अद्द्यूत्त्येवसेनिहव्वयेवांव्वृधेचनोभवतंव्वाजसातौ।।२९।।

द्द्युभिरक्क्तुभिः।। द्द्युभिरक्क्तुभिह्परिपातमस्म्मानरिष्ट्टेभिरश्श्विनासौभगेभिः।। तन्नोमित्त्रेव्वरुणो

मामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः।।३०।। (१०-३) आकृष्ण्णेन।। आकृष्ण्णेनरजसा
व्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च।। हिरण्ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन्।।३१।।
आरात्त्रि।। आरात्त्रिपार्त्थिवःरजःपितुरप्प्रायिधामभिः।। दिवःसदाᳬसिबृहतीव्वितिष्ठस
ऽआत्त्वेषंव्वर्त्ततेतमः।।३२।। उषस्तत्।। उषस्तच्चित्रमाभरास्म्मब्भ्यंव्वाजिनीवति।। येनतो
कञ्चतनयञ्चधामहे।।३३।। प्रातरग्ग्निम्।। प्रातरग्ग्निम्प्रातरिन्द्रंःहवामहेप्प्रातर्म्मित्त्रावरुणा
प्प्रातरश्श्विना।। प्रातर्ब्भगम्पूषणम्ब्रह्म्मणस्प्पतिम्प्रातःसोममुतरुद्द्रंःहुवेम।।३४।। प्रातर्ज्जित
म्भगम्।। प्रातर्ज्जितम्भगमुग्ग्रंःहुवेमव्वयम्पुत्त्रमदितेर्य्योव्विधर्त्ता।। आद्ध्रश्चिचद्यम्मन्न्यमान
स्तुरश्चिचद्द्राजाचिद्यम्भगम्भक्क्षीत्याह।।३५।। भगप्प्रणेतः।। भगप्प्रणेतर्ब्भगसत्त्यराधोभगेमान्धि
यमुदवाददन्नः।। भगप्प्रनोजनयगोभिरश्श्वैर्ब्भगप्प्रनृभिर्न्नृवन्तःस्याम।।३६।। उतेदानीम्।।
उतेदानीम्भगवन्तःस्यामोतप्प्रपित्त्वऽउतमद्ध्येऽअह्न्नाम्।। उतोदितामघवन्त्सूर्य्यस्यव्वयन्देवानाᳬ
सुमतौस्याम।।३७।। भगऽएव। भगवाँ२।।ऽअस्त्तुदेवास्त्तेनव्वयम्भगवन्तःस्याम।। तन्त्वाभगसर्व्व

ऽइज्जोहवीतिसनोभगपुरऽएताभवेह।।३८।। समद्ध्वराय।। समद्ध्वरायोषसोनमन्तदधिक्क्रावेव शुचयेपदाय।। अर्व्वाचीनंव्वसुविदम्भगन्नोरथमिवाश्श्वाव्वाजिनऽआवहन्तु।।३९।। अश्श्वाव तीग्गोमतीः।। अश्श्वावतीग्गोमतीर्न्नऽउषासोव्वीरवतीः सदमुच्छन्तुभद्द्राः।। घृतन्दुहानाव्विश्श्व तः प्प्रपीतायूयंपातस्वास्त्तिभिः सदानः।।४०।। (१०-४) पूषन्तव। व्व्रतेव्वयन्नरिष्ष्येमकदाचन।। स्त्तोतारस्त्तऽइहस्म्मसि।।४१।। पथस्प्पथः परिपतिम्।। पथस्प्पथः परिपतिंव्वचस्याकामेनकृतो ऽअब्भ्यानडर्क्कम्।। सनोरासच्छुरुधश्च्चन्द्राग्ग्राधियन्धियः सीषधातिप्प्रपूषा।।४२।।त्रीणिपदा व्विचक्क्रमेव्विष्ष्णुग्गोपाऽअदाब्भ्यः।। अतोधर्म्माणिधारयन्।।४३।। तद्व्विप्प्रासः।। तद्व्विप्प्रासो व्विपन्नयवोजागृवाᳩसः समिन्धते।। व्विष्ष्णोर्य्यत्त्परमम्पदम्।।४४।। घृतवतीभुवनानाम्।। घृतवतीभुवनानामभिश्श्रियोर्व्वीपृत्थ्वीमधुदुघेसुपेशसा।। द्यावापृथिवीव्वरुणस्यधर्म्मणाव्वि ष्क्कभितेऽअजरेभूरिरेतसा।।४५।। येनः। सपत्न्काऽअपतेभवन्त्विन्द्राग्ग्निब्भ्यामवबाधामहेतान् ।। व्वसवोरुद्द्राऽआदित्त्याऽउपरिस्पृशम्मोग्ग्रञ्चेत्तारमधिराजमक्क्रन्।।४६।। आनासत्त्या।।

त्रिभिरेकादशैरिहदेवेभिर्य्यातम्मधुपेयमश्श्विना।। प्रायुस्त्तारिष्ट्टन्नीरपाँसिमृक्क्षतꣳसेधतन्द्द्वेषो
भवतꣳ सचाभुवा।।४७।। एषवः।। एषवस्त्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यमान्न्यस्यकारोः।।
एषायासीष्ट्टतन्न्वेव्वयांव्विद्द्यामेषंव्वृजनञ्जीरदानुम्।।४८।। सहस्त्तोमाःसहछन्दसः।।
सहस्त्तोमाःसहछन्दसऽआवृतःसहप्प्रमाऽऋषयःसप्प्तदैव्व्याः।। पूर्व्वेषाम्पन्थामनुदृश्श्यधीरा
ऽअन्न्वालेभिरेरत्थ्योनरश्मीन्।।४९।। आयुष्ष्यंव्वर्च्चस्स्यम्।। आयुष्ष्यंव्वर्च्चस्स्यꣳरायस्प्पोष
मौद्भिदम्।। इदꣳहिरण्ण्यंव्वर्च्चस्स्वज्जैत्त्रायाविशतादुमाम्।।५०।। (१०–५) नतत्।।
नतद्द्रक्क्षाँसिनपिशाचास्त्तरन्तिदेवानामोजःप्प्रथमजँह्येतत्।। योबिभर्त्तिदाक्क्षायणꣳ
हिरण्ण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुःसमनुष्ष्येषुकृणुतेदीर्ग्घमायुः।।५१।। यदाबद्ध्नन्।। यदा
बद्ध्नन्दाक्क्षायणाहिरण्ण्यꣳशतानीकायसुमनस्स्यमानाः।। तन्न्मऽआबद्ध्नामिशतशारदाया
युष्म्माञ्जरदष्ट्टिर्य्यथासम्।।५२।। उतनः।। उतनोहिर्ब्बुद्ध्न्यःशृणोत्त्वजऽएकपात्त्पृथिवीसमुद्रः।।
व्विश्श्वेदेवाऽऋतावृधोहुवानास्स्तुतामन्न्त्राःकविशस्त्ताऽअवन्तु।।५३।। इमागिरः।। इमागिर

ऽआदित्त्येब्भ्योघृतस्न्नूꣳसनाद्द्राजब्भ्योजुह्व्वाजुहोमि।। शृणोतुमित्त्रोऽअर्य्यमाभगोनस्तु
विजातोव्वरुणोदक्क्षोऽअꣳशः।।५४।। सप्प्तऽऋषयः।। सप्प्तऽऋषयꣳप्प्रतिहिताꣳशरीरेसप्प्त
रक्क्षन्तिसदमप्प्रमादम्।। सप्प्तापꣳस्वपतोलोकमीयुस्त्तत्रजागृतोऽअस्वप्प्नजौसत्रसदौचदेवौ
।।५५।। उत्तिष्ठ। ब्ब्रह्म्मणस्प्पतेदेवयन्तस्त्वेमहे।। उपप्प्रयन्तुमरुतःसुदानवऽइन्द्रप्प्राशूर्ब्भवा
सचा।।५६।। प्रनूनम्।। प्रनूनम्ब्रह्म्मणस्प्पतिर्म्मन्त्त्रव्वदत्त्युक्क्थ्यम्।। यस्म्मिन्निन्द्रोव्वरुणो
मित्त्रोऽअर्य्यमादेवाऽओकाꣳसिचक्क्रिरे।।५७।। ब्रह्म्मणस्प्पते।। ब्रह्म्मणस्प्पतेत्त्वमस्ययन्ता
सूक्क्तस्यबोधितनयञ्चजिन्न्व।। व्विश्श्वन्तद्भद्द्रँय्यदवन्तिदेवाबृहद्वदेमव्विदथेसुवीराः।।
यऽइमाव्विश्श्वाव्विश्श्वकर्म्मायोनःपितान्नपतेन्नस्यनोदेहि।।५८।। (८–६) इति श्रीवाजसनेय
संहितायां चतुस्त्रिंशोऽध्यायः।।(३४)।। श्रीवेदपुरुषायनमः।। अनुवाकसूत्रम्।। अपेतो दशा,
पाघन्द्वादश, द्वौ द्वाविꣳशतिः (अ. ३५ मं. २२ अनु. २)।। हरिः ॐ।। अपेतः।।
अपेतोयन्तुपणयोसुम्म्नादेवपीयवः।। अस्यलोकःसुतावतः। द्युभिरहोभिरक्क्तुभिर्व्व्यक्क्तँय्य

मोददात्त्ववसानमस्म्मै।।१।। सविताते।। सवितातेशरीरेब्भ्यꣳपृथिव्व्याँल्लोकमिच्छतु।। तस्म्मै
युज्ज्यन्तामुस्रियाꣳ।।२।। व्वायुःपुनातु। सवितापुनात्त्वग्ग्नेर्ब्भ्राजसासूर्य्यस्यव्वर्च्चसा।।
व्विमुच्च्यन्तामुस्रियाꣳ।।३।। अश्श्वत्त्थेवः।। अश्श्वत्त्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्कृता।।
गोभाजऽइत्त्किलासथयत्त्सनवथपूरुषम्।।४।। सविताते।। सवितातेशरीराणिमातुरुपस्त्थऽआवपतु
।। तस्म्मैपृथिविशम्भव।।५।। प्रजापतौत्त्वा। देवतायामुपोदकेलोकेनिदधाम्म्यसौ।। अपनꣳ
शोशुचदघम्।।६।। परम्मृत्त्यो।। परम्मृत्त्योऽअनुपरेहिपन्थाँय्यस्तेऽअन्यऽइतरोदेवयानात्।।
चक्क्षुष्म्मतेशृण्ण्वतेतेब्ब्रवीमिमानःप्प्रजाꣳरीरिषोमोतव्वीरग्न्।।७।। शंव्वातः।। शंव्वातꣳशꣳ
हितेघृणिꣳशन्तेभवन्त्विष्ट्टकाꣳ।। शन्तेभवन्त्वग्ग्नयꣳपार्त्थिवासोमात्त्वाभिशूशुचन्।।८।।
कल्प्पन्तान्ते।। कल्प्पन्तान्तेदिशस्तुब्भ्यमापःशिवतमास्तुब्भ्यम्भवन्तुसिन्धवꣳ।। अन्तरिक्क्षꣳ
शिवन्तुब्भ्यङ्कल्प्पन्तान्तेदिशꣳसर्व्वाः।।९।। अश्म्मन्न्वतीरीयतेसꣳरभद्ध्वमुत्तिष्ठ्ठतप्प्रतरतासखायꣳ
।। अत्त्राजहीमोशिवायेऽअसञ्ज्छिवान्न्वयमुत्तरेमाभिवाजान्।।१०।। (१०–१) अपाघम्।।

अपाघमपकिल्बिषमपकृत्त्यामपोरपः।। अपामार्ग्गत्त्वमस्म्मदपदुःष्वप्प्न्यंसुव।।११।।
सुमित्रियानः।। सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्ट्टियञ्च
व्वयन्द्विष्म्मः।।१२।। अनड्ड्वाहमन्न्वारभामहे।। अनड्ड्वाहमन्न्वारभामहेसौरभेयꣳस्वस्त्तये।।
सनऽइन्द्रऽइवदेवेब्भ्योव्वह्निः सन्तारणोभव।।१३।। उद्वयम्।। उद्द्वयन्तमसस्परिस्वः
पश्श्यन्तऽउत्तरम्।। देवन्देवत्त्रासूर्य्यमगन्न्मज्ज्योतिरुत्तमम्।।१४।। इमञ्जीवेब्भ्यः। परिधिन्द
धामिमैषान्नुगादपरोऽअर्त्थमेतम्।। शतञ्जीवन्तुशरदःपुरूचीरन्तम्मृत्त्युन्दधताम्पर्व्वतेन।।१५।।
अग्ग्नऽआयूꣳषि। पवसऽआसुवोर्ज्जमिषञ्चनः।। आरेबाधस्वदुच्छुनाम्।।१६।। आयुष्म्मानग्ग्ने।
हविषाव्वृधानोघृतप्प्रतीकोघृतयोनिरेधि।। घृतम्पीत्त्वामधुचारुगव्व्यम्पितेवपुत्त्रमभिरक्षता
दिमान्त्स्वाहा।।१७।। परीमे। गामनेषतपर्य्यग्ग्निमहृषत।। देवेष्ष्वक्क्रतश्श्रवःकऽइमाँ२।।ऽआद
धर्षति।।१८।। क्रव्व्यादमग्ग्निम्।। क्रव्व्यादमग्ग्निम्प्रहिणोमिदूरँय्यमराज्ज्यङ्गच्छतुरिप्प्रवाहः।।
इहैवायमितरोजातवेदादेवेब्भ्योहव्व्यंव्वहतुप्प्रजानन्।।१९।। व्वहव्वपाम्।। व्वहव्वपाञ्जातवेदः

पितृभ्योयत्रैनान्वेत्थनिहितान्पराके।। मेदसꣳकुल्ल्याऽउपतान्त्स्रवन्तुसत्त्याऽएषामाशिषꣳसन्न मन्ताꣳस्वाहा।।२०।। स्योनापृथिवि। नोभवानृक्षरानिवेशनी।। यच्छानꣳशर्म्मसप्प्रथाः।। अपनꣳशोशुचदघम्।।२१।। अस्म्मात्त्वम्।। अस्म्मात्त्वमधिजातोसित्त्वदयञ्जायताम्पुनः।। असौस्वर्ग्गायलोकायस्वाहा।।२२।। (१२–२) इति श्रीवाजसनेयसंहितायां पञ्चत्रिंशोऽध्यायः ।।३५।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। ऋचंव्वाचꣳषोडश, द्यौःशान्तिरष्टौ, द्वौ चतुर्व्विꣳशतिः (अ. ३६ मं. २४ अनु. २)।। हरिः ॐ।। ऋचंव्वाचम्।। ऋचंव्वाचम्प्रपद्द्येमनोयजुꣳप्प्रपद्द्येसामप्प्राणम्प्रपद्द्येचक्षुꣳश्रोत्रम्प्रपद्द्ये।। व्वागोजःसहौजो मयिप्प्राणापानौ।।१।। यन्मे। च्छिद्द्रञ्चक्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्प्पतिम्मर्तेदधातु।। शन्नोभवतुभुवनस्ययस्प्पतिः।।२।। भूर्भुवः।। भूर्भुवꣳस्वःतत्त्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्य धीमहि।। धियोयोनःप्प्रचोदयात्।।३।। कयानः।। कयानश्चित्रऽआभुवदूतीसदावृधꣳसखा।। कयाशचिष्ठयाव्वृता।।४।। कस्त्त्वा। सत्त्योमदानाम्मꣳहिष्ठोमत्त्सदन्धसः।। दृढाचिदारुजेव्वसु

।।५।। अभीषुणः।। अभीषुणस्सखीनामविताजरितॄणाम्।। शतम्भवास्यूतिभिः।।६।। कयात्त्वम्
।। कयात्त्वन्नऽऊत्त्याभिप्प्रमन्दसेव्वृषन्।। कयास्त्तोतृब्भ्यऽआभर।।७।। इन्द्रोव्विश्श्वस्य राजति।।
शन्नोऽअस्त्तुद्द्विपदेशञ्चतुष्प्पदे।।८।। शन्नः।। शन्नोमित्त्रः शंव्वरुणः शन्नोभवत्त्वर्य्यमा ।।
शन्नऽइन्द्रोबृहस्प्पतिः शन्नोव्विष्णुरुरुक्क्रमः।।९।। शन्नोव्वातः। पवताᳪशन्नस्त्तपतुसूर्य्यः ।।
शन्नः कनिक्क्रदद्देवः पर्ज्जन्न्योऽअभिवर्षतु।।१०।। अहानिशम्।। अहानिशम्भवन्तुनः शᳬरात्त्रीः
प्प्रतिधीयताम्।। शन्नऽइन्द्राग्ग्नीभवतामवोभिः शन्नऽइन्द्रावरुणारातहव्व्या।। शन्नऽइन्द्रापूषणा
व्वाजसातौशमिन्द्रासोमासुवितायशँय्योः।।११।। शन्नः।। शन्नोदेवीरभिष्ट्टयऽआपोभवन्तुपीतये
।। शँय्योरभिस्स्रवन्तुनः।।१२।। स्योनापृथिवि। नोभवानृक्क्षरानिवेशनी।। यच्छानः शर्म्मसप्प्रथाः
।।१३।। आपोहि। ष्ठामयोभुवस्त्तानऽऊर्ज्जेदधातन।। महेरणायचक्क्षसे।।१४।। योवः।
शिवतमोरसस्त्तस्य्भाजयतेहनः।। उशतीरिवमातरः।।१५।। तस्म्माऽअरम्।। तस्म्माऽअरङ्गमाम
वोयस्यक्क्षयायजिन्न्वथ।। आपोजनयथाचनः।।१६।। (१६-१) द्यौः शान्तिः।। द्यौः

शान्तिरन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः।। व्वनस्पतयःशान्ति
र्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्म्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि।।१७।।
दृतेदृꣳहमा। मित्रस्यमाचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम्।। मित्रस्याहञ्चक्षुषासर्व्वाणि
भूतानिसमीक्षे।। मित्रस्यचक्षुषासमीक्षामहे।।१८।। दृतेदृꣳहमा। ज्योक्क्तेसन्दृशिजीव्व्या
सञ्ज्योक्क्तेसन्दृशिजीव्व्यासम्।।१९।। नमस्त्ते।। नमस्त्तेहरसेशोचिषेनमस्त्तेऽअस्त्त्वर्च्चिषे।।
अन्न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअस्म्मब्भ्यꣳशिवोभव।।२०।। नमस्त्ते। ऽअस्त्तुव्विद्द्युते
नमस्त्तेस्त्तनयित्क्नवे।। नमस्त्तेभगवन्नस्त्तुयतःस्वःसमीहसे।।२१।। यतोयतःसमीहसेततोनो
ऽअभयङ्कुरु।। शन्नःकुरुप्प्रजाब्भ्योभयन्नःपशुब्भ्यः।।२२।। सुमित्त्रियानः।। सुमित्त्रियान
ऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्त्तस्म्मैसन्तुयोस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मः।।२३।। तच्चक्क्षुः।।
तच्चक्क्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत्।। पश्श्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदः
शतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्च्चशरदःशतात्।।२४।। (८–२) इति

श्रीवाजसनेयसंहितायां षट्त्रिंशोऽध्यायः।।३६।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।।
देवस्यत्त्वादश, यमायत्त्वैकादश, द्वा,वेकविꣳशतिः (अ. ३७ मं. २१ अनु.२)।। हरिःॐ।।
देवस्यंत्त्वा। सवितुःप्प्रंसवेश्श्विनोंर्ब्बाहुब्भ्यांम्पूष्ण्णोहस्त्ताब्भ्याम्।। आदंदेनारिंरसि।।१।।
युञ्जतेमनः।। युञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रंस्यबृहतोव्विंपश्चित्तः।। व्विहोत्त्रा
दधेव्वयुनाविदेकऽइन्न्महीदेवस्यंसवितुःपरिंष्टुतिः।।२।। देवींद्यावापृथिवी। मखस्यंवामद्य
शिरोंराद्ध्यासन्देवयजंनेपृथिव्व्याः।। मखायंत्त्वामखस्यंत्त्वाशीर्ष्णे।।३।। देव्व्योंव्वम्म्रः।।
देव्व्योंव्वम्म्रोभूतस्यंप्प्रथमजामखस्यंवोद्यशिरोंराद्ध्यासन्देवयजंनेपृथिव्व्याः।। मखायंत्त्वामख
स्यंत्त्वाशीर्ष्णे।।४।। शतम्।। १९००।। इयत्त्यग्ग्रें।। इयत्त्यग्ग्रेंऽआसीन्न्मखस्यंतेद्य
शिरोंराद्ध्यासन्देवयजंनेपृथिव्व्याः।। मखायंत्त्वामखस्यंत्त्वाशीर्ष्णे।।५।। इन्द्रस्यौजः।।
इन्द्रस्यौजंस्त्थमखस्यंवोद्यशिरोंराद्ध्यासन्देवयजंनेपृथिव्व्याः।। मखायंत्त्वामखस्यंत्त्वाशीर्ष्णे।।
मखायंत्त्वामखस्यंत्त्वाशीर्ष्णे।। मखायंत्त्वामखस्यंत्त्वाशीर्ष्णे।।६।। प्रैतु।। प्रैतुब्ब्रह्म्मंणस्प्पतिः

प्प्रदेव्व्येतुसूनृता।। अच्छाव्वीरन्नर्य्यम्पङ्ङ्क्तिराधसन्देवायज्ज्ञन्नयन्तुनः।। मखायत्त्वामखस्यत्त्वा शीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।।७।। मखस्यशिरः।। मखस्यशिरोसि।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखस्यशिरोसि।। मखायत्त्वामखस्यत्त्वा शीर्ष्णे।। मखस्यशिरोसि।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।।८।। अश्श्वस्यत्त्वा।। अश्श्वस्यत्त्वाव्वृष्ण्णःशक्क्नाधूपयामिदेवयजनेपृथिव्व्याः।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। अश्श्वस्यत्त्वाव्वृष्ण्णःशक्क्नाधूपयामिदेवयजनेपृथिव्व्याः।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। अश्श्वस्यत्त्वाव्वृष्ण्णःशक्क्नाधूपयामिदेवयजनेपृथिव्व्याः।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णो ।।९।। ऋजवेत्त्वा। साधवेत्त्वासुक्षित्त्यैत्त्वा।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।। मखायत्त्वामखस्यत्त्वाशीर्ष्णे।।१०।। (१०-१) यमायत्त्वा।।

मखायंत्त्वासूर्य्यस्यत्त्वातपंसे।। देवस्त्त्वांसवितामद्ध्वानक्क्तुपृथिव्व्याःस७स्पृशंस्प्पाहि।।

अर्च्चिरंसिशोचिरंसितपोसि।।११।। अनांधृष्टापुरस्त्तात्।। अनांधृष्टापुरस्त्तांदग्गनेराधिंपत्त्य

ऽआयुंर्म्मेदाःपुत्त्रवंतीदक्षिणतऽइन्द्रस्याधिंपत्त्येप्प्रजाम्मेंदाः।। सुषदांपश्च्चाद्देवस्यंसवितुराधिं

पत्त्येचक्क्षुंर्म्मेदाऽआश्श्रुंतिरुत्तरतोधातुराधिंपत्त्येरायस्प्पोषंम्मेदाः।। व्विधृंतिरुपरिंष्टाद्बृहस्प्पतेराधिं

पत्त्यऽओजोमेदाव्विश्श्वांब्भ्योमानाष्ट्राब्भ्यंस्प्पाहिमनोरश्श्वांसि।।१२।। स्वाहांमरुद्भिः।।

स्वाहांमरुद्भिःपरिंश्श्रीयस्वदिवःस७स्पृशंस्प्पाहि।। मधुमधुमधुं।।१३।। गब्भोंदेवानांम्।।

गब्भोंदेवानांम्पितामंतीनाम्पतिंःप्प्रजानांम्।। सन्देवोदेवेनंसवित्त्रागंतसःसूर्य्येणरोचते।।१४।।

समग्ग्निः।। समग्ग्निरग्ग्निनांगतसन्दैवेंनसवित्त्रासःसूर्य्येणारोचिष्ट।। स्वाहासमग्ग्निस्त्तपंसागत

सन्दैव्व्येनसवित्त्रासःसूर्य्येणारूरुचत।।१५।। धर्त्तादिवः।। धर्त्तादिवोव्विभांतितपंसस्पृथिव्व्या

न्धर्त्तादेवोदेवानाममंत्तर्यस्त्तपोजाः।। व्वाचंमस्म्मेनियंच्छदेवायुवंम्।।१६।। अपंश्श्यङ्गोपाम्।।

अपंश्श्यङ्गोपामनिंपद्द्यमानमाचपरांचपथिभिश्च्चरंन्तम्।। ससद्ध्रीचीःसव्विषूचीर्व्वसांन ऽआवं

रीवर्त्तिभुवनेष्वन्तः॥१७॥ व्विश्श्वासाम्भुवाम्॥ व्विश्श्वासाम्भुवाम्पतेव्विश्श्वस्यमन
सस्प्पतेव्विश्श्वस्यव्वचसस्प्पतेसर्व्वस्यव्वचसस्प्पते॥ देवश्श्रुत्त्वन्देवघर्म्मदेवोदेवान्पाह्यत्र
प्प्रावीरनुवान्देववीतये॥ मधुमाद्ध्वीब्भ्याम्मधुमाधूचीब्भ्याम्॥१८॥ हृदेत्त्वा॥ हृदेत्त्वामनसेत्त्वा
दिवेत्त्वासूर्य्यायत्त्वा॥ ऊद्ध्वोऽअद्ध्वरन्दिविदेवेषुधेहि॥१९॥ पितानः॥ पितानोसिपितानो
बोधिनमस्त्तेऽअस्तुमामाहिꣳसीः॥ त्वष्ट्ट्रमन्तस्त्वासपेमपुत्त्रान्पशून्मयिधेहिप्प्रजामस्म्मासुधे
ह्यरिष्ट्टाहꣳसहपत्त्याभूयासम्॥२०॥ अहः केतुना। जुषताꣳसुज्ज्योतिज्ज्योतिषास्वाहा॥
रात्त्रिः केतुनाजुषताꣳसुज्ज्योतिज्ज्योतिषास्वाहा॥२१॥ (११-२) इति श्रीवाजसनेय संहितायां
सप्तत्रिंशोऽध्यायः॥३७॥ श्रीवेदपुरुषाय नमः॥ अनुवाकसूत्रम्॥ देवस्यत्त्वाष्टौ, यमायत्त्वा
क्षत्रस्यत्त्वा दशकौ, त्रयोऽष्टाविꣳशतिः (अ. ३८ मं. २८ अनु. ३)॥ हरिः ॐ॥
देवस्यत्त्वा॥ देवस्यत्त्वासवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णोहस्त्ताब्भ्याम्॥ आददेदित्त्यै
रास्न्नासि॥१॥ इडऽएहि॥ इडऽएह्यदितऽएहिसरस्वत्त्येहि॥ असावेह्यसावेहासावेहि॥२॥ अदित्त्यै

रास्न्ना। सीन्द्राण्ण्याऽउष्ण्णीषः॥ पूषासिघर्म्मायदीष्व॥३॥ अश्श्विबभ्याम्पिन्न्वस्व॥ अश्श्वि

बभ्याम्पिन्न्वस्वसरस्वत्त्यैपिन्न्वस्वेन्द्रायपिन्न्वस्व॥ स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत्॥४॥ यस्त्ते॥

यस्त्तेस्त्तनःशशयोयोमयोभूर्य्योरत्क्नधाव्वसुविद्द्यःसुदत्त्रः॥ येनव्विश्श्वापुष्ष्यसिव्वार्य्याणि

सरस्वतितमिहधातवेकः॥ उर्व्वन्तरिक्क्षमन्न्वेमि॥५॥ गायत्त्रञ्छन्दः॥ गायत्त्रञ्छन्दोसित्त्रैष्ट्टु

भञ्छन्दोसिद्द्यावापृथिवीबभ्यान्त्वापरिगृह्ण्णाम्म्यन्तरिक्क्षेणोपयच्छामि। इन्द्राश्श्विनामधुनःसार

घस्यघर्म्मम्पातव्वसवोयजतव्वाट् ॥ स्वाहासूर्य्यस्यरश्शमयेव्वृष्ष्टिवनये॥६॥ समुद्द्रायत्त्वा॥

समुद्द्रायत्त्वाव्वातायस्वाहासरिरायत्त्वाव्वातायस्वाहा॥ अनाधृष्ष्यायत्त्वाव्वातायस्वाहाप्प्रतिधृष्ष्या

यत्त्वाव्वातायस्वाहा। अवस्यवेत्त्वाव्वातायस्वाहाशिमिदायत्त्वाव्वातायस्वाहा॥७॥ इन्द्रायत्त्वा॥

इन्द्रायत्त्वाव्वसुमतेरुद्द्रवतेस्वाहेन्द्रायत्त्वादित्त्यवतेस्वाहेन्द्रायत्त्वाभिमातिग्घ्नेस्वाहा॥ सवित्त्रेत्त्वऽऋ

भुमतेव्विभुमतेव्वाजवतेस्वाहाबृहस्प्पतयेत्त्वाव्विश्श्वदेव्व्यावतेस्वाहा॥८॥ (८-१) यमायत्त्वा॥

यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्त्रे॥९॥ व्विश्श्वाऽआशाः॥

व्विश्श्वाऽआशादक्षिणसद्द्विश्श्वान्देवानयाडिह।। स्वाहाकृतस्यधोर्म्मस्यमघोःपिबतमश्श्विना ।।१०।। दिविधाः।। दिविधाऽइमँय्यज्ञमिमँय्यज्ञन्दिविधाः।। स्वाहाग्गनयेयज्ञियायशँय्यजु र्भ्यः।।११।। अश्श्विनाघर्म्मम्।। अश्श्विनाघर्म्मम्पातँहाद्र्वानमहर्द्दिवाभिरूतिभिः।। तन्त्रायिणेनमोद्द्यावापृथिवीब्भ्याम्।।१२।। अपातामश्श्विना।। घर्म्ममनुद्द्यावापृथिवीऽअमँ साताम्।। इहैवरातयःसन्तु।।१३।। इषेपिन्न्वस्व।। इषेपिन्न्वस्वोर्ज्जेपिन्न्वस्वब्ब्रह्मणेपिन्न्व स्वक्षत्रायपिन्न्वस्वद्द्यावापृथिवीब्भ्याम्पिन्न्वस्व।। धर्म्मासिसुधर्म्मामेन्न्यस्म्मेनृम्म्णानिधारय ब्ब्रह्माधारयक्क्षत्रन्धारयव्विशन्धारय।।१४।। स्वाहापूष्णे। शरसेस्वाहाग्ग्रावब्भ्यःस्वाहा प्प्रतिरवेब्भ्यः।। स्वाहापितृब्भ्यऽऊर्द्ध्वबर्हिब्भ्र्योघर्म्मपावब्भ्यःस्वाहाद्द्यावापृथिवीब्भ्याँ स्वाहाव्विश्श्वेब्भ्योदेवेब्भ्यः।।१५।। स्वाहारुद्द्राय। रुद्द्रहूतयेस्वाहासञ्ज्योतिषाज्ज्योतिः।। अहःकेतुनाजुषताँसुज्ज्योतिज्ज्योतिषास्वाहा।। रात्त्रिःकेतुनाजुषताँसुज्ज्योतिज्ज्योतिषास्वाहा ।। मधुहुतमिन्द्रतमेऽअग्ग्नावश्श्यामतेदेवघर्म्मनमस्त्तेऽअस्त्तुमामाहिँसीः।।१६।। अभीमम्।।

अभीमम्महिमादिवंव्विप्प्रोबभूवसप्प्रथाः।। उतश्श्रवसापृथिवी७सह्सीदस्वमहाँ२।।ऽअसिरोचस्व देववीतमः।। व्विधूममग्ग्नेऽअरुषम्मियेद्ध्यसृजप्प्रशस्त्तदर्शतम्।।१७।। याते। घर्म्मदिव्व्याशुग्ग्या गायत्त्र्या७हविर्द्धाने।। सातऽआप्प्यायतान्निष्ट्ट्यायतान्तस्यैतेस्वाहा।। यातेघर्म्मान्तरिक्क्षेशुग्ग्या त्त्रिष्ट्टब्भ्याग्ग्नीद्ध्रे।। सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा।। यातेघर्म्मपृथिव्व्या७ शुग्ग्याजगत्त्या७सदस्या।। सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा।।१८।। (१०-२) क्षत्रस्य त्त्वा। परस्प्पायब्ब्रह्म्मणस्त्तन्न्वम्पाहि।। व्विशस्त्त्वाधर्म्मणाव्वयमनुक्क्रामामसुवितायनव्व्यसे ।।१९।। चतुःस्स्रक्क्तिर्न्नाभिः।। चतुःस्स्रक्क्तिर्न्नाभिर्ऋतस्यसप्प्रथाःसनोव्विश्श्वायुःसप्प्रथाः सनःसर्व्वायुःसप्प्रथाः।। अपद्द्वेषोऽअपह्व्वरोन्न्यव्व्रतस्यसश्चिम।।२०।। घर्म्मैतत्।। घर्म्मैतत्ते पुरीषन्तेनव्वर्द्धस्वचाचप्प्यायस्व।। व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि।।२१।। अचिक्क्रद द्द्वृषा ।। अचिक्क्रदद्द्वृषाहरिर्म्महान्मित्त्रोनदर्शतः।। सह्सूर्य्येणदिद्द्युतदुदधिर्न्निधिः।।२२।। सुमित्त्रियानः।। सुमित्त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्त्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्च

व्वयन्द्विष्मः।।२३।। उद्द्वयम्।। उद्द्वयन्तमसस्प्परिस्वः पश्श्यन्तऽउत्तरम्।। देवन्देवत्त्रासूर्य्य

मगन्न्मज्ज्योतिरुत्तमम्।।२४।। एधोसि।। एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि।।२५।।

यावतीद्द्यावापृथिवी।। यावच्चसप्प्तसिन्धवोव्वितस्त्थिरे।। तावन्तमिन्द्रतेग्ग्रहमूर्ज्जागृह्णाम्म्य

क्षितम्मयिगृह्णाम्म्यक्षितम्।।२६।। मयित्त्यत्।। मयित्त्यदिन्द्रियम्बृहन्म्मयिदक्षोमयिक्क्रतुः ।।

घर्म्मस्त्रिशुग्ग्विराजतिव्विराजाज्ज्योतिषासहब्ब्रह्म्मणातेजसासह।।२७।। पयसोरेतः।।

पयसोरेतऽआभृतन्तस्यदोहमशीमह्युत्तरामुत्तराᳮसमाम्।। त्विषः संवृक्क्रत्त्वेदक्षस्यतेसुषुम्म्णस्यते

सुषुम्म्णाग्ग्निहुतः।। इन्द्रपीतस्यप्प्रजापतिभक्क्षितस्यमधुमतऽउपहूतऽउपहूतस्यभक्क्षयामि।।२८।।

(१०–३) इतिश्रीवाजसनेयसंहितायामष्टत्रिंशोऽध्यायः।।३८।। श्रीवेदपुरुषाय नमः।। अनुवाक

सूत्रम्।। स्वाहाप्राणेभ्यः षड्, ग्रश्च्च सप्त, द्वौ त्रयोदश।। (अ. ३९ मं. १३ अनु. २) हरिः ॐ।।

स्वाहाप्प्राणेभ्यः।। स्वाहाप्प्राणेभ्यᳬसाधिपतिकेभ्यः।। पृथिव्व्यैस्वाहाग्ग्नयेस्वाहान्तरिक्क्षाय

स्वाहाव्वायवेस्वाहा।। दिवेस्वाहासूर्य्यायस्वाहा।।१।। दिग्ग्भ्यःस्वाहा। चन्द्रायस्वाहानक्क्षत्त्रे

ब्भ्यः स्वाहाद्भ्यः स्वाहाव्वरुणायस्वाहा।। नाब्भ्यैस्वाहापूतायस्वाहा।।२।। व्वाचेस्वाहा।
प्प्राणायस्वाहाप्प्राणायस्वाहा।। चक्क्षुषेस्वाहाचक्क्षुषेस्वाहाश्श्रोत्त्रायस्वाहाश्श्रोत्त्रायस्वाहा
।।३।। मनसः कामम्।। मनसः काममाकूतिंव्वाचः सत्त्यमशीय।। पशूनाꣳरूपमन्नस्यरसोयशः श्रीः
श्रयताम्मयिस्वाहा।।४।। प्रजापतिः सम्भ्रियमाणः। सम्म्राट्ट्सम्भृतोव्वैश्श्वदेवः संꣳसन्नोघर्म्मः
प्प्रवृक्क्तस्तेजऽउद्द्यतऽआश्श्विनः पयस्यानीयमानेपौष्ण्णोव्विष्ष्यन्दमानेमारुतः क्क्लथन्।।
मैत्त्रः शरसिसन्ताय्यमानेव्वायव्व्योह्रियमाणऽआग्ग्नेयोहूयमानोव्वाग्घुतः।।५।। सविताप्प्रथमे।।
हन्नग्ग्निर्द्द्वितीयेव्वायुस्तृतीयऽआदित्त्यश्च्चतुर्त्थेचन्द्रमाः पञ्चमऽऋतुः षष्ठेमरुतः सप्प्तमेबृहस्प्प
तिरष्ट्टमे।। मित्त्रोनवमेव्वरुणोदशमऽइन्द्रऽएकादशेव्विश्श्वेदेवाद्द्वादशे।।६।। (६-१) उग्ग्रश्च्च।
भीमश्च्चद्ध्वान्तश्च्चधुनिश्च्च। सासह्व्वाँश्च्चाभियुग्ग्वाचव्विक्क्षिपः स्वाहा।।७।। अग्ग्निꣳ
हृदयेन।। अग्ग्निꣳहृदयेनाशनिꣳहृदयाग्ग्रेणपशुपतिङ्कृत्त्स्नहृदयेनभवँय्यक्क्ना।। शर्व्वम्मतस्न्नाब्भ्यामी
शानम्मन्न्युनामहादेवमन्तः पर्शव्व्येनोग्ग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुः शिङ्गीनिकोश्श्याब्भ्याम्।।८।।

उग्ग्रँल्लोहितेन। मित्त्रꣳसौव्व्रत्त्येनरुद्द्रन्दौव्व्रत्त्येनेन्द्द्रम्प्रक्क्रीडेनमरुतोबलेनसाद्ध्यान्प्रमुदा।।
भवस्यकण्ठ्यꣳरुद्द्रस्यान्तꣲपाश्श्वर्य्यम्महादेवस्ययकृच्छर्व्वस्यव्वनिष्ठुꣳपशुपतेꣲपुरीतत्।।९।।
लोमब्भ्यꣲस्वाहा।। लोमब्भ्यꣲस्वाहालोमब्भ्यꣲस्वाहात्त्वचेस्वाहात्त्वचेस्वाहालोहितायस्वाहा
लोहितायस्वाहामेदोब्भ्यꣲस्वाहामेदोब्भ्यꣲस्वाहा।। माꣳसेब्भ्यꣲस्वाहामाꣳसेब्भ्यꣲस्वाहास्न्नाव
ब्भ्यꣲस्वाहास्न्नावब्भ्यꣲस्वाहास्त्थब्भ्यꣲस्वाहास्त्थब्भ्यꣲस्वाहामज्जब्भ्यꣲस्वाहामज्जब्भ्यꣲस्वाहा।।
रेतसेस्वाहापायवेस्वाहा।।१०।। आयासायस्वाहा।। प्प्रायासायस्वाहासँय्यासायस्वाहा
व्वियासायस्वाहोद्द्यासायस्वाहा।। शुचेस्वाहाशोचतेस्वाहाशोचमानायस्वाहाशोकायस्वाहा
।।११।। तपसेस्वाहा।। तपसेस्वाहातप्प्यतेस्वाहातप्प्यमानायस्वाहातप्प्तायस्वाहाघर्म्माय
स्वाहा।। निष्ष्कृत्त्यैस्वाहाप्प्रायश्चित्त्यैस्वाहाभेषजायस्वाहा।।१२।। यमायस्वाहा।। यमाय
स्वाहान्तकायस्वाहामृत्त्यवेस्वाहा।। ब्रह्म्मणेस्वाहाब्ब्रह्म्महत्त्यायैस्वाहाव्विश्श्वेब्भ्योदेवेब्भ्यꣲ
स्वाहाद्द्यावापृथिवीब्भ्याꣳस्वाहा।।१३।। (७–२) इतिश्रीवाजसनेयसंहितायामेकोन

चत्वारिंशत्तमोऽध्यायः।।३९।। श्रीवेदपुरुषाय नमः।। अनुवाकसूत्रम्।। ईशाव्वास्यमष्टा,
वन्धन्तमोनव, द्वौ सप्तदश।। (अ. ४० मं. १७ अनु. २) हरिः ॐ।। ईशाव्वास्यम्।।
ईशाव्वास्यमिदꣳसर्वंय्यत्किञ्चजगत्त्याञ्जगत्।। तेनत्त्यक्क्तेनभुञ्जीथामागृधꣳकस्यस्विद्धनम्
।।१।। कुर्व्वन्नेव।। कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः।। एवन्त्वयिनान्यथेतोस्त्तिनकर्म्म
लिप्प्यतेनरे ।।२।। असुर्य्यानाम।। असुर्य्यानामतेलोकाऽअन्धेनतमसावृताः।। ताँस्त्तेप्प्रेत्त्यापि
गच्छन्तियेकेचात्त्महनोजनाः।।३।। अनेजदेकम्।। अनेजदेकम्मनसोजवीयोनैनद्देवाऽआप्प्नु
वन्न्पूर्व्वमर्शत्।। तद्धावतोन्न्यानत्त्येतितिष्ठत्तस्म्मिन्नपोमातरिश्श्वादधाति।।४।। तदेजति।।
तदेजतितन्नैजतितद्दूरेतद्द्वन्तिके।। तदन्तरस्यसर्व्वस्यतदुसर्व्वस्यास्यबाह्यतः।।५।। यस्त्तु।।
यस्त्तुसर्वाणिभूतान्न्यात्त्मन्नेवानुपश्श्यति।। सर्व्वभूतेषुचात्त्मानन्ततोनव्विचिकित्त्सति।।६।।
यस्म्मिन्त्सर्व्वाणि।। भूतान्न्यात्त्मैवाभूद्द्विजानतः।। तत्रकोमोहꣳकःशोकऽएकत्त्वमनुपश्श्यतः
।।७।। सपरि।। सपर्य्यगाच्छुक्क्रमकायमव्व्रणमस्न्नाविरꣳशुद्धमपापविद्धम्।। कविर्म्मनीषीपरिभूः

स्वयम्भूर्य्याथातत्थ्यतोर्त्थान्व्यदधाच्छाश्श्वतीब्भ्यः समाब्भ्यः।।८।। (८-१) अन्धन्तमः।।
अन्धन्तमः प्रविशन्तियेसम्भूतिमुपासते।। ततोभूयऽइवतेतमोयऽउसम्भूत्त्याᳪरताः।।९।।
अन्न्यदेव।। अन्न्यदेवाहुः सम्भवादन्न्यदाहुरसम्भवात्।। इतिशुश्श्रुमधीराणाँय्येनस्त्तद्विचचक्षिरे
।।१०।। सम्भूतिञ्च।। व्विनाशञ्चयस्त्तद्वेदोभयᳪसह।। व्विनाशेनमृत्त्युन्तीर्त्त्वा सम्भूत्त्यामृत
मश्नुते।।११।। अन्धन्तमः।। अन्धन्तमः प्रविशन्तियेविद्यामुपासते।। ततोभूय ऽइवतेतमोय
ऽउविद्यायाᳪरताः।।१२।। अन्न्यदेव।। अन्न्यदेवाहुर्व्विद्यायाऽअन्न्यदाहुर विद्यायाः।।
इतिशुश्श्रुमधीराणाँय्येनस्त्तद्विचचक्षिरे।।१३।। व्विद्याञ्च।। व्विद्याञ्चाव्विद्याञ्चयस्त्त
द्वेदोभयᳪसह।। अविद्ययामृत्त्युन्तीर्त्त्वाव्विद्ययामृतमश्नुते।।१४।। व्वायुरनिलम्।। व्वायुर
निलममृतमथेदम्भस्म्मान्तᳪशरीरम्।।ॐ३।। क्रतोस्म्मर।। क्लिबेस्म्मर।। कृतᳪस्म्मर।।१५।।
अग्ग्नेनय।। सुपथारायेऽअस्म्मान्व्विश्श्वानिदेवव्वयुनानिव्विद्वान्।। युयोद्ध्यस्म्मज्जुहुराणमेनो
भूयिष्ठान्तेनमऽउक्क्तिव्विधमे।।१६।। हिरण्मयेनपात्त्रेण। सत्त्यस्यापिहित म्मुखम्।।

यो॒सावा॑दि॒त्त्येपुरु॑ष॒ꣳसो॒॑सावा॒हम्।। ॐ३।। खम्ब्रह्म्म॑।।१७।। (९-२) (आदितो मन्त्रसंख्या १९७५) इतिश्रीवाजसनेयसंहितायां चत्वारिंशत्तमोऽध्यायः।।४०।। श्रीवेदपुरुषार्पणमस्तु।।

दशाध्याये समाख्याता अनुवाकास्तु संख्यया।। शतं दशानुवाकाश्च नवान्ये च मनीषिभिः ।।१।। सप्तषष्टिश्चितौ ज्ञेया सौत्रे द्वाविंशतिस्तथा।। अश्श्व एकोनपञ्चाशत्पञ्चत्रिंशत्खिले स्मृताः।।२।। शुक्रियेषु तु विज्ञेया एकादश मनीषिभिः।। एकीकृत्त्य समाख्यातं त्रिशतं त्र्यधिकं मतम्।।३।। इति श्रीवाजसनेयसंहितायामनुवाकसूत्राध्यायः समाप्तः।।

इयं श्रीशुक्लयजुर्वेदसंहिता जामनगरनिवासिनोऽऽचार्यावटङ्केन त्रिक्रमजीतनुजनुषाऽमृतलाल शास्त्रिणा या. शिक्षा. का. प्रणीतयजुः प्रातिशाख्यानुसारेण च शके १८७२ चैत्रमासे शुक्लपक्षे प्रतिपदि रविवासरे वत्सरारम्भे संशोधिता ‘अमृतवर्षिण्या टिप्पण्या’ च समलङ्कृता समाप्ता।।

## ।। अथ याज्ञवल्क्यशिक्षाप्रारम्भः।।

श्रीगणेशाय नमः।। अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः।। उदात्तश्चानुदात्श्च स्वरित्तश्च तथैव च।। लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च।। १।। शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते।। श्यामं तु स्वरितं विद्यादग्निमुच्चस्य दैवतम्।।२।। नीचे सोमं विजानीयात्स्वरिते सविता भवेत्।। उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमुच्यते।।३।। वैश्यं तु स्वरितं विद्याद्भारद्वाजमुदात्तकम्।। नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः।।४।। विद्यादुदात्तं गायत्रीं नीचं त्रैष्टुभमुच्यते।। जागतं स्वरितं विद्यादत एवं नियोगतः।। ५।। गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः।। त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः।।६।। उच्चौ निषादगान्धारौ नीचावृषभधैवतौ।। शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः।।७।। षड्जो वेदे शिखण्डिः स्यादृषभः स्यादजामुखे।। गावो रम्भन्ति गान्धारं क्रौञ्चाश्चैव तु मध्यमम्।।८।। कोकिलः पञ्चमो ज्ञेयो निषादं तु वदेद्गजः।। आश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते।।९।। निमेषमात्रो कालः स्याद्विद्युत्कालस्तथापरे।। अक्षरात्तुल्ययोगाच्च मतिः स्यात्सोमशर्मणः।।१०।। सूर्यरश्मिप्रतीकाशात्कणिका यत्र दृश्यते।। अणवस्य तु सा मात्रा मात्रा च चतुराणवा।।११।। मानसे चाणवं विद्यात्कण्ठे विद्याद्द्विराणवम्।। त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः।।१२।। अवग्रहे तु कालः स्यादर्धमात्रा विधीयते।। पदयोरन्तरे काल एकमात्रा विधीयते।।१३।। ऋचोऽर्द्धो तु द्विमात्रःस्यात्त्रिमात्रः स्यादृगन्तके।। रिक्तं तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेद्बुधः।।१४।। एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्।।१५।। विवृतौ चावसाने च ऋचोऽर्द्धे च तथा परे।। पदे च पादसंस्थाने शून्यहस्तं विधीयते।।१६।। प्रणवं तु प्लुतं कुर्याद्ब्रह्माहृतीर्मात्रिका विदुः।।

चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्।।१७।। शिखी वदति त्रिमात्रामात्राणामिति संस्थिति।। वर्णो जातिश्च मात्रा च गोत्रं छन्दश्च दैवतम्।।१८।। एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता।। हस्तौ तु संयतौ धार्यौ जानुभ्यामुपरि स्थितौ।।१९।। गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत्।। ऊरुभागे तृतीये तु करं विन्यस्य दक्षिणम्।।२०।। प्रसन्नमानसो भूत्वा किञ्चिन्निमम्नमधोमुखम्।। प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।।२१।। सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत्।। कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः।।२२।। स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः।। नाऽभ्याहन्यान्ननिर्हन्यान्न गायेन्नैव कम्पयेत्।।२३।। यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयेत्।। निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।।२४।। सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च।। स्वरश्चैव तु हस्तश्च द्वावेतौ युगपद्भवेत्।।२५।। हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते।। न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः।।२६।। गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति।। प्रकृतिर्यस्य कल्याणी दन्तौष्ठौ यस्य शोभनौ।।२७।। प्रगल्भश्च विनीतश्च स वर्णान्वक्तुमर्हति।। शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम्।।२८।। काकस्वरं मूर्द्धिगतं तथा स्थानविवर्जितम्।। विस्वरं विरसं चैक विश्लिष्टं विषमाहतम्।। व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश।। संहितासारबुलः पदसंज्ञासमाकुलः।।३०।। क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः।। ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः।।३१।। साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते।। संहिता नयते सूर्यं पदं च शशिनः पदम्।।३२।। क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयम्।। कालिन्दी संहिता ज्ञेया पदयुक्ता सरस्वती।।३३।। क्रमेणावर्त्तयेद्गङ्गा शम्भोर्वाणी तु नान्यथा।। यथा महाह्लदं प्राप्य क्षिप्तो लोष्टो विनश्यति।।३४।। एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति।। आम्रपालशबिल्वानामषामार्गशिरीषयोः।। वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम्।।३५।। खदिरश्च कदम्बश्च करवीरकरञ्जकौ।। एते कण्टकिनः पुण्याः क्षीरिणस्तु

यशस्विनः ।।३६ ।। तेनास्य करणे सूक्ष्मं माधुर्यं चैव जायते ।। त्रिफलां लवणाक्तेन भक्षयेच्छिष्यकः सदा ।। क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ।। हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः ।। न साधयति यजूंषि भुक्तमव्यञ्जनं यथा ।।३८ ।। हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ।।३९ ।। ऋचो यजूंषि सामानि हस्तहीनानि यः पठेत् ।। अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति ।।४० ।। ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये ।। पठन्मात्रापपाठात्तु पङ्के गौरिवसीदति ।।४१ ।। स्वरवर्णप्रयुञ्जनो हस्तेनाधीतमाचरन् ।। ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात् ।।४२ ।। न कुर्वीत पदं दीर्घं न कुर्वीत विलम्बितम् ।। आस्येन च शयं कुर्यात्पठन्नान्यमतिर्भवेत् ।।४४ ।। न चास्य मुष्ठिबन्धी स्यान्न चात्युत्तममाचरेत् ।। चुलुनौंका स्फुटो दण्डीस्वस्तिको मुष्टिराकृतिः ।। एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः ।।४५ ।। यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् ।। यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ।।४६ ।। यथा धनष्यावितते शरे क्षिप्ते पुनर्गुणः ।। स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ।।४७।। उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम्।। स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनम्।।४८।। अङ्गुष्ठस्योत्तरे पर्वे तर्जन्युपरि यद्भवेत्।। प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करम्।।४९।। मनुष्यतीर्थोच्चं कृत्वापितृतीर्थोदकं व्रजेत्।। नामितङ्करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम्।।५०।। स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम्।। उत्थाने तु नवाङ्गुल्यमेतत्स्वरस्य लक्षणम्।।५१।। अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।। शिष्याणामुपदेशार्थं कुर्याद् वृत्तिं विलम्बिताम्।।५२।। ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता।। अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता।।५३।। मुष्टााकृतिर्मकारे तु नकारे तु नखाग्रतः।। अनुस्वारेऽङ्गुष्ठक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम्।।५४।। उदात्तं भुवि पातेन मध्यन्नासाग्रमेव च।। शेषं षडङ्गुलं विद्यान्निचितं तु विधीयते।।५५।। षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च।। तच्चतुर्भागमात्रं तु हस्तस्तेनैव

वर्तयेत्।।५६।। ककारान्ते टकारान्ते ङणे चाङ्गुलिं नामयेत्।। पञ्चाङ्गुल्यं पकारे तु तकारे कुण्डलाकृतिः।।५७।। ऊर्ध्वक्षेपाच्च योष्मा स्यादधः क्षेपाच्च यो भवेत्।। एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत्।।५८।। अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वापाꣳरसम्।। दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तितः।।५९।। तर्जन्यङ्गुष्ठयोः स्पर्शेऽप्युदात्तं प्रतिपद्यते।। नीचं तु मध्यमां कुर्याच्छेषं नीचतरं क्रमात्।।६०।। स्वरितं यद्भवेत्किञ्चिद्वकारसहसंयुतम्।। ऊष्माणं तद्विजानीयान्निक्षेप उभयोरपि।।६१।। स्वरितसंज्ञे निक्षिप्ते संयोगो यत्र दृश्यते।। द्विमात्रिके भवेदेकां मात्रिके तूभयं क्षिपेत्।।६२।। जात्ये च स्वरिते चैव वकारो यत्र दृश्यते।। कर्तव्यस्तूभयोः क्षेपो वायव्या इति दर्शनम्।।६३।। शृङ्गवद्वाथ वत्सस्य कुमारीकुचयुग्मवत्।। उभक्षेपः स्वरो यत्र स विसर्ग उदाहृतः।।६४।। विसर्गान्तः स्वरो यत्र स्वरितो यत्र दृश्यते।। दीर्घश्च सवकारश्च तत्रोभक्षेप उच्यते।।६५।। त्रिविधस्तु भवेदूष्मा प्रचिता बलका तरा।। स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः।।६६।। उत्थाने तु तथा तारामेताभिस्त्रिभिरूष्मभिः।। मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत्।।६७।। अक्षरं भजते काचित्काचिद्द्वित्वे प्रतिष्ठिता।। समानजातिका काचित्काचिदूष्माप्रदायिका।।६८।। यथा बालस्य सर्पस्य निःश्वासो लघुचेतसः।। एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता।।६९।। विवृतिं प्रत्ययामूष्मां प्रवदन्ति मनीषिणः।। तामेव प्रतिषेधन्ति यथा आ–ई–ऊ–ए इति निदर्शनम्।।७०।। अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम्।। जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः।।७१।। (तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।) पादवृत्तो भवेत्तद्वत्ताथाभाव्य इति स्वराः।। एकपदे नीचपूर्वः सयवो जात्य इष्यते (अपूर्वोऽपि परस्तद्वत् धान्यं–सुप्वा–स्वरित्यपि)।। एकपद इत्याह।।७२।। नीचपूर्वः सयकारवकारो वा जात्यः स्वरितो भवति।। यथा–जात्यः मनुष्यानिति। सुद्योति। चम्वीव। धान्यम्। कन्या इव। स्वः। वीर्यम्। एवं ह्याह यानि चान्यानीदृग्लक्षणानि

पदानि भवन्ति।। एओआभ्यामुदात्ताभ्यामकारो रिफितश्च यः।। अकारो यत्र लुप्येत तं चाभिनिहितं विदुः।।७३।। यथा कुक्कुटः असि कुक्कुटोसि।। व्वेदः असि।। व्वेदोसि।। भागः असि भागोसि।। मारुतः असि मारुतोसि।। श्वात्रः असि। श्वात्रेसि।। ते अप्सरसाम् तेप्सरसाम्।। ते अवन्तु तेवन्तु।। कः असि कोसि।। सः अहं सोहं।। एवं हि यानि चान्यानि ईदृग्लक्षणानि पदानि भवन्ति।। इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित्।। अनुदात्ते पदे नित्यं विद्यात्क्षैप्रस्य लक्षणम्।।७४।। यथा त्रि अम्बकम् त्र्यम्बकम्।। द्रु अन्नः द्रन्नः।। वीडु अङ्गः वीड्वङ्गः।। व्वाजी अर्व्वन् व्वाज्यर्व्वन्।। एवं ह्याह यानि०।। इकारो यत्र दृश्यते इकारेणैव संयुतः।। उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः।।७५।। यथा अभि इन्धताम् अभीन्धताम्।। अभि इमम्। अभीमम्।। व्वि इहि व्वीहि।। स्रुचि इव स्रुचीव।। चम्वीवेति चम्वीऽइव।। एवं ह्याह यानि चान्यानि०।। उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं पदम्।। एष सर्वं बहु स्वारस्तैरोव्यञ्जन उच्यते।।७६।। यथा इडे। रन्ते। हव्व्ये। काम्म्ये। चन्द्रे। ज्योते। अदिति। सरस्वति। महि। व्विश्श्रुतीति भवन्ति।। एवं ह्याह यानि भवन्ति।। अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम्।। तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः।।७७।। यथा गोमदिति गोमत्।। गोपताविति गोपतौ।। प्रपेति प्र–प्र।। वितततेति वि–तता।। समिद्ध इति सम्–इद्धः।। एवं ह्याह यानि० भवन्ति।। स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते।। पादवृत्तो भवेत्स्वारः ''श्वित्रऽआदित्त्य'' दर्शनम्।। यथा ष्वित्रः आदित्त्यानाम्।। ष्वित्रऽआदित्त्यानाम्।। पुत्त्रः ईधे। पुत्त्रऽईधे।। दात्रे एधि। दात्रऽएधि।। कः ईम्। कऽईम्।। ताः अस्य। ताऽअस्य।। एवं ह्याह यानि०।। उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः।। ताथाभाव्यं भवेत्स्वारः ''तनूनप्त्रेति'' दर्शनम्।।७८।। यथा तनूनप्त्रऽइति तनूऽनप्त्रे।। तनूनपादिति तनूऽनपात्।। तनूनपातमिति तनूऽनपातम्।। एवं ह्याह यानि पदानि लक्षणानि भवन्ति।। इत्यष्टपदसमाम्नाये वैशेषिके याज्ञवल्क्यवचनानां पदानां पाठः समाप्तः।।

।।माध्यन्दिनविरोधी स्यात्ताथाभाव्यस्तु यः स्मृतः।। स्वरौ नैवात्र दृश्येते भिन्नोदात्तानुदात्तकौ।।१।। स्वराः स्पर्शान्तःस्थोष्माणः।। कण्ठ्यजिह्वामूलीयतालव्यमूर्धन्यदन्त्योष्ठ्ययमा विसर्जनीयनिपाताद्याश्च किंवर्णदैवत्यलिङ्गाः। स्वराः शुक्लाः। नानादैवत्याः।। स्पर्शाः कृष्णाः।। कपिला अन्तःस्थाः। ऊष्माणोऽरुणाः।। नीला यमाः।। हरिता नासिक्याः।। पीतोऽनुस्वारः।। रक्तो जिह्वामूलीयः। पीत उपध्मानीयः।। श्वेतो विसर्जनीयः।। शबलो रङ्गः।। नीलोऽनुनासिक्यः।। इत्यन्तर्मध्यमयोर्नासिक्यं विद्यात्।। द्विरुदात्ताख्या इति स्मृतः।। उदमनुद निपाते आद्ये चोपसर्गे नामाख्याते चोपसर्गनिपाताश्चेति किंदैवत्याः।। अक्षराणां च के पुरुषाः।। काः स्त्रियः।। कानि नपुंसकानि इत्यत्र ब्रूमः।। कण्ठ्या आग्नेया अकारादयः।। जिह्वामूलीया नैर्ऋत्याः ककारादयः।। तालव्याः सौम्याश्चकारादयः।। वायव्या मूर्धन्याष्टकारादयः।। रौद्रा दन्त्यास्तकारादयः।। औष्ठ्या आश्विन्याः पकारादयः।। शेषा वैश्वदेवाः।। अम् इत्येवमादयः।। स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये।। द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः।।२।। वर्गाणां पञ्चमा वैश्या अन्तःस्थाश्च तथैव च।। ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्त्तिताः।।३।। शुक्लवर्णानि नामानि आख्याता रोहिता मताः।। कपिञ्जलास्तूपसर्गाः कृष्णाश्चैव निपातकाः।।४।। भार्गवगोत्राणि नामानि भारद्वजा आख्याताः।। वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः।। पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णक।। सर्वं तु सौम्यमाख्यातं नाम वायव्यं दृश्यते।। आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः।।५।। प्रथमाश्च तथान्तःस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः।। शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः।।६।। नाम्नामिन्द्रो देवता वरुण उपसर्गाणामादित्त्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो यमाश्च पुँल्लिङ्गाः।। ङञणनमा यरलवाः स्त्रीलिङ्गाः।। शेषाण्यक्षराणि नपुंसकलिङ्गानीति।। सन्धिश्चतुर्विधो भवतीति।। लोपागमौ वर्णविकारः प्रकृतिभावश्चेति।। तद्यथा। तत्र लोपो भवति। अयक्ष्माः मा। अयक्ष्मामा।। शततेजाः

व्वायुः। शततेजाव्वायुः।। तिग्मतेजाः द्विषतः।। तिग्मतेजाद्विषतः।। इति लोपः।। आगमो भवति। यथा प्रत्यङ्सोमः प्रत्यङ्क्सोमः।। प्राङ्सोमः प्राङ्क्सोमः।। अस्मान् सीते। अस्मान्त्सीते।। त्रीन् समुद्रान्। त्रीन्त्समुद्रान्।। इति आममः।। विकारो भवति। यथा आ इदम्। एदम्।। आ इमे। एमे।। आ इष्टयः। एष्टयः।। प्र इषितः। प्रेषितः।। इति विकारः।। प्रकृतिभावः। यथा आशुः शिशानः।। युञ्जानः प्रथमम्।। अदितिः षोडशाक्षरेण।। देवो वः सविता।। इति प्रकृतिभावः।। आकाशस्था यथा विद्युत्स्फुटितं मणिसूत्रवत्।। एष च्छेदोविवृत्तीनां यथा बालेषु कर्तरी।।७।। द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते।। विवृत्तिस्तत्र विज्ञेया य ईशेति निदर्शनम्।।८।। पिपीलिका पाकवती तथा वत्सानुसारिणी।। वत्सानुसंसृता (जा) चैव चतस्रस्तु विवृत्यः।।९।। पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः।। अहरप्रहरो ज्ञेय अइउऋओ इति निदर्शनम्।।१०।। पिपीलिका आद्यन्तदीर्घा नाभ्याऽआसीदिति निदर्शनम्।। पाकवत्युभयोर्ह्रस्वा विनऽइन्द्रेति निदर्शनम्।।११।। अन्ते च वत्सानुसृजता तानेत्यसौ आवोढमश्विनेति नि०।। वत्सानुसारिणी चादौ दीर्घा ताऽअस्येति नि०।।१२।। करिणी कुर्विणी चैव हरिणी हारिणीति च।। तथा हंसपदा नाम पञ्चैताः स्वरभक्तयः।।१३।। करिणी रहयोर्योगे कुर्विणी लहकारयोः।। हरिणी र(श)षयोर्योगे हारितं ऋषकारयोः।।१४।। या तु हंसपदा नाम सा तु रेफषकारयोः।। हरिणी हरयोर्विद्यात्कुर्विणी लृहकारयोः।।१५।। देवम्बर्हिरिति करिणी उपह्व (बल्ह) रेति कुर्विणी।। हरिणीं अरे(प)षस इत्याहुर्हारिणी शतवल्हेति च।।१६।। वर्षोवर्षीयतेसीति तथा हंसपदेति च।। स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत्।।१७।। इकारं चाप्युकारं च ग्रस्तदोषं तथैव च।। एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता।।१८।। सम्यक् पाठस्य सिद्धार्थं शिष्याणां हितकाम्यया।। अर्धमात्रस्वरं किञ्चित्पृथङ्न्यूनमिवोच्चरन्।। ऋकारे च हकारे च हृत्कण्ठमनसानि च।।१९।। नैतत्स्वरितपूर्वाङ्गे नापराङ्गे कथञ्चन।। न स्वरे न च मात्रायां कथं स्वारो

विधीयते।।२०।। पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम्।। उभयार्द्धार्द्धसंयोगे स्वारं कुर्याद्विचक्षणः।।२१।। संयोगे तु परं स्वार्थं परं संयोगनामकम्।। संयुक्तस्य तु वर्णस्य न स्वार्थं पूर्वमक्षरम्।।२२।। उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत्।। उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्यसेत्।।२३।। स्वरितादनुदात्ता ये प्रचयास्तान्प्रचक्षते।। एकस्वरानपि च तानाहुस्तत्त्वार्थविचिन्तकाः।।२४।। प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः।। स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत्।।२५।। दुर्बलस्य यथा राष्टं हरते बलवान्नृपः।। एवं व्यञ्जनमासाद्य अकारो हरते स्वरम्।।२६।। उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा।। अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च।।२७।। स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।। स्वरप्रधानैस्तैः स्वार्यं व्यञ्जनं तेन सस्वरम्।।२८।। व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सस्वरः।। स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रवदन्ति हि।।२९।। मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः।। आचार्याः सममिच्छन्ति पदच्छेदं तु पण्डिताः।।३०।। स्त्रियो मधुरमिच्छन्ति विकृष्टमितरे जनाः।। उदात्तं नानुवर्तन्ते नीचन्न स्वरितं तथा।।३१।। विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम्।। हरिवरुणवरेण्येषु धारापुरुषेषु च।। स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता नकाराः।।३२।। द्वौ वरुणौ च स्वरितौ।। उदुत्तमं वरुणधारयंवरोरुधारा उरुधारा च होइते।। मात्रिकं वा द्विमात्रं वा स्वरितं यदिहाक्षरम्।। तस्यादितोऽर्द्धमात्रा वै शेषं च परतो भवेत्।।३३।। नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते।। छकारं न प्रयुञ्जीत ञशसन्धिं समुच्चरेत्।।३४।। ओकारं प्लुतविज्ञेयं प्लुतमग्नाद्वितीयकम्।। लाजीं छाचीं तृतीयं च विवेशेति चतुर्थकम्।।३५।। अधःस्विदासीत्पञ्चमं चोपरिस्विदासीच्च षष्ठकम्।। सप्तमं तु भ्रुवोःस्मार अष्टमं नैव विद्यते।।३६।। उच्चस्थानगते हस्ते स्वरितं नोपपद्यते।। अधःस्था तु यदा गच्छेत्स्वरितं न तदा भवेत्।। कचटतपा दृश्यन्ते सन्धिस्थानेषु नित्यशः।। स्ववर्गेणैव संयुक्ता मोक्षं तत्र न कारयेत्।। तकारान्ते पदे पूर्वे सकारे परतः स्थिते।। प्रत्यारम्भन्न कुर्वीत पापाविति

निदर्शनम्।। ककारान्ते पदे पूर्वे सकारे परतः स्थिते।। खसवर्णं विजानीयात् भिखक्सेति निदर्शनम्।। तकारान्ते पदे पूर्वे चवर्गे परतः स्थिते।। मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनम्।। ङकारान्ते पदे पूर्वे सकारे परतः स्थिते।। कसवर्णं विजानीयात्प्राङ्क्सोमेति निदर्शनम्।। टकारान्ते पदे पूर्वे सकारे परतः स्थिते।। टसवर्णं विजानीयात्सम्भ्राट्सम्भृतेति निदर्शनम्।। तकारान्ते पदे पूर्वे सकारे परतः स्थिते।। छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम् ।। नकारान्ते पदे पूर्वे सकारे परतः स्थिते ।। तसवर्णं विजानीयात्त्रीन्त्समुद्रेति निदर्शनम् ।। पकारान्ते पदे पूर्वे शकारे परतः स्थिते ।। छसवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ।। मकारान्ते पदे पूर्वे सवर्णे परतः स्थिते ।। मसवर्णं विजानीयादिमम्मेति निदर्शनम् ।। वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः।। द्विमात्रे मात्रिको ज्ञेयः संयोगाद्यस्य यो भवेत्।। अनुस्वारो द्विमात्रः स्याद्पूर्णव्यञ्जनादिगः।। ह्रस्वाद्वा यदि वा दीर्घाद्देवानाꣳहृदयेभ्य इति।। अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते।। दीर्घं तं तु विजानीयाच्छ्रोताग्रावाणेति निदर्शनम्।। अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते।। ह्रस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम्।। अनुस्वारश्च यो दीर्घादक्षराद्यो भवेत्परः।। स तु ह्रस्व इति ज्ञेयो मन्त्रेष्वेव विभाषया।। ओभावश्च विवृतिश्च सषसा रेफ एव च।। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।। यथा भावप्रसन्धानमुकारादिपरं पदम्।। स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः।। उभावादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत्।। विवृतं प्रति या ऊष्मा विज्ञेया विकटानना।। लीढातिलीढविद्युच्च शषसेषु प्रकीर्तिताः।। जिह्वामूले च रेफे च विज्ञेया विठकाशठाः।। उपध्मानीयसहितां पुष्पिणीं तां विनिर्दिशेत्।। अन्यत्र यो भवेदूष्मा सुलभां तां विनिर्दिशेत्।। पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम्।। ईषत्स्पृष्टं विजानीयात्तस्मिन्काले तु कारयेत्।। पादादौ च पदादौ च संयोगावग्रहेषु च।। यः(ष)शब्द इति विज्ञेयो योन्यः स य इति स्मृतः।। उपसर्गपरो यस्तु पदादिरपि दृश्यते।। ईषत्स्पृष्टं यथा विद्युत्पदच्छन्दात्परं

भवेत्।। त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ।। आदेराजविकल्पार्था ईषत्स्पृष्टा इति स्मृताः।। विभाषायामेकारः स्यात्तथा नेतैः पदात्परः।। भवन्तेत्यपि पूर्वैव तथा च सपदादपि।। यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्।। यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते।। वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः।। आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूत्तरः।। उपांशु त्वरितं चैव योऽधीते हृदि संज्ञकः।। अपि रूपसहस्रेषु सदेहेषु प्रवर्तते।। पञ्चविद्यां न गृह्णन्ति जडाः स्तब्धाश्च ये नराः।। आलस्याश्चैव रोगाश्च येषां च विस्मृतं मनः।। अहिरिव गणाद्भीतः संमानान्नरकादिव।। राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति।। न भोजनविलम्बी स्यान्न च नारीनिबन्धनः।। सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत्।। यथा खनन्खनित्रेण नरो वार्यधिगच्छति।। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।। सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम्।। सुखिनस्तु कुतो विद्या सुखं विद्यार्थिनः कुतः।। गुणिता शतशो विद्या सहस्रावर्तिता पुनः।। आगमिष्यति जिह्वाग्रे स्थलनिम्नमिवोदकम्।। शतेन गुणिता विद्या सहस्रेण च तिष्ठति।। शतानां च सहस्रेण प्रत्यञ्चदवतिष्ठति।। जलमभ्यासयोगेन शिलायाः कुरुते क्षयम्।। कर्कार्णामृदुतस्तस्य किमभ्यासान्नसाध्यते।। गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।। अथवा विद्यया विद्या चतुर्थं नोपलभ्यते।। शुश्रूषारहिता विद्या ह्यल्पमेधागुणैः सह।। वन्ध्या च यौवनी तस्या न विद्या फलिनी भवेत्।। हयानामिव जात्यानामर्द्धमात्रार्द्धशायिनाम्।। न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति।। यथा पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महत्।। न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम्।। अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम्।। अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु।। अन्नव्यञ्जनयोर्भागस्तृतीयमुदकस्य च।। वायोः सञ्चारणार्थाय चतुर्थमुपकल्पयेत्।। हकारं पञ्चमैर्युक्तमन्तस्थैश्चापि संयुतम्।। औरसं तं विजानीयात्कण्ठ्यमाहुरसंयुतम्।। हकारो यत्र पूर्वस्थो ह्यन्तस्थाद्यो भवेत्परः।। पदकाले वियुज्येत संहितायां स

औरसः।। मेघदुन्दुभिनिर्घोषो ज्ञायते पयसो ह्रदात्।। एवं नादं प्रयोक्तव्यं सिंहस्य रुदितं यथा।। मासे भाद्रपदे मेघाः शब्दं कुर्वन्ति यादृशम्।। एवं गह्वरमासाद्य शुक्रं दुदुह्रेति दर्शनम्।। शेषाणां वानरा युद्धमुत्पतन्ति पतन्ति च।। एवं वर्णाः प्रयोक्तव्या इहेहैषान्निदर्शनम्।। यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्।। एवं वर्णाः प्रयोक्तव्या युञ्जानेति निदर्शनम्।। दुर्दुरो जयदेशे च प्रफतेषुर्नयाप्यया।। एवं वर्णाः प्रयोक्तव्या अपाम्फेनेति निदर्शनम्।। यथा भारभराक्रान्ता निश्वसन्ति नरा भुवि।। एवं वर्णाः प्रयोक्तव्या अद्भ्यः सम्भृत इत्यपि।। कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत्।। एवं वर्णाः प्रयोक्तव्याः कुक्कुटोसीति दर्शनम्।। वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा।। एवं वर्णाः प्रयोक्तव्याः सदुन्दुभेति दर्शनम्।। रङ्गे चैव समुत्पन्ने नो ग्रसेत्पूर्वमक्षरम्।। स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत्।। यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते।। एवं रङ्गः प्रवक्तव्यो ङकारः परिवर्जितः।। द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः।। अन्ते प्रयुञ्जते रङ्गः पञ्चमैः सानुनासिकः।। यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते।। एवं रङ्गं विजानीयात् ङकारपरिवर्जितम्।। अनन्तरं मकारस्य यो रङ्गस्तत्र रञ्जयते।। सर्वानुनासिकं विद्यादेषा मध्योपधानिका। यरलवशषसहरज्यन्ते चोपधानिका।। गर्वान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिका।। नासादुत्पद्यते रङ्गः कांस्येन समनिःस्वनः।। मृदुश्चैव द्विमात्रः स्याद्वृष्टिमान्स्यान्निदर्शनम्।। यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत्।। भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।। मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम्।। सनाथस्यैकदेशस्य न वर्णाः शङ्करं गताः।। यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत्।। एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्।। गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।। माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।। धैर्यं लयसमत्वं च षडेते पाठका गुणाः।। चतुरक्षरषट्कं च निवर्तेत पुनः पुनः।। आवर्तते पदं यच्च द्विस्त्रिराम्रेडितं हि तत्।। यथा धाम्ने धाम्नेति

यजुषे यजुषेति निदर्शनम्।। हीयते वर्धते चापि पदं यत्र कृशोदरम्।। उपचारः स विज्ञेय उभे सुश्चन्द्रेति निदर्शनम्।। अथ सप्तविधाः संयोगपिण्डाः।। अयःपिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति।। यमान्विद्यादयः पिण्डान्सान्तःस्थं दारुपिण्डवत्।। अन्तःस्थं यमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत्।। अन्तःस्थं यमसंयोगे विशेषो नोपलभ्यते।। अशरीरं यमं विद्यादन्तःस्थः पिण्डनायकम्।। ज्वालापिण्डान्सनासिक्यान्सानुस्वाराँस्तु मृन्मयान्।। सोपध्मा वायुपिण्डाश्च जिह्वामूले तु वज्रिणः।। अयःपिण्डो नाम यथा।। अग्ग्नीः। पक्क्तीः। नातनच्चिम।। दारुपिण्डो नाम यथा।। अश्श्चः। सूर्य्यः। व्विश्श्वाजतीति भवति।। तत्र ऊर्णापिण्डो नाम यथा।। यस्म्मिन्। अत्यस्म्मिन् अमुष्म्मिन्। इति भवति।। तत्र ज्वालापिण्डो नाम यथा।। ब्रह्म्मा। वह्निनः। गृह्ण्णामीति भवति।। तत्र मृत्पिण्डो नाम यथा।। सा॒स्था स॒स्कर्त्तारः। स॒स्वर्त्तऽइति।। तत्र वायुपिण्डो नाम यथा।। देव सवितः। युञ्जानः प्रथमम्। प्रादिवः ककुत्सुप्तमिति भवति।। तत्र वज्रपिण्डो नाम यथा।। इष्कृतिः। निष्कृतिः। ऋग्साम इति भवति।। प्रथममेव षकारेण सकारेणैव संयुतम्।। एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्शनम्।। प्रथमेन ठकारेण थकारेणैव संयुतम्।। एतत्स्वरं समासाद्य अधिष्ठाननिदर्शनम्।। प्रथममेव णकारेण नकारेणैव संयुतम्।। एतत्स्वरं समासाद्य त्रिणवत्त्रयस्त्रि॒शाविति निदर्शनम्।। प्रथममेव रङ्गेण नकारेणैव संयुतम्।। एतद्रञ्जितमासाद्य वृष्टिमानिति निदर्शनम्।। एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्याताः।। शनैश्चरदैवत्याः।। चत्वार्यन्तस्था यरलवाः कपिलवर्णाः अग्निदैवत्याः।। चत्वार्यूष्माणः शषसहा अरुणवर्णा आदित्यदैवत्याः।। त्रयस्त्रि॒शद्व्यञ्जनानि स्पर्शा अन्तःस्था ऊष्माणश्चेति।। चतुर्विधं करणम्। स्पृष्टमस्पृष्टं संवृतं विवृतं चेति।। संवृतो घोषा विवृता अघोषाः।। वि॒शतिर्घोषास्ते गजडदबा घझढधभा ङञणनमाः यरलवाश्चेति।। त्रयोदश अघोषास्ते कचटतपाः

खछठथफाः शषसाश्चेति।। अष्टौ वर्णस्थानानि भवन्ति।। उरःकण्ठ्यमूर्द्धन्यतालुदन्त्ये। जिह्वामूलयमानुनासिक्याश्चेति।। द्वौ औरस्यौ। ह हा इति। अआआ ३ त्रयः कण्ठ्याः।। ऋषट्मूर्द्धन्याः। टठडढणष इति।। दश तालव्याः चछजझञयशइईई ३इति।। अष्ट दन्त्याः। तथादधनलृलसाः।। एकादश ओष्ठ्याः। पफबभमा उऊऊ ३ छउपध्माचेत्यादयः।। एको दन्तमूलयो रेफः।। जिह्वामूलीयाः पञ्च। कुंखुंगुंघुंङुंइति।। क्मख्मग्मघ्मकुंखुंगुंघुं इति यमाश्चत्वारः। रुक्मेति प्रथमो ज्ञेयः सक् इत्यपरो भवेत्।। तृतीयः सद्मा इत्याहुः उपध्मेति चतुर्थकः।। प्रथमौ चौष्ठनासिक्यावोष्ठनासे उपाश्रितौ।। द्वितीयः कण्ठ्यदन्त्यश्च नासामूलमुपाश्रितः।। तृतीयः कण्ठ्यजिह्वाग्रे नासायामेव निर्दिशेत्।। चतुर्थो हृदि नासिक्यः कण्ठे चाभिहिता यमाः।। आपञ्चमैश्चैकपादः संयुक्तं पञ्चमाक्षरम्।। यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः।। यत्किंचिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ।। सर्वमत्र प्रतिष्ठितमिति ।। ऋवर्णेतित्परे सादावनुस्वारो द्विमात्रकः।। संयोगे परभूतेषु ह्रस्व एवोच्यते बुधैः।। इति श्रीयाज्ञवल्क्यशिक्षा समाप्ता।।